CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13
Coll. No. 688

Title Rasakadambakalladi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 888 Subject: Kāvya.

Title: Rasakadambakallolini tikā on Gitagovinda

Author: — Scribe: —

Date of the work: — Date of the Ms.: V.S. 2003

Place of the work: — Place of the Ms.: —

Size: 10" by 4.5" Extent: 250 foll.

Language: Sanskrit Script: Devanagari

Remarks: —

ः॥श्रीकृष्णायनमः॥ ॥संभ्रांतोराधिकायानयनविलसितैर्विस्मयाभ्रूविलासैःकिं
जल्कव्रातकांतेःकनकनिकषवत्पद्मंजुछटानः॥विन्यासोमंजुकेलीर्मधुरमधु
रयाराध्याकृष्णचंद्रःकंदर्पाज्ञाद्वृद्धिर्जयतिवनवनेवृंदयालक्षितेसः॥१॥इह
खलुसकलनववल्लवीवृंदवदनेंदीवरसाश्राधरमधुरमधुरमूर्त्तिश्रीमद्वृंदावनेश्व
रीस्तनकुड्मलमकरीविरचनाकलितकरकमलदलानंदकंदलितमकरध्वजादे
शचलितयोःश्रीमत्कालिंदीतटसंबंधिमाधवीव्रततिंस्फुटत्कुसुमकदंबसौगंध्या
लुब्धसच्चंचरीकपटलीध्वनिमाधुरीमुग्धसन्नस्वरगुणगणैर्विविधनिकुंजमंजुध्व
नुमघनवनेऽवलंबिनीकंदर्पकोटिलीलारसजलधीनिमग्नहृदयश्रीवृंदावनकि

शोरीकिशोरचक्रचूडामणेःश्रीराधामोहनयोःसमस्ततत्क्षनरूपंकरुहानं
दसंवर्द्धिनीविहारस्यमधुरीतत्क्षपयैववर्त्मयितुंश्रीमज्जयदेवनामाकविरिष्ट
देवतास्मरणलक्षणमंगलमाचरति॥तत्रायोग्योप्ययंजनस्तदनुगतत्वेनैवव्या
चष्टे॥ ॥मेघैर्मेदुरमंबरंवनभुवःश्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदि
मंराधेगृहंप्रापय॥इत्थंनंदनिदेशतश्चलितयोःप्रत्यध्वकुंजद्रुमंराधामाधवयो
र्जयंतियमुनाकूलेरहःकेलयः॥१॥जयंतिसर्वोत्कर्षेणवर्त्तंते॥प्राकृतताप्राकृतेभ्यो
जीवास्वरूपेयोरतिरेकात्॥उक्तंचकृष्णस्तुभगवानस्वयमिति॥कास्तारहःकेल
यःसुरतक्रीः॥रहोगुह्यरतेइतिरहःकेलयःएकांतक्रीडाइतिच॥सजातीयविजातीये

न्योपिएकांतत्वेनराधयासहकेलीनामुत्कर्षोनिरूपितः।उक्तंचायन्नोविहायगोविं
दःप्रीतोयामनयद्रहइति।अथवाकेलयःसुरतक्रीडाःप्रकरणवशात्कस्मिन्सति
रहएकांतेसति।एकांतार्थेरहोऽव्ययमिति।सखीभिरपिकिंचिद्व्यवधानेस्थितत्वात्
वक्ष्यति।यातेगेहाद्बहिरवहितालीपरिजनेइति।जयंतीत्यनेननमस्करणीयत्वमु
क्तं।तेननमस्क्रिययाकाव्यमुखंद्योतितं।आशिषिलियालोटाविति लोडर्थेलड्विधाना
त्।आशीश्च।भगवतीदंआशीर्वादरूपंमंगलभक्तप्रेम्णैवसंगछते।परमकल्याण
त्वात्।केलयइत्यनेनकथालक्षणंवस्त्वपिनिर्द्दिष्टं।एवंमहाकविनात्रैविध्यमपिकाव्यमु
खंसन्मुन्मीलितंभवति।तथाच।जयंतीत्यनेनवर्त्तमाननिर्द्देशात्केलीनांनित्यंप्रतिपादि

रूप
राम
२

त्य

तं।केलयइत्यनेनबहुवचनेनानंतत्वंचदर्शितं।कवेश्चलीलोपासनयापरमै।
कांतिकत्वंस्फुटमेव।तासांस्थानंदर्शयति।क्व।यमुनाकूले।यमुनायाःकूलंतत्रप्र
त्यध्वकुंजद्रुमं।अध्वानश्चकुंजाश्चद्रुमाश्चअध्वकुंजद्रुमाः।तानप्रतिलक्षणेनाभिप्र
तीतिसमासः।अध्वनिअध्वनिकुंजेकुंजेद्रुमेद्रुमेइत्यर्थः।अनेनमहाविलासित्वं
कथितं।तदुक्तं।चापल्यसीमेतिकर्णामृते।तथाचाध्वादिषुकेलयःयथा।कस्याःप
दानिचैतानिर्यातायानंदसूनुना।अंसन्यस्तप्रकोष्ठायाःकरेणोःकरिणायथा।नल
क्ष्यंतपदान्यत्रतस्यानूनंनृणांकुरैःखिद्यत्सुजातांह्रिलतामुन्निन्येप्रेयसींप्रियः
।अत्रप्रसूनावचयःप्रियार्थेप्रेसोयेकृतः।प्रपदाक्रमणेएतेपश्यतासकलेपदे।केशप्र

साधनंत्वत्रकामिन्याःकामिनाकृतं।तानिचूडयताकांतामुपविष्टमिहध्रुवमिति
श्रीभागवते।अथवा।प्रियसखिपरिरंभान्नाभिमुख्यानुबंधादशदृशविनिवे
शान्नर्मलौल्योर्जितानि।इयमविषममंदन्यासतोजल्पगोष्ठीपदततिरिहराधा
कृष्णयोरातनोति।मनोहारीहारस्खलितमणिभिस्तारतरलैःपरिम्लायन्माल्यो
मिलितपुरटालंकृतिकणः।अयंकुंजस्तल्पीकृतकुसुमपुंजप्रणयवानसमंतादुत्तुं
गंपिशुनयतिरंगंमुरभिदइति।यमुनाकूलइत्यनेनसंभोगश्रमहरणायशिशिरस
मीरपभाद्यवचयं।जलकेलीनामिन्यादिसंपत्तिःदर्शिता।कयोःराधामाधवयोःरा
ध्साध्संसिद्धावितिराध्यतेसाध्यतेसंसिद्धिप्राप्यतेस्वसौंदर्यादिगुणैस्तादृशनाय

कशिरोमणेराकांक्षितमनयेतिसाराधा॥अथवाराध्यतेसाध्यतेवशीक्रियतेस्वासा
धारणानुरागमाधुर्यकौशलेनाशेषनायकचूडामणिरनयेतिसाराधा।तथाचो
क्तंअनयाराधितोनूनंभगवानहरिरीश्वरइति।श्रीभागवते।अनेननाम्नैवाशेषना
यिकागुणाःकथिताः।मांश्रियंशोभांवैकुंठेश्वरींवाधुनोतिनिजसौंदर्यादिगुणैःकंप
यतिस्वप्रवणांकरोतीतिमाधवः।धूञकंपने।पचाद्यच्।यथाहलीलाशुकः।यत्पा
दकल्पतरुपल्लवशेषरेषुलीलास्वयंवररसंलभतेजयश्रीरिति।लीलयाशृंगार
रसविक्रमेणजयश्रीःसर्वातिशायिनीशोभेति।अथवा।जयस्यविष्णोःप्रसिद्धाम
हिषी।जयोभर्तुःवक्षसिनित्यमेवस्थितिलक्षणःसौभाग्योत्कर्षःतद्युक्तेतिवा।उक्तंच

।श्रीर्यत्पदांबुजरजश्चकमेतुलस्यालब्ध्वापिवक्षसिपदमिति।यद्वांछयाश्रीर्ललनाच
रत्तपोविहायकामान्सुचिरंधृतव्रतेति।अथवा।मायाःसौंदर्यादिगुणसंपत्तेर्धवः
पतिर्माधवः।धवःपतिःप्रियोभर्त्तेत्यभिधानात्।मधौमधुवंशेभवोमाधवइति॥वा।
अथवा।मधौमधुररसेभवोमाधवः।वक्ष्यतिच।शृंगारःसखिमूर्त्तिमानिवेतिमधौ
वसंतेभवोमाधवः।स्मरइतिवा।तत्रभवइतिसूत्रेणाण्।ऊर्गुणइतिगुणः।तथाचो
क्तं।साक्षान्मन्मथमन्मथः।स्त्रीणांस्मरोमूर्त्तिमानितिच।एभिर्व्याख्यानैर्नायक
स्यगुणाःकथिताः।राधाचमाधवश्चराधामाधवौतयोः।तथा।लक्ष्म्याकाम्यमानोपि
राधायामासक्तोबभूवतितस्याःपरमोत्कर्षोनिरूपितः।तेनचातिगुरुगुणगणगौर

वेणकामकेलिषुनायकायाश्चप्राधान्यात्तस्याःपूर्वनिपातः।अल्पाच्तरमितिवा।
आस्तिककामुकोयंनायकश्च।तदुक्तं।श्यामांपरस्त्रियंप्राप्यचुंबनालिंगनादिभिः
नवांश्चजनयेद्भावान्सस्यादास्तिककामुकइति।केचित्तुश्रियाविनाभगवतःक्री।
डाऽसंभवादितिगोपीषुलक्ष्मीत्वमापादयंति।तत्तुरुक्मिणीकृष्णजन्मनीतितस्या
ःपृथक्निर्द्देशात्।नायंश्रियोंगउनितांतरतेःप्रसादइतिनिषेधाच्चनसंगछते।
किंच।मूलप्रकृतिरुक्मिणीत्युपनिषद्वचनात्।रुक्मिण्याःपूर्णत्वमवगम्यते।ततोपि
गोपीनांभावाधिक्यश्रवणात्।तन्नाशंकनीयमिति।तद्यथा।तद्भावमापुरपिनित्य।
युजांदुरापमिति।नित्ययुजांपातिव्रत्यविधानेननित्ययुक्तानांमहिषीनामित्यर्थः॥

नेष्टायदंगिनिरसेकविभिःपरोढातद्गोकुलांबुजदृशांकुलमंतरेण।आशंसयारसविधेरवतारितानी
द्राक्मौलिनारसिकमंडलशेखरेण॥१॥

अन्यच्च॥यद्यपिनित्याद्वितीयवल्लवोराधामोहनोतथाप्यनेनपारकीयत्वान्नासेनष्टं।
गाररसस्यपराप्रतिष्ठाध्वनिता॥तउक्तं॥बक्रुवार्यतेयतःखलुयत्रप्रच्छन्नकामुकत्वंच॥
यान्यमिथोऽर्जनतासापरमामन्मथस्यरतिरितिनरतः।वामताऽर्जनत्वंचस्त्रीणांया
चनिवारणात्तदेवंपंचबाणस्यमन्येपरममायुधमितिरुद्रःशृंगारतिलकेच॥अनन्य
शरणास्वीयाधनहार्यापणांगना।अस्याःस्तुकेवलंप्रेमतेनेषारागिणीमता।किंतद्व
णयोःराधामाधवयोःइष्टंवक्ष्यमाणप्रकारेणनंदनिदेशतश्चलितयोः।लोकानुसार
तस्तुरूढ्यानंदनिदेशतइति।कदाचिद्धीराधयाश्रीकृष्णःसंबंधयोगेनत्रसंकोचव्यव
हाराद्वस्तुतःसंगमदृष्ट्यैवस्वव्रजेगोदोहार्थमानीतःतस्मिन्नेवसमयेतन्निकटेस्वव्र ५

जेश्रीव्रजेश्वरस्यागमनंजातं।तत्रप्राणकोटिप्रियंपुत्रंमेघागमंचदृष्ट्वाप्रणयकोपो
क्त्याह।देवमेदेराधेयतस्त्वयायमानीतस्तस्मात्त्वमेवेनंगृहंप्रापयेतिवचनोपक्रमेणो
वतन्निदेशतःस्वानीष्टसिद्धेऽविलंबेनैवकदाचित्क्रीडाप्रतिबंधकंकंचनजनंत्रस्था
पनायदास्यतीतिचलितयोः।मेघैरित्यादिकालदेशसंपत्प्रदीपिताःकेलयोयमुना
याःकूलेऽध्वक्रमंप्रतिजग्मतुरितिमेघादीनांश्रीव्रजेश्वरदृष्ट्यैवनयानकहेतुत्वंत
योःरसिकशिरोचूषणकृतयोस्तुशृंगारहेतुबत्वमेवनित्यंयाचलोकेप्रसिद्धिः।श्री
दृषभानोर्गवांश्रुत्वावत्सलानांदोहनंश्रीकृष्णःकरोति।नगवस्त्रियाणांश्रीव्रजेश्वरस्य
गवांदोहःश्रीदामादिनाक्रियतइति।केचित्तुनंदनिनाम्नीकाचित्सखीतस्याःदेशातव

चनादितिव्याकुर्वतितत्ग्रंथेषप्रसिद्धनामकल्पनयानस्वीकारःग्रंथानुसारीत्वयम
र्थः।नंदयतीतिनंदः।नंदिगृदृपचादिभ्योल्युणिन्नचःइतिबकुलोक्तेरचइतिनंदश्चा
सौनिदेशश्चत्रानंदकारिनिदेशःस्वानीष्टक्रीडायांप्रेरणात्कस्याश्चिद्राधायाःप्रियस
हचर्याःनाषणंनमोक्तिस्तस्मात्।सख्याऽरसपोषकत्वात्।तद्वल्लक्षणंयथा।स्वात्मेनो
प्यधिकंप्रेमकुर्वाणान्योन्यवछलं।विस्रम्भिणीचयोवेषतुल्यास्याच्चसखीमता।मिथ
ःप्रेमगुणोत्कीर्त्तिस्तयोरासक्तिकारिता।त्रनिसारोदयोरेवसख्याःकृत्तेसमर्पणं॥
नर्मश्वासननेपथंहृदयोद्घाटपाटवं।छिद्रसंवृतिरेतस्याःपत्यादेःपरिवंचना।शि
क्षासंगमनंकलेसेवनंमज्जनादिनिःतयोर्द्वयोरुपालंभनःसंदेशप्रेषणंतथा।नाषि ६

कापाणसंरक्षाप्रयत्नाद्याःसखीक्रियाइति।चलितयोःतमेवप्रकारमाह।हेस।
खिराधेतत्रस्माद्धेतोरिमंत्वन्मुखचंद्रनिहितेक्षणचकोरंत्वमेवगृहंप्रापय।क्रीडा
निकुंजंप्रापयेत्यर्थः।त्रखिलनोग्यास्पदत्वेनगृहमित्युक्तंतेनचसंनागसंपत्त्याए
नंसुखयेतिगूढानिप्रायः।त्वमेवेत्यन्ययोगोनिरस्तः।त्रथवा।गृहंप्रापयेति।सामा
न्यनारीव्याहृत्यागृहिणीनिर्वर्त्त्यसंनोगादिकर्मणिसमुदितानवेत्यर्थः।त्रत्रगृह
शब्देनता।स्त्रीतगृहिण्युच्यते।गृहशब्दछलेनतामेवपुरस्कृत्यवनविहारदर्शनात्
प्राप्नोतिरुदर्थेवर्त्तते।प्रजानोदययुक्तिश्चितिचूडामणिः।एवकारोन्ययोगव्याहृत्य
र्थः।त्वयैवायंगृहिणीमान्स्यादिति।सख्याःगूढपरिहसितमितिकुंजकणोक्तिः।

तस्मादितिकिंयतोयंतवाधीनोजनोभीरुःमदनवेपितः।एभिर्भावैर्हेतुभिःस्मरश
रहतीःसोढुमसमर्थः।अत्रनक्तंभीरुरिमंगृहंप्रापयेति।अत्रेदमोन्वादेशेद्वितीयाटौस्वे
नइतिसूत्रेणएनादेशःकथंनभवतीतिनवाच्यं।अन्वादेशविषयत्वाभावात्एकक्रि
याविशिष्टत्वेनकथितस्यपुनःक्रियांतरविशिष्टत्वेनकथनमन्वादेशः।इहतुनक्तंभीरु
रित्यनेनभीरुत्वविशिष्टतयानिर्द्दिष्टेमाधवस्वरूपेनपुनःक्रियावैशिष्ट्यंप्रतिपाद्यते।
ततःक्रियांतरविशिष्टत्वाभावान्नेहान्वादेशः।तानेवभावानाह।अंबरमाकाशंमेघैर्मेदु
रंसांद्रंस्निग्धंवर्त्तते।अपरंचतमालद्रुमैर्वनभुवःश्यामाःवर्त्तंते।नक्तंरात्रिकालःएवंदे
शकालवस्तुलक्षणादिभावासूचिताः।तथाचतद्भावानांश्यामलत्वेनशृंगाररसतादा।

त्म्याछृंगाररसरूपत्वंध्वनितं।ऊक्तंच॥श्यामोभवतिशृंगारइति।किंच।वनभुवःश्या
माइतिनायकासाहचर्य्यं।तमालद्रुमैर्मेघैर्नायकस्येति।तथाचोक्तं॥प्रेमप्रवृद्धउदित
ःकुसुमावलीभिःसख्युर्व्यधात्स्ववपुषांबुदआतपत्रमिति।किमुक्तंभवति।अत्रकाव्ये
शृंगारप्राधान्यात्तस्यमघाद्यास्त्रयोप्युद्दीपनविभावाः।राधाद्याश्चालंबनविभावाःभी
रुरित्यनुभावः।हर्षावेगशंकौत्सुक्यव्रीडाचपलतादयःव्यभिचारिणःउक्ताभवं
ति।एवंकारणकार्यसहकारिभिरितिस्थायिभावःसकलरसराट्सप्रपंचः।सयो
गाख्योभिलाषेर्ष्यासूयालक्षणोविप्रलंभाख्यश्चशृंगारःसांगोपांगःसमुन्मीलितो
भवति॥तदुक्तं॥कारणान्यथकार्याणिसहकारिणीयानिच।रत्यादेःस्थायिनोलोके

तानिचेन्नाट्यकाव्ययोः विभावानुभावास्तावत्कथ्यंते। व्यभिचारिणः व्यक्तः सतैर्विभा
वाद्यैः स्थायीभावो रसः स्मृतः। तथाचाभाणिभरतेन। विभावानुभाव्यैर्व्यभिचारियोगा
द्रसन्निष्पत्तिरिति। एवमेवकविना रसमुख्ये स्थिरीकृते तदाशयमबुध्वा कैश्चिन्नायक
स्य शिशुत्वं नायकाया प्रौढत्वं शृंगारविभावानां भयानकहेतुत्वं पितुश्च निदेश इति व्या
कृतं तदा कविनिरूपितस्य रसस्यान्यथात्वमुपपद्यते। तेन पूर्वव्याख्यानमेव समीची
नं। अथवा। निदेशो भाषणादेशसामीप्यार्थे वर्त्तते इति नंदनिदेशतः नंदसमीपातं
नंदनिदेशतः व्रजाद्वा। अथवा। उभयोः यत्र संगमो जातस्तदेवाह्लादकारी श्रीवृंदावनां
तरदेशविशेषस्तस्मोत्पन्नत्रयेऽपि कृष्णोक्तेरनुचलितयोरित्यर्थः। तत्र कातर्येण सोच्छ्वा

संसंबोधयति। हे राध इति। इमं मल्लक्षणं जनं अयं मल्लक्षणो जनो भीरुस्तव पार्श्वं त्य
क्तुमसमर्थः। इति अत्रानुकूलो नायकः। स्वाधीनपतिका नायका। तयोर्लक्षणं वक्ष्य
तेग्रे। पूर्वार्द्धे भिलाषलक्षणो विप्रलंभः। अपरार्द्धे संभोगश्च शृंगारः॥१॥ ॥कविरिदा
नीं सकलरसज्ञजनमनोहारिहरिचरितानुवर्णनेन समुचितेष्टदेवताभावितां
तःकरणः शृंगारोत्तरं प्रबंधं कर्त्तुं प्रतिजानीते॥ ॥वाग्देवतेत्यादि॥ ॥वाग्देवताच
रितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्त्ती। श्रीवासुदेवरतिकेलिक
थासमेतमेतं करोति जयदेवकविः प्रबंधः॥२॥ ॥जयदेवकविः जयः श्रीकृष्णस्तं द्यो
तयति महाभाग्यवतां तद्रस्योहपासने प्रवर्त्तकत्वेन प्रकाशयत्यसौ जयदेवस्तेन प्रका

शमानोवाश्रतएवकविःअथवाजयश्चासौदेवश्चजयदेवोभगवान्स्वयमेवास्मि
न्ग्रथेजयदेवव्यपदेशेनकविरित्यर्थःजयेनश्रीराधिकाविजयेनद्दिव्यतीतिजय
देवःसचासौकविश्चेतिवा।एवंगीतगोविंदाख्यप्रबंधप्रकर्षेण।बध्यतेऽस्मिन्श्रो
तृणांहृदयमितिप्रबंधस्तंकरोति।तत्रहेतुगर्भंविशिनष्टि।कीदृशंश्रीवरांगनारा
धनंश्रथवाश्रिञ्सेवायांकिबचीतिक्विप्।दीर्घोपसारणंच।।श्रयतएनांहृल्लोरा
सार्थरासार्थमितिश्रीःश्रीयतश्चनेनेतिवासाश्रीःराधैव।वस्तुहृद्दिव्यतीतिवसु
देवोनंदःउकंचाशेणेवसूनांप्रवरइत्यादि।वसुनिर्द्दिव्यतीतिवातस्यापत्यंवासु
देवःकृष्णःअनेनधनाद्यृतिनायकगुणःकथितःअथवावसनिवासेवसत्यस्मि ९

न्वृंदावनेश्रीराधांगणेवाशतिवासुः।श्रथंवा।धातूनामनेकार्थत्वात्वासयतिस
र्वमिदंस्वविलासपरिमलेनेतिवासुःअणादिकउणप्रत्ययः।स्वसौंदर्यादिगुणैःदि
व्यतीतिदेवःद्योतयतिसर्वमिदमितिवानिजकौशलेनसर्वान्विजयतेशतिवा।श्रथ
वाशृंगाररसेनरुचिमान्प्रियजनान्रोचयतीतिवा।स्वविलासेनप्रियजनान्मोद
यतीतिवातैःहर्षवानितिवादेवः।दिवुक्रीडाविजीगीषाव्यवहारद्युतिस्तुतिमोदम
दस्वप्नकांतिगतिषिति।विलासवान्सर्वातिशायीशृंगारवान्मोदमांश्चेत्यर्थः।वा
सुश्चासौदेवश्चवासुदेवः।तयोःश्रीवासुदेवयोःरतिकेलिकथाकथायासुरतक्रीडानु
वर्णनेनसमेतंयुक्तं।रतिरनुरागस्तेनकेलिषुयत्नागरयोःसंवादस्तत्समेतमितिवा

ननुतयोरत्यद्भुतानुरागिणोःश्रियादिनिर्ऊर्वितकर्याज्ञापज्ञानेकथमधिकारस्तत्राह॥
किंलक्षणःकविःवाक्वासौदेवताचेतिवाचांदेवताचेतिवा।वाग्देवतापरास्मरस्वतीत।
स्याश्चरितेनत्रसादमाधुर्यादिगुणसंपन्नलोकोत्तरकाव्यरचनाविशेषरूपेणाचित्रितं
चित्तरूपंसमन्वयस्यतादृशः॥अत्रविचित्रभगवद्गुणवर्णनेनविचित्रकवितारूपमहा
धननिधानत्वेनसमस्तभक्तजनविश्रामसुखाश्रयत्वेनचचित्तस्यगृहसाम्यं।अथवा॥
यतोवाचोनिवर्त्तंतेश्रुतेःतदगोचरत्वादयमर्थः।वाक्वर्त्मनीयाभगवद्गुणरूपा
वाणीसेवपरमपुरुषार्थत्वेनेष्टदेवतातस्याश्चरितेनाविर्भावेननित्यानंदरूपत्वातविचि
त्रंआश्चर्ययुक्तंततंचित्तमेवसमन्वयस्यतादृशः।वाक्परास्मरस्वतीतस्याःदेवतासर्वोत्त १०

मत्वेनसर्वोपास्यतयाश्रीराधाप्रियःतच्चरितेनविलासेनचित्रितमालेख्ययुक्तंकृतं
चित्तंसमन्वयस्येतिवा।अपरमपिगृहंविविधालेख्यैर्मंडितंभवतीतिध्वनितं।तथा
चास्यगृहमपिभगवतास्वाद्यादिनावेनपरमगोप्यमपिस्वहस्तलिखनेनचमंडि
तमितिभागवतैःप्रसिद्धंननुकथंतादृशंप्रसादाभाजनत्वमस्येत्यतआह।पुनःकी
दृशः।पद्मकरेयस्याःसापद्मावतीश्रादीनामितिदीर्घःसर्वसौभाग्यलक्षणान्वि
ताश्रीराधापद्मानगवद्वशीकरणकांतिःविद्यतेयस्याःसापद्मावतीवातस्याश्च
रणयोश्चारणेनपरिचर्ययाचक्रवर्त्तीसर्वाधिकः।तेनतादृशप्रसादपात्रत्वमित्य
र्थः।अथवाचरणयोर्विषयनृतयोरेवचारणचक्रवर्त्तीनर्त्तकश्रेष्ठः।नृत्यादिनासदा

तत्पदाराधनपरः॥अथवा।पद्मावतीतस्यपत्नीतस्याश्चरणयोयच्चारणंनर्त्तनंतेनच
क्रवतवर्त्तितुंशीलमस्यासौतादृशः॥एतेनतद्भक्त्याधिक्यंकवेःसूचितंयथाह।तद्योगयु
क्ताहिगणयंतिनलौकिकमिति।लौकिकश्चायमर्थः।चरणयोश्चरतिपरिचरतीतिचर
णचारणःपद्मावत्येवचरणचारणाचरणसेविकायस्यसचासौचक्रवर्त्तीमुख्यश्चसइ
तितस्यशृंगारित्वंकथितंतेनचसरसकाव्यकरणेऽधिकारः॥उक्तंच।शृंगारीचेतकवि
ःकाव्यंजातंरसमयंजगत्।सएवचदशृंगारी।सर्वंविरसतांव्रजेदिति।आलेख्याश्चर्य
योश्चित्रमित्यमरः॥चारणास्तुकुशीलवाइत्यपि।कविःकाव्यकरशूराविति विश्वः॥
२॥यदिति॥ ॥यदिहरिस्मरणेसरसंमनोयदिविलासकलासुकुतूहलं॥मधुरको

मलकांतपदावलिशृणुतदाजयदेवसरस्वती॥३॥ ॥हेसज्जनगण।यदिहरिस्मरणेकृष्णा
नुचिंतनेमनः॥अखिलभुवनयुवतिचित्तचौरेऽन्यविग्रहव्यावृत्त्याश्रीमत्कमनीयकिशो
रवज्रेंद्रनंदनेभक्तिरित्यर्थः॥उक्तंच।गोविंदएवनिखिलात्मनिरूढभावाःइति।किंच।भक्ति
रस्यभजनंतदिहामुत्रापाधिनैराश्येनैवामुष्मिनमनःकल्पनमेतदेवनैःकर्म्यमितितापिन्यां
।तत्रापिसरसंरसःशृंगारःतत्सहितंयदिचविलासकलासुविलासःस्त्रीणांभगवत्प्रेयसी
नांराधादीनांहावविशेषस्तत्संबंधिनीषुकलासुक्रीडासुकुतूहलंकौतुकं।तात्कालिको
विशेषस्तुविलासोंगक्रियादिष्विति।तदुक्तं।खेलतिबहुलंपादन्यासेविलोकितमन्यतः
।स्थिरमपिवदानांभोजंप्रयातिविधूननं।स्मितमपिमुदंधाव्यर्थं॥क्रोधोवृथैवचमत्कृ

तिर्दयितसविधंयांत्यास्तन्व्याः विलासरसोप्ययमिति। एतेन भगवत्परिजनेषु भक्तिरु
च्यते। कलास्याच्चंद्रकलायां कलास्याक्रीडनादिष्विति विश्वः। तदा जयदेवकवेः सरस्वतीं
वांणीं शृण्वाकर्णयेत्यर्थः। अथवा। हेदाऽददतीतिदाः बहुदानेन प्रेमातिशयवंतः। शृणु
त अत्यादरेणावधारयत। कलासु चतुःषष्टिरूपासु रतिकलासु। चतुःषष्टिश्चेत्थं। हसि
तं गीतं पठितं गणितं नृत्यं तथा षीणा। वेणुर्वाद्यं तालः पुस्तकवाचनमायुषो वेदः॥१॥ध
नुर्वेदश्च शिक्षा च राजशिक्षा च रत्नयोः। शिक्षा कल्पो व्याकरणं छंदो ज्योतिनिरुक्तिकं
॥२॥ परभाषा पुराणं च स्मृती रामायणं तथा॥ महाभारतमाख्यातं नराजलक्षणवेद
नं॥३॥ नियुद्धयुद्धोत्तरणं भूततंत्रप्रहेलिका॥ सर्पाशी विषसंरोधो भूमिदृष्टीष्टसाधनं॥ध

शकुनेंगितयोर्ज्ञानं तथा द्रव्यापकर्षणं॥ चिंतानिवर्त्तनं पुष्टिवर्त्तनं पिंडकर्षणं॥५॥ देश
भाषापरिज्ञानं शुभांगीकरणं तथा॥ विद्वेषोच्चाटनं च मणिवस्त्रादिमंडनं॥६॥ विकल्पो
च्चारकरणं विचित्रकरमर्द्दनं॥ लिखितं चित्रकविता राजनीतिस्तथा परा॥७॥ सभा
पांडित्यवक्तृत्वं दुर्गसेनारिवीक्षणं॥ अंगसंवाहनं चारुदर्शनं चोरलक्षणं॥८॥ प्रसादनं
तुरुष्टस्य स्त्रीचित्तहरणं तथेति॥ कीदृशीं जयदेवसरस्वतीं मधुरकोमलकांतपदावलीं
शृंगाररसप्राचुर्यान्मधुरा झटिति बोध्यत्वात कोमला सुकुमारा गेयत्वात्कांता कमनी
या मधुरा चासौ कोमला चासौ कांता च पदपरंपरा यस्यास्तादृशीमित्यर्थः। तत्र मधुरा॥
यथा मधुररसवद्वाचि वस्तुन्यपि रसस्थितिः। येन माद्यंति धीमंतो मधुनेव मधुव्रताः॥इ

दंडी।सुप्रयोगैर्महच्छब्दैर्युक्तमस्पृष्टसंधिभिः।सुकुमारार्थसंयुक्तंसुकुमारंप्रचक्षते
।इतिलीलारविदे।यन्मनःश्रोत्रविशंप्रह्लादजनकंभवेत्।शब्दबंधानुयोगेनतत्कांत
मितिकीर्त्तितं॥तथाचमधुरत्वंद्विविधं।शब्दाश्रितमर्थाश्रितंच।तत्रशब्दमधुरत्वंपृथ
क्पदत्वं।अर्थमधुरत्वंचोक्तिवैचित्र्यंकोमलत्वमपि।द्विविधं।बंधस्यापरुषत्वंशब्दको
मलत्वंअर्थकोमलत्वंच।परुषेपार्थेपरुषत्वंच।तद्यथा।मृतेयशःशेषइति।एवंकांत
त्वमपि।बंधविशेषादिनामनःश्रोत्रप्रीतिप्रदत्वशब्दाश्रितं।अर्थाश्रितं।दीप्तरसवत्वं च
।शृंगारादौरसेवीर्येगुणेरागेद्रवेरसइत्यमरः।एभिःपद्यैर्विषयप्रयोजनसंबंधाधि
कारिणोदर्शिताः।रहःकेलयोजयंतीतिविषयोदर्शितः।उक्तलक्षणवतोःश्रीराधामोह १३

नयोःउक्तलक्षणाभक्तिःप्रयोजनंप्रतिपाद्यप्रतिपादकभावलक्षणःसंबंधः।उक्तलक्ष
णः।एतद्रसभावितांतःकरणोऽधिकारी।एवंचत्वारोनिरूपिताः॥३॥ ॥इदानींग्रंथनि
र्दोषत्वायप्रामाण्यापादनायचकेनचिन्महाभागवतेनमहाकविसभायांवर्णितंपद्यं
संगृह्यते॥वाचइति॥ ॥वाचःपल्लवयत्युमापतिधरःसंदर्भशुद्धिंगिरां।जानीतेजय
देवएवशरणःश्लाघ्योदुरूहद्रुते॥शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनःस्पर्द्धी
कोपिनविश्रुतःश्रुतिधरोधाईकविक्ष्मापतिः॥४॥ ॥उमापतिधरनामाकविःलक्ष्म
णसेनामात्योवाचःपल्लवयति।विस्तारयति।व्यंगार्थशून्यंशब्दार्थंगुणशून्यंचास्यका
वित्वमितिध्वनितं।शरणःशरणनामाकविःदुरूहस्यविषमार्थकाव्यस्यशीघ्ररचने

श्लाघ्यःस्तुत्यःगूढार्थत्वादिदोषयुक्तंप्रसादादिगुणरहितंएतस्यापिकाव्यंवेति।तथाच।
शृंगाररसएवोत्तरःश्रेष्ठोयत्रशृंगारेणउत्तरंप्रधानंवायस्त्वमेयंतस्यस्वनैःकवितायां
ग्रंथनैराचार्यगोवर्द्धनस्पर्द्धीगोवर्द्धनाचार्येणसहस्पर्द्धावानकोपिनविश्रुतोनख्यातः॥
रसोत्तरप्रवेशेनमाधुर्यादिगुणसंपन्नपदरचनायांसोप्यशक्तेएवेतिभावः।इतरवि
धाध्यापनादिनानतुतत्कवितायामाचार्यत्वमितिसोपहासमुक्तमाचार्येतिधोईकवि
ह्मापतिःधोईकनामाकविराजःश्रुतिधरःश्रुतिःश्रवणंतन्मात्रादेवग्रंथादिग्राही
।नतुतस्यकवितायांकौशलमितिभावःह्मापतिपदेनाहंकारित्वंजाड्यंचेतिध्वनितं।
गिरांवचसांसंश्रुद्विगुणालंकारसंपन्नग्रथनविशेषंजयदेवएवजानीतेनान्यः।तथाच। १४

गिरांसंदर्भंश्रुद्विंजयदेवएवजानीते।नगवशुणावर्णनाकरत्वात्।तऊक्तंनागवते।
नतद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृणीतकर्हिचित्।तद्वायसंतीर्थमुशंतिमा
नसानयत्रहंसाविरमंत्युशिक्क्षयाः॥१॥तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रति
श्लोकमबद्धवत्यपि।नामान्यनंतस्ययशोंकितानियत्शृण्वंतिगायंतिगृणंतिसाधवः।
२इतिविशिष्टशब्दार्थवत्तयाचमहाकाव्यत्वंदर्शितं।वैशिष्ट्यंविषयनिर्दोषवत्त्वेगुणव
त्त्वालंकारयोगित्वेसतिरसवत्त्वं।तऊक्तं।निर्दोषंगुणवत्काव्यमलंकारैरलंकृतं।रसा
न्वितंकविःकुर्वन्कीर्तिंप्रीतिंचविंदतीति।पद्यत्रयःकिशलयेपिगेविटपेविस्तरेचल
शतिविश्वःलघुक्षिप्रमरंद्रुतमित्यमरेः।उत्तरंप्रतिवाक्येस्यादूर्द्वादीच्योत्तमेऽन्यवदितिच॥ब॥

ननुपूर्वमुक्तंराधामाधवयोःरहःकेलयःजयंतितेनपारकीयत्वेनअस्वर्ग्यमयशस्यं
चफल्गुकृच्छ्रंभयावहंजुगुप्सितंचसर्वत्रह्यौपपत्यंकुलस्त्रियइतिभयादितिक्रांतत्वा
त्तुछत्वाच्चकथंरसनिःष्पत्तिःकथंवाजंयंतीत्यक्तं।तदेवनिरतिशयात्यद्भुतशक्तिमत्वं
निरूपणं।नसर्वनियामकतयात्यद्भुतैश्वर्येणानियम्यगोपकिशोराखिलचिन्मयरसा
स्वादलीलामयमूर्त्तेरवतारगुणैर्नायकश्रेष्ठत्वापादनेनसर्वविघ्ननिवृत्तयेनमस्कृ
यामंगलमप्याचरन्नित्यानंदरूपतांचापादयन्उक्तदोषंपरिहरति।प्रलयेत्यादि
ना।उक्तंचास्मिन्नेवार्थेराज्ञापृष्टेनशुकेनापि।गोपीनांतत्पतीनांचसर्वेषामपिदेहिनां
।योंतश्चरतिसोध्यक्षएषःक्रीडनदेहभाक्।अनुग्रहायभक्तानांमानुषंदेहमाश्रितः॥ १५

भजतेतादृशीःक्रीडायाःश्रुत्वातत्परोभवेत्।इति।तासामहात्म्यमपिभगवतैवोक्तं
तत्रैव।एवंमदर्थोज्झितलोकवेदस्वानांहिवोमय्यनुवृत्तयेबलाः।मयापरोक्षंभजता
तिरोहितंमासूयितुंमार्हथतत्प्रियंप्रियाः।१।नपारयेहंनिरवद्यसंयुजांस्वसाधुकृत्यं
विबुधायुषापिवः।यामाभजन्दुर्जरगेहशृंखलांसंवृश्च्यतद्वःप्रतियातुसाधुनेति।ए
तदुक्तंभवति।नायकोयंपुरुषोत्तमःतास्तुनित्यानंदरसैकमूर्त्तयः।अतोनिःसीमरसा
स्पदत्वंसर्वोत्कृष्टत्वमितिसुसिद्धमितिसिद्धांतः।अस्वर्ग्यमितियदुक्तंभगवतातत्तु
प्राकृतविषयंरसनिःष्पत्तैववक्रोक्त्यातद्भावपरीक्षार्थमेवेति॥ ॥गीतस्यास्यमाल
वरागोरूपकतालः।तयोर्लक्षणं।नितंबिनीचुंबतिवक्त्रपद्मःशुकद्युतिःकुंडलवान्प्र

मन्त्रः॥संगीतशालांप्रविशत्स्वदोषेमालाधरोमालवरागराजइति।रूपकेस्यातद्युतं।
लघुरिति।प्रलयपयोधिजलइति॥ ॥प्रलयपयोधिजलेधृतवानसिवेदंविहितवहि
त्रचरित्रमखेदं।केशवधृतमीनशरीरजयजगदीशहरे॥१॥ ॥गीतार्थस्तु।हेकेशव
जय।कोब्रह्मादीशश्चरुद्रस्तौवशयतीतितादृशा।नक्तसुखकारितयासर्वोत्कर्षेणव
र्त्तस्व।ननुममनक्तसुखसंपादनेऽतःसामर्थ्यमित्यतआह।जगदीशेति।जगतांचतु
र्दशभुवनानामीशनियंतरितथाचचतुर्दशभुवननाथस्यतेतत्रकथंनसामर्थ्यमिति
भावः।तत्रहेत्वंतरमप्याह।हेहरेहरतिनक्तानांक्लेशमितिहरिःतदेवब्रह्मत्यकरणे
नापिनक्तकार्यपरत्वंनगवतःदर्शयतिधृतमीनशरीरेत्यादिना।कीदृशाधृतमीनश १६

शरीरधृतंपरिगृहीतंस्वेच्छयाविःकृतंमीनस्यमत्स्यस्यशरीरंयेनतादृशाएतद्ध्रुव
पदंप्रतिपदमनुवर्त्तमानत्वात्।तदुक्तंउद्ग्राहःप्रथमोनागस्ततोमेलापकःस्मृतः।ध्रुव
त्वाच्चध्रुवःपश्चादाभोगश्चांतिमोमतःइतिचतुर्भिरवयवैःप्रबंधोभवतीति।यद्यपिक
चितमीनशरीरइति।क्वचिद्धृतकछपरूपेत्यादिनिन्नंनिन्नमेवपदमस्तितथापिज
यजगदीशहरेइत्यस्यप्रतिपदमनुवर्त्तमानत्वात्।ध्रुवत्वं।ननुकिमितिमीनादिश
रीरंमयापरिगृहीतमित्यतआह।त्वंप्रलयपयोधिजलेप्रलयकालीनाःपरस्परंमि
लिताःयेयोधयःसमुद्राःतेषांजलेवेदंनिमज्जंतंमीनशरीरमुपादायधृतवानसि
कथंयथास्यात्विहितंवहित्रंचरित्रंयथास्यात्तथा।विहितंकृतंवहित्रस्यपोतस्य

चरित्रंयथास्यात्तथाऽपुनःकथंयथास्यात्।अखेदंखेदरहितंयथास्यात्तथा।परमानंदविधानत्वात्।अथवावेदंज्ञानंधृतवानसि।सत्यव्रतार्पितवानसीत्यर्थः।अतोनक्तानुरागेणागणितखेदत्वादखेदमित्यक्तं।अत्रपयोधिपदेनवज्रलवत्वेनासेपुनर्जलपदेपादानमंतर्द्वीपादिरहितत्वेनविश्रामस्थानावंसूचयितुं।तथाचनिरालंबेपिपयोधौवेदंधृतवानसीतिवेदधारणार्थमेवतेशरीरपरिग्रहइतिभक्तकार्यपरत्वंदर्शितंहृष्टरोमाऽश्वोमश्मोमीनोवैसारणोंऽजइत्यमरः।क्षितिरित्यादि॥ ॥क्षितिरतिविपुलतरेतवतिष्ठतिष्टेधरणिधरणकिणचक्रगरिष्टेकेशवधृतकछपरूपजयजगदीशहरे॥३॥हेकेशवधृतकछपरूपाधृतंकछपस्यरूपंयेनतादृशजयाकूर्मावतारेपिहेतुमाहातवपृष्टे १७

क्षितीष्टथ्वीतिष्टति।तिष्टतीतिवर्त्तमानकालनिर्देशेनाधुनापितिष्टतीतिप्रसिद्धमेवेतिभावः।नतुपंचाशत्कोटिर्येजनविस्तृतामम्पृष्टेकथंस्थितेत्यतआहअतिविपुलतरइति।अतिशयेनपृथिव्यापेक्षयाप्यधिकविस्तीर्णेपुनःकीदृशे।धरणिधरणकिणचक्रगरिष्टेधरण्याःपृथिव्याःधारणेनयत्किणचक्रंचक्राकृतिरुधिरमंडलंतेनगरिष्टेगौरवयुक्तेतछोणितग्रंथिरूपंचक्रंयस्मिन्नातादृशइतिवा।कूर्मेकमठकछपाविच्यमरः।व्रणचिक्केघुणकिणेइतिहारावलीतथाचनक्तंहृत्येष्टथिव्यादिधारणकर्मणानगवतःनारदनमप्ययुक्तमितिभावः॥ ॥वसतीत्यादि॥ ॥वसतिदशनशिखरेधरणीतवलग्नाशशिनिकलंकलेवनिमग्नाकेशवधृत

शूकररूपजयजगदीशहरे॥३॥ ॥हेकेशवधृतशूकररूप।धृतंशूकरस्यरूपं
येनतादृश।जयवाराहावतारपरिग्रहप्रयोजनमाह।तवदशनशिखरेदंताग्रे
लग्नासं।श्लेष्टाधरणीलोकधारणकर्त्र्यपिपृथ्वीवसति।कुत्रकेशव।शशिनिचंद्रे
निमग्नालग्नाकलंककलेव।लांछनलेशइव।अत्रनिमग्नेतिपदोपादानेनबालचं
द्रस्यसादृश्यंदशनेप्राप्यते।तत्रकलंकलेशस्यनिमग्नत्वात्पूर्णचंद्रेतस्यस्पष्टत्वा
त्।अतोबालचंद्रस्यदीर्घतयासादृश्यमपिसंगछते।मग्नेतिपदवैयर्थ्यमपिनकिं
चदंतश्लिष्टायास्तस्याःपोषणमप्युयुक्तमितिभावः।रदनादशनादंतारदाइत्यम
रः।अग्नंशिषरमित्याहुरद्रिशृंगेचतन्मतमितिधरणिः।कलास्यान्मूलकेवृद्धौशि

ल्पादावंशमात्रके।षोडशांशेचचंद्रस्यकलनाकालयोःकलेतिविश्वः॥ ॥तवकरे
त्यादि॥ ॥तवकरकमलवरेनखमद्भुतशृंगं।दलितहिरण्यकशिपुतनुभृंगं।केश
वधृतनरहरिरूपजयजगदीशहरे॥४॥ ॥हेकेशवधृतनरहरिरूप।धृतंनरहरेः
नरसिंहस्यरूपंयेनतादृश।जय।नृसिंहावतारप्रयोजनमाह।तवकरकमलवरेक
रोहस्तःसएवकमलवरःपद्मश्रेष्टःतत्रनखंतिष्टतिकीदृशं।अद्भुतंआश्चर्यभूतंशृंग
मग्रभागोयस्यतादृशं।अद्भुतत्वमेवाह।दलितोविदारितोहिरण्यकशिपोर्दैत्यस्यत
नुर्देहःसएवभृंगोभ्रमरोयेनतादृशं।भृंगोहिपद्मदलविदलनार्थंप्रवर्त्ततेविदल
यतिचतत्अनेनपुनर्दलरूपनखेनभृंगएवविदारितइत्यद्भुतत्वं।तथा।बृहतो

पिहिरण्यकशिपुकायस्यनृगत्वनिरूपणेनश्रीनृसिंहकरांबुजापेक्षयातिशुद्धमत्वंध्व
नितं।नक्रत्वहोहिरण्यकशिपोर्वित्रासायात्रवसिंहवपुराविःकरणमितिभावःयमानि
लेंद्रचंद्रार्कविस्रुसिंहांबुवाजिषुश्रुक्राहिकपिनेकेषुहरिर्नकपिलेत्रिषित्यमरः।शृंगं
प्रभुत्वेशिखरेचिह्नेक्रीडांबुयंत्रके।विषाणोत्कर्षयोश्चाग्रेशृंगंस्याद्भूर्वशीर्षकेऽतिवि
श्वःपुनर्नवःकररुहोनखरानखमस्त्रियामित्यमरः।तनुःकायेत्रनोचाल्पेविरलेचा
पिवाच्यवदितिवद्विरेफःपुष्पलिङ्गषट्पदभ्रमरालयश्त्यमरः॥५॥छलयसीत्यादि
॥छलयसिविक्रमणेबलिमद्भुतवामन॥पदनखनीरजनितजनपावनकेशवधृतवा
मनरूपजयजगदीशहरे॥५॥ ॥हेकेशवधृतवामनरूपधृतंवामनस्यखर्वस्यरूपं

येनतादृशजय।वामनावतारत्वयोजनमाह।हेअद्भुतवामन।आश्चर्यरूपवामन॥
विक्रमणेपदाक्रमणनिमित्तमुपादायबलिंदैत्यराजंछलयसिवंचयसि।भगवान्
पेंद्रोवामनरूपंधृत्वाबलेःसकाशात्पदत्रयपरिमितांभूमिंप्रार्थ्यपश्चात्तद्रूपंत्र
कटीकृत्यचतुर्दशभुवनैरपिपदत्रयापूरणेतंबलिंगृहीत्वात्रिलोकींमिंशायादादि
तिपुराणप्रसिद्धरद्भुतत्वंसर्वात्मनोभगवतोनक्तपरवशत्वेनछद्मनापिनक्तका
र्यसाधनमितिचाद्भुतवामनेत्फक्कंवस्तुतस्तुतवशोभूत्वाशरपालोबभूवत्यद्भुतत्वं
ध्वनितं।अन्यच्चाद्भुतत्वंदर्शयति।पदनखसंबंधियन्नीरंगंगाजलंतेनजनितमुत्पादि
तंजनानांपावनंपावित्र्यंयेनतादृशं।अत्रापित्रवर्धमानस्यभगवतस्त्रिविक्रमस्यचर

णांगुष्ठनखाग्रेणविदीर्णेब्रह्मांडस्यप्रथमेपार्थिवावरणेतेनैववर्त्मनातच्चरणारविं
दप्रख्यालयदेवागतंयद्वितीयावरणजलंब्रह्मदत्तार्घजलेनैकीभूतंक्रमेणमर्त्यलो
कंप्राप्तंगंगेतिलोकान्पावयतिपुराणप्रसिद्धेः तथाचभूर्लोकस्थितेनातिवृद्धेनवाम
नेनब्रह्मांडजलस्यात्रानयनादाश्चर्यंछद्मवतःचरणनखस्पष्टजलेनापिसेशलोक
पावनत्वमित्यद्भुतमिहमयोगेनात्याश्चर्यमित्यपिध्वनितंकिंचछलयसीतिभूतेप्य
द्यापिबलिसमीपेवर्त्तमानत्वात्।वर्त्तमानप्रयोगःपावनइतिनायकगुणश्चकथि
तः।अर्णोंभस्तोयपानीरक्षीरांबुसंवरमित्यमरः।बलिश्चामरदंडेस्याज्जरयाश्चथव
र्मणिउदारावयवेद्रव्येकरेपूजोपहारयोः॥गृहदारुविशेषेचगंधकेचकचिन्नतमिति

विश्वः॥ब॥ ॥क्षत्रियरुधिरमयेजगदपगतपापंस्नपयसिपयसिशमितभवतापं।केशव
धृतभृगुपतिरूपजयजगदीशहरे॥६॥ ॥हेकेशवधृतभृगुपतिरूप।धृतंभृगुपतेःपरशुरा
मस्यरूपंयेनतादृश।जय।तत्प्रयोजनमाह।क्षत्रियाणांयद्रुधिरंतन्मयेतद्विकारेपय
सिकुरुक्षेत्राख्यतीर्थजलेजगत्प्राणिजातंअपगतपापंनष्टकलुषंयथास्यादेवंस्नप
यसिस्नानंकारयसि।यदवधिपरशुरामेणैकविंशतिवारानक्षत्रियानहत्वातद्रुधिरै
ःकुरुक्षेत्रेपंचह्रदान्विधायतर्पणकृतंतदवधिपरशुपरामस्यरूपंतन्महातीर्थंजा
तमितिपुराणप्रसिद्धेः।कीदृशंजगतेशमितभवतापंशमितानाशितोभवस्यसंसा
रस्यतापःसंतापोयस्यतादृशःप्राणिनांपापसंबंधादेवेसंतापस्तीर्थस्नानेनतुसर्वपा

पनाशेसंतापनाशइतिवावःजलेमज्जतःसंतप्तस्यतापनाशउचितएवेतिध्वनितंरु
धिरेंगारकेप्रोक्तेरुधिरंकुंकुमास्रजारितिविश्वः।नवःसंसारसंतप्तिश्रेयः।शोकरज
न्मसुइतिचाअनेनापिधर्मरक्षणायतद्विरोधिक्षत्रकुलसंहरणंनक्तंकार्यदर्शितं॥
तथाचरुधिरमयजलेमज्जतांसाधनकोटिसंसाध्यसंसारध्वंसलक्षणपावनत्वापा
दनेनाद्भुतपावनत्वंवीर्यंचकथितमितिनावगाढ॥ ॥वितरसीत्यादि॥ ॥वितरसि
दिक्षुरणेदिक्पतिकमनीयंदशमुखमौलिबलिंरमणीयंकेशवधृतरघुपतिरूप
जयजगदीशहरे॥७॥ ॥हेकेशवधृतरघुपतिरूपधृतंरघुपतेःश्रीरामचंद्रस्यरूपं
येनतादृशजयश्रीरामावतारक्षत्रमारणसंग्रामेदिक्षुदशदिशासुदिक्पतेनैव २१

दशसंख्योपस्थितिर्ज्योतिषिदशमुखस्यरावणस्ययेमौलयोमस्तकास्तान्येवबलिं
उपहारंवितरसिददासि।कीदृशं।दिक्पतिकमनीयं।दिशांपतयस्तेषांकमनीयंश्र
नीष्टंतत्रहेतुःरमणीयंरावणवधद्वारालोकान्निरामत्वात्।प्रत्येकंविभागकथना
यदशमुखपदोपादानं।किरीटमूर्धचूडासुमौलिःकेशवसंज्ञते।अत्रापिलोकपा
लानांस्वनक्तानांकार्यपरत्वंतैरपिसेव्यमितिवाद्भुतवीर्यकौशलंचदर्शितं।प्रत्येकं
तन्मौल्यर्पणात्॥७॥ ॥वहसीत्यादि॥ ॥वहसिवपुषिविशदेवसनंजलदाभं॥हलद्
तिभीतिमिलितयमुनाभं।केशवधृतहलधररूपजयजगदीशहरे॥८॥ ॥हेकेश
वधृतहलधररूपधृतंहलधरस्यरूपंबलभद्रस्यरूपंयेनतादृशत्वंजय।तत्रीलामा

हातद्वीलामाह।त्वंविशदेउज्वलेवपुषिदेहेजलदाभंजलमेघनीलंवसनंवस्त्रंवहसि
धारयसी।कीदृशं।हलहतिभीतिमिलितयमुनाभंहलेनहतिर्हननंतद्भीत्यातद्भये
नमिलितायायमुनातस्याइवआभादीप्तिर्यस्यतादृशं।इतिभयंचमलयानिलवशात्कंप
मानस्यवस्त्रस्यभययुक्तयमुनयाउत्प्रेक्षागर्भोपमा।भीरूणांहिकंपउचितएवेतिभा
वः।कदाचिद्वृंदावनेवारुणींपीत्वागोपीतिःसहविहरताबलभद्रेणजलक्रीडार्थमा
हूतामत्तप्रलापोयमितिमत्वागर्वेणांतिकमनागच्छंतीकालींदीरोषतोहलाग्रेणाकृ
ष्टेतिपुराणप्रसिद्धेःअस्मिन्नस्यवतारेताभिःप्रेयसीभिःरममाणस्यतत्सुखार्थंयमु
नाकर्षणादिलीलाविःकरणात्तत्परत्वमिति।किंच।हलधरपदेनदुष्टनिग्रहार्थमे

वहलंधृतवानितिभक्तकार्यपरत्वमवतारप्रयोजनंध्वनितं।गात्रंवपुःसंहननंश
रीरंचकलेवरमित्यमरः।शुक्लशुभ्रशुचिश्वेतविशतश्वेतपांडुराइतिच।वस्त्रमाछा
दनंवासश्चैलंवसनमस्त्रियामितिच।भीतिःसाध्वसकंपयोरितिविश्वः॥७॥ ॥निंदसी
ति॥ ॥निंदसियज्ञविधेरहहश्रुतिजातंसदयहृदयदर्शितपशुघातंकेशवधृतबुध
शरीरजयजगदीशहरे॥९॥ ॥हेकेशवधृतबुद्धशरीरधृतंबुद्धस्यशरीरंयेन।तादृश।
त्वंजय।ननुवेदनिंकेदस्यकथंस्तुतिरित्यतआह।यज्ञविधेःश्रुतिजातंक्रतुविधानसं
बंधिवेदवाक्यसमूहंनिंदसि।नतुसर्वमित्यर्थः।सोपिकिमितिनिद्यतेइत्यतआह॥
अहहकष्टंदर्शितोबोधितःपशूनांघातोयेनतादृशं।वेदोपिपशूनांघातंबोधयतीत्यत

प्रवर्त्तपश्चात्
वर

रागवशान्निरकुशान्दृष्ट्वाऽमोघामायपशुमारणनैतत्सादृश्यविधिवाक्यःस्वर्गादिफलजनकदर्शनस्य

आहाकष्टमित्येवंनिंदयसीतिनावःएतादृशनिंदायामपिहेतुमाहासदयहृदये
तिदयाकृपातस्महितंहृदयंयस्यतादृशाअयंनावःपुरस्कारेणगुडजिह्विकयावैदि
कयावैदिकमार्गेस्वर्गादिफलजनकंनिरपराधिबकुप्राणिवधसाध्ययागादिकयु
क्तिविरोधित्वान्नतेषामत्यंत हितमितिविचार्यपरमपुरुषार्थसाधनेतिदृत्तिमा
र्गेतानप्रवर्त्तयितुंनहिस्यात्सर्वभूतानिश्त्यादिनायज्ञादिकबोधकवेदस्यविदांक
रोषिनतुसर्वथावेदनिंदायोमेवतवतात्पर्यमतएवगूढंतवैततत्तात्पर्यमज्ञात्वाऽ
रात्मनावैदिकमार्गेआविश्वासश्तितेषांमोहनायेवतवैतदवतारपरिग्रहश्तिस
जनार्थतद्विरोधिनाश्रेयसिवंचनरूपमवतारप्रयोजनमप्यक्रमिति॥ब॥ ॥म्लेछ

२३

अहहेत्यद्भुतेवा।अहहेत्यद्भुतेखेदेघिशतिविश्वः।वेदेश्रवसिचश्रुतिरित्यमरः।जातंजात्योघजन्मघि
तिविश्वः॥ उ१

निवहेति॥ ॥म्लेछनिवहनिधनेकलयसिकरवालंधूमकेतुमिवकिमपिकरालंके
शावधृतकल्किशरीरजयजगदीशहरे॥१०॥ ॥हेकेशावधृतकल्किशरीरधृतंक
ल्किनःशरीरेयेनतादृशंत्वंजयातच्चेष्टितमाहात्वंम्लेछनिवहनिधनेम्लेछानांनिव
हाःसमूहास्तेषांनिधनेनाशनिमित्तंकरवालंखड्गंकलयसिधारयसि।कीदृशं॥किं
मपिकरालंअतिशयेननयंकरं।कमिवधूमकेतुमिव।औत्पातिकग्रहविशेषमिव
।रणेउदितंतत्करवालंपश्यतांम्लेछानांनाशोनवतीतिकरवालस्यधूमकेतुसाम्यं
।धूमकेतौउत्पातिकग्रहविशेषेप्युदितेतंपश्यतांप्राणिनांविपदोनवंतीतिनावः
।यद्वाधूमःकेतुश्चिह्नंयस्यसधूमकेतुर्वह्निस्तमिव।अत्रखड्गस्यनीलत्वाद्धूमसाम्यं

मुष्टेश्चसुवर्णमयत्वादग्निसाम्यं।म्लेछःपापरतौजातिभेदेस्यादपभाषणेइतिविश्वः।स
मूहनिवहव्यूहसंदोहविसरव्रजाइत्यमरः।निधनंस्याकुलेनाशइतिविश्वः।खड्गेतुनि
स्त्रिंशचंद्रहासासिरिष्टयः।कौक्षेयकोमंडलाग्रःकरवालःकृपाणवदित्यमरः।धूमके
तुःस्मृतोवह्नोवुत्पातग्रहभेदयोरितिविश्वः।करालोभीषणेन्यवदितिवा।धृतवानसि
त्यादिभिर्वर्त्तमानप्रयोगैरवताराणांभगवतश्चलीलायाःनित्यत्वंदर्शितं।एवंतत्तद
वतारगुणैःस्तुतिंकृत्वासंप्रत्यवतारिणंस्तुवन्प्रार्थयते॥७॥ ॥श्रीजयदेवकवेरिद
मुदितमुदारंशृणुसुखदंशुभदंभवसारं।केशवधृतदशविधरूपजयजगदीशहरे।
११॥हेकेशव।धृतानिदशविधानिरूपाणियेन।तादृशत्वंजय।केअखंडानंदसुखेशेते

इतिकेशवः।तादृशस्यापिदशविधमत्स्यादिरूपाण्यंगीकृत्वापितादृशैःकृत्यैरपिस्व
भक्तकार्यसाधनेनतादृशमहिम्नउद्घोषेणतवभजनेममममहतीरुचिर्जाता।अतो
भक्तसुखसंपादनेनजयममवेदमिति।इदंजयदेवकवेःउदितंभाषितंशृणु।कीदृ
शं।सुखदंश्रोत्रमनःसंतोषप्रदं।पुनःकीदृशं।शुभदंमंगलंप्रदं।तत्रहेतुः।भवसारं
।जन्मरहस्यंवर्णनीयत्वेनयत्रतादृशं।अथवाउदारंमहत्।इतिपदार्थार्पकमितिवा
॥ श्रीकृष्णकीर्त्तनत्वात्तत्प्रियजनकथान्वितत्वाच्चैतानिविशेषणानिउक्तं॥भा
षितउदितमिति।सरोबलेमज्जनिचस्थिराशेनाप्येवनीरेचधनेच।सारेवरेऽन्यत्सा
रंमुदीरयंतिइतिविश्वः।अंशावतारान्स्तुत्वासंप्रतिवर्णनीयंपूर्णतममखिलना

अथवाभवेसारंश्रेष्ठं।परमपुरुषार्थसाधनत्वेनजन्मसाफल्यकरत्वात्।अतएवउदारं।परमार्थप्रदं।

यकञ्चिरोरत्नंश्रीकृष्णाख्यमेवेति॥ ॥वेदानुद्धरतेजगन्निवहतेभूगोलमुद्बिभ्रतेदैत्यं
दारयतेबलिंछलयतेक्षत्रक्षयंकुर्वते॥पौलस्त्यंजयतेहलिंकलयतेकारुण्यमातन्वते
म्लेछान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यंनमः॥५॥ ॥कृषिर्भूवाचकःशब्दोनश्चनि
र्वृतिवाचकःतयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयते।सर्वाश्रयःअखिलपरिपूर्णम।
दाशक्तिमांश्चकृष्णशतिस्वानन्यमाधर्येणप्रियजनाकर्षणाच्चकृष्णशतितद्रूपाच्चेति
कृष्णस्तुतिरवधिपरमानंदघनरूपस्वप्रियजनैरममाणायश्यामसुंदरायशृंगारर
ससर्वस्वमूर्त्तयेतुभ्यंनमःतथाचश्रुतिः।अक्षरात्परतःपरशतियरास्यशक्तिर्विवि
धैवश्रूयते।स्वाभाविकीज्ञानक्रियावेति।अक्षरादपिचोत्तमशतिर्भगवद्गीतायां।नराक्ष २५

तिपरंब्रह्मसच्चिदानंदविग्रहशति।आमंदमयरसशतिर्नावितानिस्तानिर्यएषनिज
रूपतयाकलानिःशेषेणकएवनिवसतिखिलात्मभूतोगोविंदमादिपुरुषंतमहंभज
जामीतिचब्रह्मसंहितायांवक्ष्यतिचाशृंगारःसखिमूर्त्तिमानिवमधौमुग्धोहरिःक्री
डतीतिउक्तंचशुकेनापिसाक्षान्मन्मथशति।ननुमीनाद्यवतारवानीश्वरःकेशवःके
शलेशेतेदृषोदरादीनियथोपरिष्टानियथास्थितान्येवस्युःशतिकेशवः।आदिनारा
यणः।उक्तंचाएतन्नानावताराणांनिधानंबीजमव्ययमिति।तस्यस्तुतिरतैचेदानीं
गोपकिशोरंवनविहारिणंमांकिंस्तौषीत्यतआह।दशाकृतिकृतेतुभ्यमिति।मीनादि
दशरूपधारिणेतुभ्यमेवनमःआयमर्थःतन्नदशाकृतिरवानीश्वरोनारायणस्तवैवां।

शस्तदुक्तं ब्रह्मणा। नारायणोंगमिति श्रीभागवते। अक्रूराय वैकुंठदर्शने च नटो नाद्य
मिवेति शुकोक्तिश्च। एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति। प्रथमस्कंधेऽव
तारनिर्णये। ब्रह्मसंहितायां। विष्णुर्महान्स ईहयस्य कलाविशेष इति। अतो परमेश्व
रत्वात्तत्वामेव स्तौमीति इत्थं निश्चित्य उक्तावतारकर्मभिः संक्षेपेण पुनराह। किंलक्ष
णायां। मीनरूपेण वेदोद्धारं कृतवते। पुनः कीदृशाय। जगंति भुवनानि कच्छपरूपे
ण वहते धारयते। भूगोलं पृथ्वीमंडलं वाराहरूपेण उद्बिभ्रते ऊर्द्ध्वं प्रापयते दैत्यं हिर
ण्यकशिपुं दारयते। नृसिंहरूपेण विदारयते। बलिं दैत्यं वामनरूपेण छलयते। वंच
यते क्षत्रक्षयं दुष्टानां। क्षत्रियाणां परशुरामरूपेण कुर्वते पौलस्त्यं रावणश्रीरामरूपे

ण जयते। हलं दुष्टनिग्रहाय आयुधत्वेन कलयते बलभद्ररूपेण धारयते। कारुण्यं
कृपां आतन्वते। बुद्धरूपेण विस्तारयते। म्लेच्छान्कल्किरूपेण मूर्छयते। नाशयते इत्य
र्थः। एवं तत्तदवतारकर्मकर्तृत्वेन भगवतः पूर्णत्वं अखिलशक्तिमत्त्वं च प्रतिपादितं। आ
कृतिः कथिता रूपे सामान्यवपुषोरपीति विश्वः। एवं तावत्तत्तदवतारचरितैस्तान्तान्
नायकगुणान्तु वर्ण्येदानीं समस्तनायकचूडामणेः पुरुषोत्तमस्य प्रथमपद्ये रहः के
लय इत्यनेन संक्षेपतः क्रीडां सूचयित्वा संप्रति सख्युक्त्या स्वाधीनभर्तृकावर्णनेन भ
गवतस्तस्य लोकोत्तरधीरललितशृंगारित्वादिगुणान्वर्णयन्नेव मंगलांतरमप्याच
रति। श्रुतेत्यादिना। किंच। सर्वपूर्णशक्तिमत्त्वेप्यत्रानंदविलासरसमय्याः शक्तेरेवोद्रि

क्तवमन्यत्रान्यासांकचिदत्रापितत्योषणायतासामप्यूह्यं।तत्रैवंक्रमः।धीरोद्धतावा
मनपरशुरामादयः।तत्त्रज्ञणं।माऋार्यदर्पनृयिष्ठश्चण्डंकारवान्बली।चंडोविक
त्थमानश्चधीरोद्धतउदाहृतः।तद्गुणाश्चायशस्वितादक्षतासाधार्मिकत्वंचेति।धीरोदा
त्तः।तत्त्रज्ञणं।क्षमावानतिगंभीरोविनीतश्चविकत्थनः।धीरोदात्तंसविज्ञेयोरामोद
शरथिर्यथा।शांतोविनीतोधीरश्चेति।धीरशांतमीनबुद्धिदिः।विदग्धोनवतारुण्य
ःपरिहासविशारदः।निश्चिंतोधीरललितस्यान्न्यायःप्रेयसीवशः।शृंगारीनायकस्त
न्यःपंचमःकथ्यतेथवा।विलासवान्वामशीलःसुभगःस्थिरवाक्युवा।गतिःसधैर्य
दृष्टिःसाविलासास्मितंवचः।इतिसंगीतराजे।इत्यादिवर्ण्यनीयगुणवान्नायकः २७

श्रीराधाप्रियःतज्जीतेनवर्ण्यतिगीतस्यास्यगुर्जरीरागः।मंठश्चतालः।तयोर्लज्ञणं
।इषामासुकेशीमलयद्रुमाणंमृदुब्रह्मसत्यव्रतल्पजाता।ऋतेःस्वराणांदधतीविना
गंतंत्रीमुखादक्षिणगुर्जरीयमितिगुरुर्लघुद्वयंयत्रशृंगतालःसकथ्यते।मंडलो
मंठकोद्वेपोरसेचाद्भुतसंज्ञके।अद्भुतकेलिपटनादद्भुतत्व॥ ॥श्रितेति॥ ॥श्रित
कमलाकुचमंडलधृतकुंडलदे।कलितललितवनमालजयजयदेवहरे॥ ॥ध्रुव
पदं॥ ॥गीतार्थस्तु।हेदेवादीव्यतीतिदेवःतस्यसंबोधनं।श्रीराधयासहविलासासक्ते
तिवा।हरेसौंदर्यादिनाऽखिलभुवनयुवतीचित्तचौरजयजयाश्लादरेद्विरुक्तिःश्रद्
चध्रुवपदंअन्यपदानि।श्रितमाश्रितंकमलायाःकामयतःश्रीतिकमकांतौपचादितो

दच्। तं लातिगृह्णातिस्वगुणैर्वशीकरोतीतिसाकमला। लाआदनेइति। यद्वा। कमला
श्रीवरस्त्रियोरितिविश्वकोषात्वरस्त्रीतेनापिकमलाश्रीराधैवतस्याःकुवमंडलंस्त
नरूपमेवदुर्गंकामभयादिवपेनतादृशः। अनेनसकलानायिकामुकुटमणेगुणाधि
क्यंकथितं। तथाचानेनकेलिकौशलेनरतिकौशलरूपोनायकगुणश्चोक्तः। स्वाधी
नभर्तृकानायिकाचेयंतल्लक्षणंवक्ष्यतेऽग्रे। धृतकुंडल। धृतेमकराकृतिकुंडलेक
र्णाभरणेयेनतादृश। अथवा। तदाज्ञयाश्रीधृतेतस्याएवश्रुत्योःकर्णाभरणेयेन
अथवापुष्पादिनातत्कर्णभूषणार्थंनिर्मायोपहारीकृतेकुंडलेयेनतादृशएतद्विशे
षेणद्वयेनभव्यत्वमुक्तं। वनमंभसिकाननेइत्यभिधानात्पद्ममालावाप्रियायाःकं

ठेयेनतादृश। अथवाकलिताऽवगाहिताप्रियामंडनार्थंवनमालाचंपकादिव
नश्रेणीयेनतादृश। अथवाकलिताधृताललितामनोहराप्रियायाःमंडनस्पर्शोत्थ
सात्विकविकारेणवनमालास्वेदजलबिंदुसंततिर्येनतादृश। उक्तंचवैष्णवे। गोपी
कपोलसंश्लेषमभिपत्यहरेर्भुजौ। रोमोद्गमसबाष्पायस्वेदांबुघनतांगतइति॥ अ
थवा। संधृतासंभोगश्रमश्रेणीयेनतादृश। व्यभिचारीभावोयंप्रियामंडनार्थंकलि
ताबहुविधनिर्मितावनमालायेनेतिवा। एभिर्व्याख्यानैःकुशलःकलाविद्विलासी
त्यादिगुणाश्चकथिताः। स्यान्मंडलंद्वादशराजकेचदेशेचबिंबेकदंबकेपिच। कुष्ट
प्रभेदेप्युपसूर्यकेचभुजंगभेदेश्रुतिमंडलःस्यादितिविश्वः॥ ।दिनमणीत्यादि॥॥

दिनमणिमंडलमंडनभवखंडनहे।मुनिजनमानसहंसजयजयदेवहरे॥२॥ ।दिन
मणिसूर्यस्तस्यमंडलोविवस्वतोपिश्रेष्ठःकौस्तुभाख्यःमंडनअलंकारोयस्यतादृश।दिन
मणिमंडलवन्मंडनंयस्येतिवा।अनेनधनाढ्यइतिनायकगुणःकथितःभवखंडनेति
।व्रजराजकुलेस्वजन्मनादेवादीनांभवोजन्मखंडयसिपराजयंप्रापयसीतितादृश॥
उक्तंच।विविधगोपचरणेषुविदग्धोवेणुवाद्यउरुधानिजशिक्षाः।तवसुतःसतियदा
धरबिंबेदत्तवेणुरनयश्चरजातीःसवनशस्तदुपधार्यसुरेशाःशक्रशर्वपरमेष्ठिपु
रोगाः।कवयआनतकंधरचित्ताःकश्मलंययुरनिश्चिततत्वाः।इतिप्रियजनानांविर
हदुःखादीनिमुद्भवविदारणेतिवा।एतेनकुलीनोकलाविच्चोक्तः।मुनिजनेति।मुनिवृ

त्तिर्मौनंतद्युक्तोजनःगोपीलक्षणःतस्यमानसंचित्तंतदेवमानसंसरोवरविशेषस्तद्गृ
हंसोमरालः।सौभाग्यमदलीलयामानादिनावामौनयुक्तायाः।श्रीराधायाश्चित्ताभि
प्रायावगाहेऽन्यासक्त्याऽनन्यगत्यातत्रैवकृतस्थितिमरालेत्यर्थः।अथवा।हेमुनिज।
नेतिपृथक्पदं।मननशीलोमुनिःसचासौजनश्चतस्याःप्रियायाःसौंदर्यादिगुणगण
गणनस्वभावेत्यर्थः।हेमानसहंस।त्यक्तान्यसमस्ततद्धृदिकृतनिवास।मुनीत्यारभ्यै
कपदंवा।मुनिश्चासौजनश्चसवासौमानसहंसश्चेति।इदंचपरंपरितं।रूपमलंका
रःतदाहुः।नियतारोपणोपायःस्यादोपःपरस्ययः।तत्परंपरितश्लिष्टेवाचकेभेदभा
जिचेति।मानसंसरसिस्वांतेइतिविश्वः।हंसोविहंगमेपिस्यात्परमात्मनियोगिनीति

च॥कालीयेति॥ब॥ ॥कालियविषधरगंजनजनरंजनहे।यदुकुलनलिननिदेश
जय॥३॥ ॥कालियनाम्नोविषधरस्यगंजननिरस्कारक।अनेनचतुःषष्टिकलाकु
शलत्वंदर्शितं।जनान्मधुरवचनादिनारंजयसीतिजनरंजनेतिअनेनशुभवचनत्वं
कथितं।अथवासखीजनंश्रीराधानुकूल्येनानुरक्तंकरोषीतितामेवरागादिनामंड
यसीतिवायदुकुलेति।यदुकुलमेवनलिनंपद्मंतस्यदिनेशसूर्यतत्प्रकाशकत्वात्
यादवानांहितार्थायधृतोगोवर्द्धनोमयेतिवचनात्।यदुकुलमितिगोपकुलमेव।आ
शीविषोविषधरश्चक्रीव्यालःसरीसृपइत्यमरः।वापुंसिपद्मनलिनमेरविंदंमहो
त्पलमितिच।रंजनेरागजननेरंजनंरक्तचंदनेतिविश्वः॥३॥मुधुरेति॥ब॥ ॥मधु

मुरनरकविनाशनगरुडासनहे।सुरकुलकेलिनिदानजय॥४॥ ॥मधुमुरनरका
णांविनाशकारिन्गरुडासनगरुडःपक्षिराजःसएवासनमुपवेशनंयस्यतादृश॥
अथवा।मधुमधुराख्यरसस्तंमुरयतिवेष्टयतिस्वजनार्थमावृत्यरक्षतीतिमधुमुर
ःमुरवेष्टनेइगुपोपधेतिकःप्रत्ययःतेनचनरंकंनराणामितरसुखंविनाशयतीति
तत्तुच्छीकरोतीत्यर्थः।उक्तंच।इतररागविस्मारणंनृणामितिगरुडवद्बंधविशेष।
आसनंयस्येतिच।अनेनरतिकौशलंकथितं।सुरकुलेति।सुरकुलकेलीनामादि
कारणादेवाहिक्रीडाचतुराइतिप्रसिद्धिस्तैरपित्वत्तएवशिक्षितेतिभावः।अनेनवि
लासित्वसामर्थ्यंचोपपादितं।सजातीयगणेगोत्रेदेहेपिरणितंकुलमितिच॥४॥

अमलेति॥ ॥अमलकमलदललोचनभवमोचनहे।त्रिभुवनभवननिधान॥५॥ ॥
अमलंनिर्मलंयत्कमलंतस्ययद्दलंपत्रंतत्सदृशेलोचनेयस्यतादृश।अनेनापिभव्य
त्वमेवोक्तं।हेभवमोचनेतिभवोजन्मतस्मात्प्रपन्नानमोचयतीतितादृशभक्तानांनि
त्यविग्रहदानेनतस्यपरमानंदरूपत्वात्भजनीयत्वमुक्तं।अथवा।भवःरुद्रस्तंविय
द्रूपत्वात्वृकासुरान्मोचयतीतितत्तथा।अथवा।कमलेदललोचनादिसौंदर्येण।
कृष्णरुद्रंसमाध्यादियोगव्रतान्मोचयतीतिस्वप्रवणंकरोतीत्यर्थः।त्रिभुवनभवन
निधान।त्रिभुवनेभवनंगृहंश्रीवृंदावनाख्यंतदेवनिधानंवासस्थानंमहानिधिरि
तिवायस्यतादृश।निधानंत्वालयेनिधाविति विश्वः।भवनंभाववेश्मनोरितिच।पत्रं

पलाशंछदनंदलपर्णंछदःपुमानित्यमरः॥५॥जनकसुतेति॥ ॥जनकसुताकृत
भूषणजितदूषणहे।समरशमितदशकंठ॥६॥ ॥हेजनकसुताकृतभूषण।व्रजज
नानांकंसुखंयस्मात्सजनकोव्रजजनेषुधाप्रेनोवाजनकइतिश्रीवृषभानुस्तस्यसु
ताश्रीराधातस्याःकृतानिभूषाणानिअलंकरणादीनिमकरपत्रकादीनियेनता
दृशजितानिनिजगुणैःस्वस्मिन्तिरस्कृतानिदूषणानिदोषायेनतादृश।अनेनसक
लकलाकौशलरूपस्तारुण्यरूपश्चनायकगुणाउक्तःसमरशमितदशकंठ।स
मरेरतिरणेशंकुजिताख्यसुखंइतिप्रापितंदशसंख्यातानांनायिकानांकंठेयेन
तादृश।अनेनरतौसामर्थ्यंकथितं।अथवा।समरेसुरतसंग्रामेयत्शंतेनइताप्रा

पिताकूजिताख्यादशावस्थानायिकायाःकंठेयेन॥६॥ ॥अभिनवेति॥ ॥अभिनव
जलधरसुंदरधृतमंदरहे।श्रीमुखचंद्रचकोर॥७॥ ॥हेअभिनवजलधरसुंदर।अ
भिनवोनूतनोयोजलंधरःसजलोमेघस्तद्वत्सुंदर।महारसवर्षिन्अनेनापिभव्यत्व
मेवोक्तं।धृतमंदर।धृतोमंदरोपर्वतविशेषोयेनतादृश।अनेनापिसामर्थ्यमेवोक्तं।
अत्रमंदरपदेनगोवर्द्धनएव।यथागोपालस्तवेशंकराचार्येणोक्तं।धृतैकहस्तमंदर
मिति।श्रीमुखचंद्रचकोरश्रीयुक्तःशोभावान्श्रीराधायाःमुखमेवचंद्रःआह्लादकारि
त्वात्तस्यचकोर।तदास्वादसर्वस्व।अत्रतस्याआननचंद्राधरसुधापानसोत्कंठत्वे
नभगवतश्चकोरत्वेननिरूपणं।अनेनापिरतिकौशलमेवोक्तं।प्रत्यग्रेऽभिनवोनव्यो

नवीनोनूतनोनवइत्यमरः।७एवंसप्तभिःपदैर्नायकगुणाःकथिताः।तदुक्तंत्यागी
कुलीनःकुशलोरतेषुकल्पःकलावित्तरुणोधनाढ्यः।भव्यःक्षमीस्थिररुचिःसुभ
गोभिमानीस्त्रीणांमतःशुभवाचाइहनायकःस्यादितिशृंगारतिलके।इदानींकविः
सर्वनायकोत्कृष्टत्वेनश्रीकृष्णस्तुत्वाप्रार्थयते॥८॥ ॥तवचरणमिति॥ ॥तवचरणेप्र
णतावयमितिभावयहे।कुरुकुशलंप्रणतेषुजय।८॥ ॥तवचरणेवयंप्रणताहेकृ
ष्णइतिसंभावयचिंतयजानीहीतिप्रणतेष्वस्मासुकुशलंकुरुविघ्नराहित्यंकुर्वित्य
र्थः॥८॥ ॥श्रीजयदेवेति॥ ॥श्रीजयदेवकवेरिदंकुरुतेमुदं।मंगलमुज्वलगीत।९
॥इदंजयदेवकवेःमंगलगीतविशेषःमुदंकुरुते॥कीदृशंमंगलं।उज्वलंदोषरहि

तंगीतिर्गानंयस्यतादृशंगीतमितिपाठेपिसएवार्थः।गीतदोषास्तुनारते।शंकितं।
न्नीतमक्षुष्टमव्यक्तमनुनासिकं।काकःस्वरंशिरःकंपंतथास्थानविवर्जितं।विस्वरंवि
रसंचैवविश्लिष्टंविषमाहतं।व्याकुलंतालहीनंचगीतदोषाविदुर्बुधाः।इति।अथवा।
मंगलंइष्टप्रणतिरूपं।मंगजाख्योतालोवेतिमंगलं॥ए॥द्वितीयःप्रबंधः॥ ॥२॥॥
प्रनर्ननेयिकायाःसौन्नाग्योद्रेकंनिरूपयन्नाश्लीरूपंमंगलमाचरति॥ढ॥ ॥पद्मेति॥
पद्मापयोधरतटीपरिरंभजन्माकाश्मीरमुद्रितमुरोमधुसूदनस्य।व्यक्तानुरागमि
वखेजदनंगखेदस्वेदांबुशूरमनुशूरयतुप्रियंवः॥ढ॥मधुसूदनस्योरःस्थलंवोयु
ष्माकंप्रियंवांछितंअनुपूरयतुसंश्लेषंकरोतुप्रतिश्लेषंददात्विद्यर्थः।नित्यविलासा ३३

मक्रत्वात्।तद्विशेषणविशिष्टस्यतस्यदाढ्यत्वसामर्थ्यवांछितमपितत्स्त्रियाणांतदेव
रसानुभवमितिध्वनितं।मधुरस्यास्वादलंपट्येनमधुसूदनपदोपादानं।कीदृशं
उरः।पद्मानिविद्यंतेयस्यासापद्मा।अर्शआदिभ्योअच्।ङ्यापोःसंज्ञाछंदसोबहुलं
मेतिपद्मकोटिसौगंध्यवतीपद्मासौभाग्यपरिमलस्यापनाच्चसौकुमार्यसौंदर्यादि
गुणैरपीतितस्याःपद्मायाःपद्मिन्याःश्रीराधायाःयापयोधरतटीस्तनप्रांतस्तस्याः
परिरंभेणालिंगनेनजन्यंयत्काश्मीरंकुंकुमंतेनमुद्रितंमुद्राचिह्नविशेषस्तद्युक्तमि
त्यर्थः।इदंमधुसूदनस्यहृदयंममैवनत्वन्यस्येतिख्यापनायनिजस्तनतटीलि
प्तकाश्मीरेणमुद्रेवदत्तेतिभावः।तथाच।पयोधरयोस्तटीपरिरंभेणनायिकायाःवाम

ताख्यापनेन तस्या वैदग्धी प्रतिपाद्यते। पुनः कीदृशं। खेलन् क्रीडां कुर्वन् अनंगः कंदर्प
स्तस्मात् खेद आयासः सुरतः श्रमः तेन यत् स्वेदांबु स्वेदजलं तस्य पुरः प्रवाहो यत्र तादृ
शं। एतेन काश्मीरस्य स्वेदसंबंधेन मुद्रायोग्यत्वं संभोगातिशयत्वं वध्वनित। कीदृशमि
व। व्यक्तानुरागमिव। व्यक्तः प्रकटीभूतोनुरागः स्नेहो यत्र तादृशमिव। तद्विषयकानुरा
गाधिक्यादभ्यंतरे शमावेशाभावात् कुंकुमरागव्याजेन बहिर्निसृत इवेति भावः॥ मु
द्रा संजाता यस्येति मुद्रितमिति तारकादित्वादितच्। पूरो जलप्रवाहे स्यात्प्राणसंशुद्धि
वातयोरिति विश्वः स्त्रीस्तनाद्यौपयोधराविति। कंदर्पो दर्पको नंग इत्यमरः। पद्मिनील
क्षणं। कमलमुकुलमृद्वीफुल्लराजीवगंधिः सुरतपयसि यस्याः सौरभं दिव्यमंगे। चकित

मृगदृशा भे प्रांतरक्ते च नेत्रे। कुचयुगलमनर्घ्यश्रीफलश्रीविडंबि। तिलकुसुमसमा
ना बिभ्रती नासिकां च द्विजगुरुसुरपूजाश्रद्दधाना सदैव। कुचलयदलकांतिः कापि
चांपेयगौरी विकचकमलकोशाकारकामात्पत्रा। व्रजति मृदुसलीलं राजहंसीव त
न्वी त्रिवलिकवलितमध्या हंसवाणी सुवेषा। मृदुशुचिलघुभूंक्ते मानिनी गाढलज्जा प्र
बलकुसुमवासो वल्लभा पद्मिनी स्यादिति। तस्या अलौकिकगुणानां वर्णनाशक्यत्वा
देते लोकग्राह्यत्वेनैव कथ्यंत इति सिद्धांतः॥ ६ एतावग्रंथेनाभिधेयप्रयोजनकेलिव
र्णनोपयुक्तनायकगुणप्रतिपादनपुरःसराणि मंगलानि विधाय कविः शृंगारसस
प्रधानभगवत्केलिवर्णनं चिकीर्षुस्तत्र प्रथमावसरसंक्षिप्तकेलिं निर्वाह्य विशेषक्रीडा

मारब्धुमिछोःपरमप्रियतमयोःकदापिनिमेषमात्रमपिविप्रलंभमनिछतोःश्रीरा
धामोहनयोःसंभोगरसपोषणायरसयोगादेवविप्रलंभाख्यशृंगाररसाविर्भावेजाते
प्रथमंतावच्छृंगाररसमर्वस्वभूतायानायिकायाश्चरितानिवर्णयितुंप्रस्तावयति॥॥
वसंतश्त्यादि।तत्रसंभोगोत्कर्षंप्रतिविप्रलंभस्योपादानेऽलंकारिकाःसंभोगोविप्रलं
भेननविनापुष्टिमश्नुते।कषायितेहिवस्त्रादौभूयान्रागोहिजायतइति।किंचरसयो
गादितियदुक्तंततश्शृंगाररसानुभवमिछामीतिनिश्चित्येछाज्ञानचिकीर्षाकृतिमत्व
मीश्वरत्वमिति।तस्यभगवतःनित्येछयैवरसनियामकत्वेनापिनित्यानंतशक्तिम
तस्तस्यनस्वातंत्र्यमंगइतिसिद्धांतः।उक्तंच।ससत्कामइतिएवंनित्येछयाकालव ३५

वधानोपिनिरस्तः॥ ॥वसंतेवासंतीकुसुमसुकुमारैरवयवैर्नवमंतीकांतारेबभ्रवि
हितहल्लानुसरणं।भ्रमंदंकंदर्पज्वरजनितचिंताकुलतयाचलद्राधांराधांसर
समिदमूचेसद्चरी॥७॥ ॥श्लोकार्थस्तुकाचित्सद्चरीतुल्यव्यसनासखीवसंतेस
रसंरसोद्बोधसहितंयथास्यादेवंराधांश्दंवक्ष्यमाणंऊचे।उवाच।कीदृशी।अवय
वैरंगैरुपलक्षितां।कीदृशैरवयवैःवासंतीकुसुमसुकुमारैः।माधवीयलतापुष्पव
त्कोमलैः।ततोपिमृदुभिरित्यर्थः।मार्दवं।कोमलस्यापिस्यशब्दसहतोच्यते।तद्यथा॥
अनिनवमालिकामयंसाश्रयनवरंराधिकाधिश्रिष्योनऊसुमपटलंदरापिजस्रो
तदनुनवान्नतुरेवसब्रुणासीदितिनऊस्रो।स्रानिनश्रापेत्यर्थः।उनःकीदृशी।कांता

रेमहारण्येभ्रमतीं।तत्रहेतुगर्भितंविशेषणंमाह।बहुविहितेतिबहुवारंविनिहि
तंकृतंकृष्णस्यानुस्मरणमन्वेषणंययातादृशीं।अत्रापिहेतुगर्भंविशेषणमाह
कंदर्पज्वरेणजनितायाचिंतातत्कृतायाआकुलताव्याकुलतातयाअमंदंअधिकं
यथास्यादेवंचलद्बाधावर्द्धमानपीडां।अवयवैरित्यत्रजटाभिस्तापसइतिवद्विशे
षणेतृतीया।महारण्येदुर्गपथेकांतारःपुनःसकइतिच।पीडाबाधाव्यथादुःखमि
त्यपि।तथाचानेनाभिलाषचिंतारूपेदेशेकथिते।तल्लक्षणं।अभिलाषःस्पृहातत्र
काम्येसर्वांगसुंदरे।दृष्टेश्रुतेथतत्रापिविस्मयानंदसाध्वसाइति।यथादशरूपके॥
कथंसवल्लभःप्राप्यःकिंकुर्यात्तस्यसिद्धये।कथंभवेदसौवश्यइतिचिंताभवेद्यथेति।

शृंगारतिलके।सुकुमारावयवैःकांतारेभ्रमंतीमित्यनेनाभिसारेऽनुरागसौष्टवंद
र्शितंतद्यथाचित्रोत्कीर्णादपिविषधराद्भीतिभाजोरजन्यांकिंवाब्रूमस्तदभिसरणे
साहसंमाधवास्याःध्वांतोयांत्यायदतिनिभृतंराधयात्मप्रकाशत्रासात्पाणिःपथि
फणिफणारत्नरोधीव्यधायि।यथावा।द्वित्रैःकेलिसरोरुहंत्रिचतुरैर्द्धम्मील्लमल्ली
स्रजं।कंठान्मौक्तिकमालिकांतदनुचत्यक्त्वापदैःपंचषैः।कृष्णप्रेमविघूर्णितांतरत
यादूराभिसारातुरा।तन्वंगीनिरुपायमध्वनिपरंश्रोणीभरंनिंदतीति।अथवाअ
मंदंकंदर्पज्वरजनितचिंताकुलतया।बहुविहितंकृष्णेनानुसरणंयस्यास्तादृशींअ
तःकांतारेभ्रमंतीत्यर्थः।७।किमूचेइत्यतआह॥ ॥ललितेति।गीतस्यास्यवसंतरागो

यतितालः।तयोर्लक्षणं।शिखंडिबर्होच्चयबद्धचूलः पुष्पनपिकंचूतलतांकुरेण॥
भ्रमन्मुदावासमनंगमूर्त्तिर्मत्तोमतंगस्थवसंतरागइति।लघुद्रुतौतालश्चेति॥ब॥
ललितलवंगलतापरिशीलनकोमलमलयसमीरे।मधुकरनिकरकरंबितको
किलकूजितकुंजकुटीरे॥१॥विहरतिहरिरिहसरसवसंते।नृत्यतियुवतिजने
नसमंसखिविरहिजनस्यदुरंते॥ध्रुवपदं॥गीतार्थस्तु॥सबाधांराधांमहौषधं
वचःसखीवक्तिहेसखिराधेइहअत्रैवश्रीमद्वृंदावनेसरसवसंतेरसशृंगारस्ते
नसहवर्त्ततइतिसरसःशृंगारोद्बोधकत्वात्।सरसश्चासौवसंतश्चसरसवसंत।
स्तस्मिन्तादृशेसमयेहरिःश्रीकृष्णःविरहेतिक्रीडति।कसतिसमंसशोभंसाकंवा

युवतिजनेनृत्यतिसति।किंभूतेवसंतेमिलनार्थहेतुगर्भंविशेषणं।विरहिजनस्यदु
रंतेइतिन।अपितुदुरंतेएवेतिकाक्वादुरंतेदारुणे।दुःखेनांतःसमाप्तिर्यस्य।तादृशेवा
निरवधावित्यर्थः।अथवाअनोजीवनंतनसमंदुरंते।अथवाहरिरिहसरसवसंते।बहु
प्रेम्णाऽभिसृते।तद्रूपाद्युन्मादिते।युवतिजनेगोपांगनागणेनृत्यतिसत्यपित्वयास
हनृत्यमिच्छुस्ताभिःसमंनविहरतिकेचित्तुहरिरिहसरसवसंतेयुवतिजनेनसमंविरहे
तिनृत्यतिचेतिव्याकुर्वंति।तत्तुराधाभिसारायसख्याअसूयाहेत्वकथनान्नसंगछते
।ननुप्रथमानुरागःस्यातसोपिनघटते।पूर्वक्रीडावर्णनात्वक्ष्यतिचारासेहरिमिहवि
हितविलासंस्मरतिमनोममकृतपरिहासमिति।अतोत्रकृतंव्याख्यानेमेवसिद्धिं।प्र

कृतिमनुसरामः।तानिःसमंनविहरतीत्यत्रहेतुः।विरहिजनस्यत्वविरहितस्यछल्ल।
लक्षणजनस्यउरंतेनाश्ववसंतश्चत्वांविनानतस्यविलासोत्साहप्रदाननवंतीत्यर्थः।
अतएवत्वामेवकामयतीतिनावः।विहरतीत्यनेनापिश्रीराधान्वेषणरूपोविहारउ
च्यते।मिलनसंकोचपरिहारायसामान्ययुवतीनांसंगइत्युक्तः।तथाचयदित्वंप्रिया
तमंतंनानुसरिष्यसि।तदायंवसंतस्तवापिउरंतोनविष्यतीतिध्वनितं।समंसहेत्यम
रः॥७॥ध्रुवपदमिदं॥अत्रषड्दशलक्षणान्वितानिसृष्टार्थाइतीसखीएव।तउक्तंपद्म
तिकुशलादक्षागूढमंत्राहृष्टप्रियास्वतंत्राविधवादासीउष्टाप्रव्रजितासखी।मालाकारा
दिनारीचकार्याइतीष्टसिद्धये।तस्माःलक्षणानियथा।कालचिंतोद्यमानिज्ञासुवेषाहढ ३८

मित्रता।धृष्टाईष्टासुशीलाचदक्षाचापल्यवर्जिता।अक्लुप्तचानुविग्नाप्रगल्भादशैव
त्विति।किंच।विलासिनोश्वस्वांतस्थमर्थंज्ञात्वायतेतया।अनुरूपाविमोचेतित्याकलप्पा
नुकूलज्ञतानिसृष्टार्थेतिसाज्ञेयाकौशलसमन्वितेति।तथाच।सप्तविंशतिर्दूतीकर्म
णिायथा।प्रोत्साहनं।१अर्थदर्शनं।२।गुणकथनं३विस्रंभणं।४।तदनुरागाख्यानं५
कलानिवेदनंदक्षौर्यप्रकटनं७बकुमित्रता८सुवेषता९दुःखसहिष्णुता१०मधुरवा
शिता११गूढमंत्रिता१२सौख्यवत्ता।१३स्वच्छंदानुवर्त्तिता१४उपायज्ञता।१५कालज्ञानवे
दिता।१६देशविवेकता१७स्वभावज्ञता१८सर्वकर्मकुशलता।१९दोषाछादं२०गुणानि
रूपणं।२१सौंदर्यशंसा।२२पिशुनवाक्यरहिसं।२३मृदुभाषणं।२४अर्थप्रदानकथनं।२५

विचेष्टितशंसनं२६परतत्वज्ञानंचेति।२७तत्रकालज्ञताप्रोत्साहनार्थदर्शनादिगुणा
न्प्रदर्शयंतीवसंतस्यसरसतामाह॥ब॥ललितामनोहरायालवंगलतातस्याःपरिशी
लनेनपरितःशीलनमालिंगनंतेनमृदुलोकोमलोमलयसमीरोमलयाचलसंबंधीवा
युर्यत्रतादृशे।एतेनवायोस्त्रैविध्यमुक्तंलवंगलतानायिकायोगातसमीरस्योद्दीपन
ताकथिता।अन्यांश्चोद्दीपनविभावान्दर्शयति।पुनःकीदृशेवसंते।मधुकरनिकरे
णेभ्रमरसमूहेनकरंबितामिश्रितायेकोकिलास्तैःकूजितःमधुरशब्दयुक्तःकृतःकुं
जएवकुटीरोल्याकुटीयत्रतादृशे।शीलनमालिंगनेसमेइतिविश्वः।समीरमारुतमरु
तजगत्प्राणसमीरणाइत्यमरः।मधुव्रतोमधुकरोमधुलिण्मधुपालिनइतिच।स्तोमौघ

निकरव्रातवारसंघातसंचयाइत्यपि।मिश्रितेकरंबितइतिशाश्वतः।अल्याकुटीर
इत्यपि।वसंतस्यदुरंततामाह॥ ॥उन्मदेति॥ ॥उन्मदमदनमनोरथपथिकवधूज
नजनितविलापे।अलिकुलसंकुलकुसुमसमूहनिराकुलवकुलकलापे॥२॥ ॥उन्म
दउद्भटोमदनोयत्रउद्गतोमदनोयस्मिन्नितिवातादृशोमनोरथोयेषांतादृशायेपथिका
नांवधूजनास्तैर्जनितोविलापोयत्रतादृशे।अलिकुलैःभ्रमरसमूहैःसंकुलोव्याप्तोयःकु
सुमसमूहस्तेननिराकुलोनिःशेषेणाकुलोवकुलकलापःकेसरसमूहोयत्र।तादृशेअ
थवा।तादृशःवकुलएवकलापोभूषणयस्य।कलापःस्मरशरतूणीरोवा।संकुलंवाच्यव
द्व्याप्तेविस्पष्टार्थेवचस्यपीतिविश्वःकेसरेवकुलइत्यमरः।कलापोभूषणेबर्हेतूणीरेसंहता

वपीतिच॥२॥ ॥मृगमदेति॥ ॥मृगमदसौरभरभसवशंवदनवदलमालतमाले।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले॥३॥ ॥पुनःकीदृशे॥मृगम
दस्यकस्तूरिकायाःयःसौरभरभसःसौरभवेगस्तस्यवशंवदाआयत्तवादिनीनवदल
मालानूतनपत्रपंक्तिर्येषांतादृशास्तमालायत्रतादृशे।पुनःकीदृशे।युवजनानांतरु
णजनानांहृदयंविदारयंतीयुवजनहृदयविदारणास्तादृशायेमनसिजस्यकामस्य
नखास्तेषामिवरुचिदीप्तिर्येषांतादृशाःयेकिंशुकाःपलाशकुसुमानितेषांजालंसमू
होयत्रतादृशे।किंशुकजालानिपलाशकलिकाइतिवा।अत्रपलाशकोरकस्यचक्रत्वे
नचहृदयविदारणाद्रुधिराक्तमनसिजनखस्यसादृश्यंनखसौंदर्यंचकथितं।मृग

नाभिर्मृगमदःकस्तूरीचेत्यमरः।रभसोवेगहर्षयोरितिविश्वः।रुचिर्मयूषेशोभाया
मभिष्वंगाभिलाषयोरितिविश्वः।पलाशेकिंशुकइत्यमरः।जालंगवाक्षआनालेको
रकेदंभकवृंदयोरितिविश्वः॥४॥मदनमहीपतिकनकदंडरुचिकेसरकुसुमविका
शे।मिलितशिलीमुखपाटलिपटलकृतस्मररूणविलासे॥५॥ ॥मदनंमहीपतिस्त
स्यकनकदंडरुचिःसुवर्णघटितछत्रदंस्तस्येवरुचिर्यस्यतादृशस्यकेशरस्यनागके
सरपुष्पस्यविकाशःप्रकाशोयत्रतादृशे।अत्रकनकदंडशब्देनकनकदंडयुक्तंछत्र
मितिवा।महीपतिशब्दसाहचर्यात्।अथवाविरहिणादंडनार्थंदंडवपुनःकीदृशेमि
लिताशिलीमुखाभ्रमराएवशिलीमुखाबाणायस्मिन्तादृशं।यत्पाटलिपटलंपा

एव

टलपुष्पसमूहस्तेनकृतःस्मरतूणस्यकंदर्पतूणीरस्यविलासश्चेष्टितंयत्रतादृशा।अ
त्रपरंमर्मव्यथाजनकत्वेनभ्रमराणांबाणसाम्यं।चांपेयःकेसरोनागकेसरःकांच
नाह्वयइत्यमरः।अलिबाणैशिलीमुखावितिच।समूहेपटलंनानेत्यपितूणेपासंग
तूणीरनिषंगाइत्यपि॥४॥विगलितेति॥ ॥विगलितलज्जितजगदवलोकनतरु
णकरुणकृतहासे।विरहिनिकृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे॥५॥ ॥वि
गलितंविशेषेणगलितंलज्जितंलज्जायस्यतादृशस्यजगतःप्राणिगणस्यलोकने
नदर्शनेनतरुणकरुणैःनवीनकरुणवृक्षैःपुष्पविकाशव्याजेनकृतोहासोयत्र
तादृशे।अत्रहास्यरसस्यश्वेतत्वात्पुष्पविकाशसाम्यं।यदाहभरतः।श्वेतोहासःप्रकी ४२

र्त्तितइति।अथचतरुणकरुणैरित्यनेनवृंदावनवृक्षादीनांनित्यतारुण्यमेवप्रति
पाद्यतेभगवत्प्रियत्वात्।अथवाविगलितलज्जितानांजगतांवियोगिजनानांदर्शने
नतरुणैरर्थादवियोगिभिःकरुणंकरुणरससहितंयथास्यादेवंकृतोहासोयत्र।
तादृशे।हाविरहिणोवराकाःकष्टंप्राप्नुवंतितीकरुणालज्जांहित्वाविलपंतीतिचहा
सस्तेषामितिभावः।बालारसानभिज्ञाएववृद्धाःपरप्रवेच्यवेपिकृतसंवरणाअत
स्तरुणेत्युक्तं।अथवाविगलितंविभिःकोकिलादिभिःपक्षिगणैःशक्षायमानैःगलि
तंसुविस्खलितंअतएवलज्जितंगछतीतिजगतपथिककुलंविभिगलितंचतत्ल
ज्जितंचतत्जगच्चेतिसमासः।तस्यावलोकनेनतरुणैःसंयोगिभिःकारुण्येनकृतोहा

सोयत्रतादृशे।पुनःकीदृशे।वसंतेविरहिणांवियोगिनांनिकृंतनायविदारणायकुं
तमुखाकृतिःकुतआयुधविशेषस्तस्यमुषं।अग्रभागःतस्येवआकृतिर्यस्यतादृशंय
त्कतकंतेनदंतुरिताव्याप्ताविषमीकृताःवाआशादिशोयस्मिन्।वादृशेक्वचित्के
तकिदंतुरिताशइतिपाठः।तदायाकारौह्रसौक्वचिदित्यत्रक्वचिद्ग्रहणस्यलक्ष्यानु
रोधार्थत्वात्।कृतह्रस्वेनकेतकीशब्देनशंकनीयःलज्जितेत्यत्रनपुंसकेभावेक्तःकृ
तिछेदनेइतिह्रस्वानुबंधौप्यस्त्रीतिकेचित्तस्ययुट्प्रत्ययातस्यनिकृंतनप्रयोग
ःसाधुः।करुणस्नुरसेवृक्षेकृपायांकरुणामतेतिविश्वः।प्रासस्नुकुंतइत्यमरः।निम्नो
न्नतेतथाव्याप्तेदंतुरंकथ्यतेबुधैरितिधरणिः।आशादितृष्णादिशोरितिविश्वः॥मा

धविकेति॥ब॥ ॥माधविकापरिमलललितेनवमालतिजातिसुगंधौ।मुनिमन
सामपिमोहनकारिणितरुणाकारणबंधौ॥६॥पुनःकीदृशेमाधविकायाःवासंत्याः
परिमलेनसौरभेणललितमनोहरे।श्लेषेणमाधवस्येयंमाधविकानायिकातस्याःप
रिमलेनकांतविमर्द्दसौरभेणललितेमनोज्ञे।उक्तंच।आलिंग्यैवंप्रियंयारतेकाम
निर्जितचेतसा।स्फुरतिप्रत्यक्तिरचनामाधवीना।यकाचेतिमाधवशब्देनवसंतए
वनायकःकृष्णसंगमायतांत्वरयतिविभावोद्रेककथनेचेतिध्वनितं।पुनःकीदृशे॥
नवमालिकयानवमालिकपुष्पैःअतिसुगंधौअतिशयेनसौरभयुक्ते।पुनःकीदृ
शे।मुनिमनसामपिमोहनकारिणि।मोहजनके।अन्येषांकिंवक्तव्यमित्यपिशब्दार्थः

तथाचामानेमुनिवृत्तानांमानिनीनांमोहकारिणीतिध्वनितं।पुनःकीदृशे।पुनःकी
दृशे।तरुणानांविलासियुचजनानांअकारणबंधौ।स्वाभाविकमित्रे।परमानंदप्र
दइत्यर्थः।नवमालिकाजातीतिपाठेनवमालिकंनवमालिकाकुसुमंचजातिश्चेत्यर्थ
ः।विमर्दोछेपरिमलोगंधोजनमनोहरेइत्यमरः।स्फुरदतीति॥ब॥ ॥स्फुरदतिमुक्त
लतापरिरंभणमुकुलितपुलकितचूते।वृंदावनविपिनेपरिसरपरिगतयमुनाज
लपूते॥७॥ ॥पुनःकीदृशेवसंतेस्फुरंतीकंपमानाशोभमानावायाअतिमुक्तल
तावासंतीलतातस्याःपरिरंभणेनआलिंगनेनमुकुलितःपुलकितःमुकुलितंमुकु
लंतदेवपुलकोरोमांचस्तद्युक्तश्चूतआम्रोयत्रतादृशे।अत्रकांतस्यसंगमरसेनसात्वि

कोद्रेकात्कंपमानायापरिरंभेनचूतनायकस्यापिरोमोद्गमेनाचेतनयोरपिका
मोन्मेषःकथितः।तेनवसंतस्यातिदुरंतत्वंकथितं।तथाचातिमुक्तपदेनातिशय
मुक्तानामपिपरिरंभणौत्सुक्यमितिध्वनितं।अतिमुक्तायाःकस्याश्चिद्भगवतमा
धुर्यभराकृष्णायास्तदुपासनार्थंवृंदावनेलतारूपत्वमितिवा।तदाअतिमुक्ताचा
सौलताचेतिसमासः।अनेनातिमुक्तैःवैकुंठवासिभिरपिवृंदावनेलतात्वंस्पृहणी
यमित्रमाधुर्यभरोनिरूपितः।उक्तंच।आसामहोचरणरेणुजुषामहंस्यांवृंदावने
किमपिगुल्मलतौषधीनामिति।एतावतावसंतस्यसरसतांदुरंततांचोक्त्वासंप्रति
क्रीडायाःस्थानविशेषमाह।वृंदावनेत्यादि।वृंदावननाम्निविपिनेहरिर्विहरतीत्यन्व

यःकीदृशेविपिनेपरिसरेसमीपप्रदेशेपरितःसर्वतोगतेनव्याप्तेनयमुनायाः
जलेनसृष्टेपवित्रेपरिसरपरिगतंचतत्।यमुनाजलंचतच्चसृष्टंयत्रतस्मिन्निवापा
वनस्ययमुनाजलस्याप्यधिकपावनत्वेनकिंवक्तव्यंतत्पावनंलमित्यर्थः।तथाच
।रसोयःपरमाक्षरःसच्चिदानंदलक्षणःब्रह्मेत्यपनिषज्जीतःसएवयमुनास्वय
मितिवचनात्।एवंमहिम्नोपलक्षितायास्तस्याःपावनत्वेनातिमुक्तैःस्पृहणीयत्व
तस्यसिद्धमितिदर्शितंपावनत्वमत्रभगवद्रसविशेषानुभावाउच्यतेनतुपापमात्र
क्षयादिति।वृंदमवतीतिवृंदावनंचंपकादिवृंदंगोपीवृंदवाभगवत्केलिसुखसंपा
दनात्अतिमुक्तःपांडुकःस्यात्तासंतीमाधवीलतेत्यमरः।पर्यंतभूःपरिसरइत्यपि ४४

ऽसंप्रतिगीतार्थमुपसंहरन्स्वभणितेरुत्कर्षमाह॥ ॥श्रीजयदेवेत्यादि॥ ॥श्रीज
यदेवभणितमिदमुदयतिहरिचरणस्मृतिसारं।सरसवसंतसमयवनवर्णनम
नुगतमदनविकारं॥७॥ ॥श्रीजयदेवकवेःइदंभणितंउदयतिराजते।अयतेरु
नयपदित्वात्परस्मैपदं।तत्रहेतुःहरिचरणयोःस्मृतिःस्मरणंतेनसारंश्रेष्ठं।अथ
वाहरिचरणस्मृतिरेवसारोयत्रतादृशं।पुनःकीदृशं।सरसंशृंगाररसप्रधानंव
संतेसमयसंबंधिनोवनस्यवर्णनंयत्रतादृशं।अथवामदनःश्रीकृष्णःतस्यविका
रःभावोद्रेकःराधाप्रतिमुख्याःवर्णनेनानुगतःयस्मिंन्ममोदितेतादृशं।मदनसंबं
धिविकारोऽनुगतःश्रोतृहृदियस्मात्तदितिवा।सरसवसंतसमयवनवर्णनमित्य

स्मविशेषणंवाऽनुगतमदनविकारमिति॥७॥इदानींवसंतकालीनवायोरपिविर
हिजनसंतापकत्वमाह।दरविदलितेत्यादि॥ ॥दरविदलितमल्लीवल्लिचंचत्सरा
गप्रकटितपटवासैर्वासयन्काननानि।इहहिदहतिचेतःकेतकीगंधबंधुःप्रसर
न्समबाणप्राणवर्गंधवाहः॥८॥इहहिअस्मिन्नेववसंतेगंधवाहोवायुश्चेतोदह
ति। अथाहिरहिणांकिंकुर्वन्काननानिवनानिवासयन्सुरभीकुर्वनकैःदरश्ष
द्विदलितविकसितायामल्लीवल्लिमल्लिकालेतातस्याःसकाशात्चंचतःउच्छ
लतःयेपरागाःपुष्परेणवस्तएवप्रकटिताःपटवासाःपिष्टातकास्तैःकीदृशोगंध
वाहःकेतकीगंधबंधुःकेतकीसौरभसहचारी।पुनःकीदृशःप्रसरतःप्रतिदिशंसं ४५

चरतोसमबाणस्यप्राणवत्।प्राणसदृशः।अथवा।प्रसरताअसमबाणेनप्राणवा
न्शक्तिसंपन्नोयोगंधवाहइत्येकमेवपदं।अथवाकिंभूतंचेतःप्रसरत्।अर्थात्म
नोरथंप्रति।असमबाणप्राणवत्कामस्यजीवितमिव।श्षदर्थेदरावयमितिवि
श्वः।परागःपुष्परजसीतिच।पिष्टातःपटवासकश्चमरःगंधवाहानिलाश्वगाइ
तिच॥८॥ ॥अक्षुत्संगेत्यादि॥ ॥अक्षुसंगवसन्नुसंगकवल्लकेशादिवेशाचलंप्रा
लेयशवनेलयानुसरतिश्रीखंडशैलानिलः।किंचस्निग्धरसालमौलिमुकुलान्या
लोक्यहर्षोदयाउन्मीलंतिकुऊःकरूरितिकलोत्तालाःपिकानांगिरः॥९॥श्रीखं
डशैलानिलोमलयपर्वतसंबंधीपवनःईशाचलंईशस्यमहादेवस्यश्रचलंपर्वत

हिमालयंश्रनुसरति।कस्मादिवाश्रङ्गेःमलयस्यउत्संगेक्रोडेवसंतःयेतुजंगाःसर्पास्ते
षांकवलेनजनितोयःक्लेशःसंतापस्तस्मादिवातर्हिहिमाद्रिंकिमितिव्रजतीत्यतश्राह
।पालेयेति।पालेयंउषारस्तस्यजनमवगाहनंतस्यैछयाश्रत्रसर्पैःकवलितोग्रीष्मी
स्यपवनस्यतद्विषसंपर्कादधिकंविरहिणांसंतापकत्वंधनितं।वस्तुतस्तुदक्षिणवायो
ःशीतलत्वात्सुखकरत्वाच्चविरहिणांदुःसहपरिणामेनसर्पग्रसनहिमाजनवनमित्या
शयः।नकेवलमिदमेवदुःसहंवसंतेश्रपरमपीत्याह।किंचेति।पिकानांकोकिलानां
कुऊःकुऊरितिगिरःकुऊरित्येवंरूपाःशब्दाःउन्मीलंतिप्रकटीभवंति।कीदृशपःक
लोत्तालाःकलाःश्रव्यक्तमधुराःउत्तालाःउच्चटाःकस्मात्स्निग्धाःयेरसालाःश्राम्रवृक्षा ४६

स्तेषांयेमौलयःश्रग्रभागास्तत्रयानिमुक्तजानितानिश्रालोक्यवीक्ष्योद्दर्षोदयः
श्रानंदस्याविर्भावःतस्मात्तश्रत्रक्वचिद्दोश्रंगेतिपाठः तदाश्रद्यवसंतइत्यर्थः।उषा
रस्तुहिनंहिमं।पालेयंमिहिकाचेत्यमरः।उत्तालेहेमकुंभेस्याज्झर्तेचोत्तालउत्कटेस्त्रि
ष्टेपिविकरालेस्याउत्तालःश्रवंगमइतिविश्वः।एसंप्रतिवसंतदिवसानामपिदुरंत
त्वमाहाउन्मीलदित्यादि॥७॥ ॥उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्की
डत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।नीयंतेपथिकैःकथंकथमपिध्या
नावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमीवासराः॥१॥श्रमीवसंतसंबधि
नोवासराःदिवसाःपथिकैःकथंकथमपिमहताकष्टेननीयंतेसमाप्यंते।कीदृशाःवा

सराः उद्गीर्णऽप्रकटीकृतः कर्णज्वरः श्रोत्रसंतापो येषु तादृशाः कैः उन्मीलंति प्रकटी
भवंति यानि मधूनि गंधाश्च तेषु लुब्धा लोलुपा भ्रमरास्तैर्व्याधूताः कंपिता ये चूतांकु
रा आम्रमुकुलानि तेषु क्रीडतां कोकिलानां या काकल्यः अव्यक्तमधुरध्वनयः ताभि
कृता ये कलकलाः कोलाहलास्तैः। तदुक्तं वसंते पंचमं वदति कोकिल इति उद्दीपनवि
भावो दर्शितः केन प्रकारेण नीयंते इत्यत आह। ध्यानेत्यादि। ध्याने स्वप्रियाचिंतने य
दवधानं तत्परता तेन क्षणं प्राप्तो यः प्राणसमाया जीविततुल्यायाः कांतायाः समा
गमरूपो रसस्तस्मादुत्पन्ना ये उल्लासा उत्साहास्तैः पथिकविशेषणं। वा कीदृशैः ध्या
नावधानेन क्षणं प्राप्तो यः प्राणसमायाः समागमरसस्तस्मिन् उल्लासो येषां तादृशैरि

ति। अनेन श्रीकृष्णस्यापि प्रियाध्यानेन कष्टेन वसंतवासरनिर्वाह इति ध्वनितं। काकली
तु कले शूक्ष्मे ध्वनावित्यमरः। कोलाहलः कलकल इति च। एवमुद्दीपनविभावा दर्शिता
ः संप्रत्यनुभावं वर्णयति। अनेकनारीत्यादि॥ ॥अनेकनारीपरिरंभसंभ्रमस्फुरन्मनो
हारिविलासलालसं। मुरारिमाराडुपदर्शयंत्यसौ सखी समक्षं पुनराह राधिकां॥११॥ ॥
असौ सखी राधिकां पुनराह। पुनः कथितवती। आरात दूरे समक्षं प्रत्यक्षं मुरारिं उपद
र्शयंती। कीदृशं। अनेकनारीणां परिरंभसंभ्रमेण आलिंगनादरेण स्फुरन् यो मनो
हारी विलासः अनंगविकारस्तेन लालसा अत्यौत्सुक्य अर्थाद्राधायां यस्य तादृशं। अ
थवा अनेकनारीणां परिरंभसंभ्रमेण स्फुरन् चित्तारूढो भवनयः श्रीराधायाः मनो

हारीहरेश्चित्तापहारीविलासः हावादिलक्षणस्तस्मिन्लालसायस्यपरिरंभसंभ्रम
ःअन्योन्यसख्यालिंगनलक्षणाभियोगस्तेनस्मारितश्रीराधाविलासेनतत्सखीषु
लालसंप्रार्थनमितिवा।अथवा।मुरारिमारात्कृष्णएवकामस्तस्मादनेकनारीणांप
रिरंभसंभ्रमेणस्फुरन्आविर्जवन्योमनोहारीविलासस्तेनलालसमौत्सुक्यभाव
विकारंदर्शयंतीत्यर्थः।अनेनतदभिसरणायतासांभावविक्रियानिरूपणेननाय
कगुणाधिक्यंदर्शितं।वक्ष्यतिचाग्रे।पीनपयोधरेत्यादिना॥संभ्रमेत्रयमिछंतीभयमु
द्वेगमादरं॥त्वरायामपिसंभ्रमइति।लालसोलालसापिस्याद्याञ्चातृष्णातिरेकयोः
।औत्सुक्येचेतिविश्वः।आराद्दूरसमीपयोरित्यमरः।तथाचसंभ्रमपदोपादान।लाल

रायणे।अत्रमुग्धपदेनहावाद्यनभिज्ञत्वकेलिपरइत्यनेनसामान्यक्रीडापरत्वंवतासां
ध्वनितं।तथाचविलासिनीत्यनेनहावाद्यभिज्ञांत्वामेवसकलकलाभिज्ञोपेक्षतीति
भावः।मुग्धःसुंदरमूढयोरितिविश्वः।विलासोहावविशेषस्तल्लक्षणं।यानेस्थाना
सदीनांनेत्रवक्त्रादिकर्मणां।उत्पद्यतेविशेषोयःसविलासःप्रकीर्त्तितइतिभरते।अथ
वाकेलिपराउत्कृष्टासर्वातिशायिनीयस्यास्तत्संबोधनंकेलिपरइत्यपि।मुग्धाश्चता
ःवध्वश्चमुग्धवध्वःमुग्धेतिनायिकालक्षणान्वितास्तासांनिचयेहरिःस्वविलासकौश
लैरखिलनागरीमनोहारीतिसकलकलाकुशलस्यतासुमुग्धासुतादृशहावाद्यनु
पत्त्यात्वयैवतस्याभिलषितक्रीडापर्याप्तेस्त्वामेवकामयतइतित्वयातत्रगंतव्यमिति

समित्यनेनचतासामालिंगनोपेक्षयातदालिंगनादराधिक्यंदर्शितं।किंचाश्वारात्
किंचितदूरेसमीपेवातस्माःप्रत्यक्षंयथास्यात्तथेति।एतदेवगीतेनप्रपंचयतिचंदने
त्यादि॥ ॥चंदनचर्चितनीलकलेवरपीतवसनवनमाली।केलिचलन्मणिकुंडल
मंडितगंडयुगस्मितशाली।हरिरिहमुग्धवधूनिकरेविलासिनिविलसतिकेलिपरे
।ध्रुवपदं॥रामगिरिरागेणगीयते॥रागलक्षणं।स्वर्णप्रभाभास्करदूषणाचनीलं
निचोलंसुतनौवहंती।कांतोपदोपांतमधिश्रितेपिमानोन्नतारामकरीप्रदिष्टेति॥ता
ललक्षणं।प्रागुक्तं।गीतार्थस्तु।देविलासिनीविलासशीलेऽहट्टदावनेमुग्धवधूनिक
रेसुंदरवधूनिचयेहरिर्विलसति।क्रीडांकरोति।कीदृशेवधूनिकरेकेलिपरे।क्रीडाप

नावः।मुग्धायालक्षणं।शृंगारतिलके।मुग्धानववधूस्तत्रनवयौवनभूषिता।नवानं
गरहस्यापिलज्जाप्रायरतिर्यथेति।किंच।कृतापराधेदयितेबाष्परुद्धावलोकना॥
प्रियाप्रियोक्तौचाशक्तामानेचविमुखीसदेति।नवयौवनवक्त्रेनापि।ईषच्चलनेत्रां
तंस्मरस्मेरमुखांबुजं।सगर्वजरजोगंडमसमग्यारुणाधरं।लावण्योद्भेदरम्यांगंवि
लसद्भावसौरभं।उन्मीलतांकुरकुचमस्फुटांगकसंधिके।प्रथमंयौवनंतत्रवर्त्तमा
नामृगेक्षणा।अप्रेक्षणेमृदुस्पर्शंसहतेनोद्धतारतिं।सखीकेलिरसास्वांगसंस्कारक
लितादरा।नकोपहर्षोनजतेसपत्नीदर्शनादिषु।नातिरज्यतिकांतस्यसंगमेकिंतु
रुध्यतीतिलक्षणात्।अथवात्रदाक्षिण्यरूपोनायकगुणउक्तःतदुक्तंतत्रैव।योगोरवं

भयंप्रेमसद्भावंपूर्वयोषिति।नमुंचत्यत्यचित्तोपिज्ञेयोसौदक्षिणोयथेति।केचित्तुना
यिकास्वप्यनेकासुतुल्योदक्षिणउच्यते।इत्यत्रतुनघटते।श्रीराधायामनुरागतिश
यश्रवणात्।यथा॥सर्वगोपीषुसैवैकाविष्णोरत्यंतवल्लभेति।पाद्मे।श्रीभागवते।अ
नयाराधितोनूनंभगवान्हरिरीश्वरः।यन्नोविहायगोविंदःप्रीतोयामनयद्रहइति।
राधायामाधवोदेवोमाधवेनैवराधिकाविभ्राजंतेजनेष्वद्धाइतिरुक्परिशिष्टेच॥ज
नेषुसर्वगोपीजनेष्वित्यर्थः।तदेवंसंगतिः।प्रथमेह्नितयासहविलासंसमाप्यद्विती
येहनितत्संकेतिताभिसारेतस्याएवसौभाग्यातिशयपोषणायविविधरसवैचित्रीस
मुदायोदयायनित्यमेवश्रीभगवतःसेवांकुर्वाणस्यपरिपूर्णशृंगाररसस्ययोगात्मिलि

तेनायकरत्नगुणाकृष्टेगोपीगणेतद्गुणाकृष्णचित्तोपितद्योग्यचेष्टयातस्याःसं
गमामृतंकामयमानोपिताभिःसहक्रीडांकृतवानिति।एतद्ध्रुवपदं।अथपदानि॥
कीदृशोहरिः।चंदनेनचर्चितेअनुलिप्तेनीलकलेवरेश्यामशरीरेपीतवसनंपीत
वस्त्रंवनमालाचयस्यतादृशः।पुनःकीदृशः।केलिषुचलंतीकंपमानेयेमणियुक्तेकुं
डलेताभ्यांमंडितमलंकृतंगंडयुगंकपोलयुग्मंयस्य।स्मितेनईषद्धसितेनचशाली
शोभमानःस्मितलक्षणंतुभरते।ईषद्विकसितैर्गंडैःकटाक्षैःसौष्टवान्वितैः।अलक्षि
तद्विजंधीरमुत्तमानांस्मितंभवेदिति।तथाचश्वेतचंदनपीतांबरविविधपुष्पमाल
यास्मितेनचश्यामशरीरोचितवेषेणतच्चित्तप्रलोभनायशोभातिशयित्वंकथितमि

तिभावःमुग्धानांचेष्टितमाह।पीनेत्यादि॥ ॥पीनपयोधरभारभरेणहरिंपरिरभ्यस
रागं।गोपवधूरनुगायतिकाचिदुदंचितपंचमरागं॥३॥ ॥काचित्गोपवधूःपीनपयो
धरभारभरेणमांसलस्तनगौरवातिशयेनसरागंसानुरागंयथास्यादेवंपरिरभ्यालिं
ग्यउदंचितःऊर्ध्वंश्चितःपंचमाख्योरागोयत्रएवंयथास्यात्तथाअनुगायतिअनुप
श्चात्तद्देर्गानानंतरंगायंतिउदंचितपंचमरागोयथास्यात्तथेतिवा।अत्रपीनपयो
धरेत्यादिनासौंदर्यंप्रतिपादितंमुग्धत्वंचतस्यपरिरंभणोद्यमंविनैवस्वयमेवैव
प्रथमंपरिरंभणात्अन्योन्यरक्ततेपरिरंभेद्विशृंगारःपुष्टोभवतितदुक्तंदशरूपके
।रम्यदेशकालाकालवेषभोगादिसेवनैः।प्रमोदात्मारतिःसेवयूनोरन्योन्यरक्तयोः॥प्र ५१

ह्यष्यमाणःशृंगारोमधुरंगविचेष्टितेरिति।किंचाह्लस्यानुगानेनगीतिश्चिह्नापि
वृनेतिध्वनितंसमश्चिह्नयैवरसोत्पत्तिःनद्यथा।काचित्समंमुकुंदेनस्वरजातीर
मिश्रिताःउन्निन्येपूजितातेनप्रीयतासाधुसाध्विति।तदेवध्रुवमुन्नित्येतस्यैमानंच
बकदात्।इति।श्रीभागवते।अथवासरागमित्यादिहरेर्विशेषणंकीदृशंहरिंस
रागंरागेणतवसंभोगेस्वजितसिंहरादिनासद्वर्त्तमानःसरागस्तत्वयिसानुरा
गंसरागमितिवा।तत्रहेतुमाहपुनःकिंलक्षणंउदंचितपंचमरागं।उदंचितःआता
रविधिऊर्ध्वनीतःपंचमःस्वरोयेनतादृशंतदुक्तंभरतेन।मध्यंपंचमभूयिष्ठंह्यस्य
शृंगारयोर्भवेदिति।शृंगारेपंचमःस्वरोबाहुल्येननभवतीतित्वदनुरागेणत्वदाका

नसंकेतेनैवगायतीतिभावः।अथवा।पंचमेउदंचितोअनुरागोयेनतादृशस्तं।उ
क्तंच।निषादर्षभगांधारखड्गमध्यमधैवताः।पंचमश्चेतमीसप्ततंत्रीकंठोत्थिताःस्वरा
ः।निषादंहेखतेवाजीगावस्त्वृषभभाषिणः।अजाऽविकंतुगांधारंधैवतंवृहतेगजः।खड्गं
मयूराब्रुवतेमृगामध्यमभाषिणः।पुष्पसाधारणेकालेकोकिलोरौतिपंचमं।क्वचि
च्चखड्गंवदेन्मयूरोऋषभंवातकोवदेत्।दुर्दुरोधैवतंचैवनिषादंचवदेद्गजः।इति।हा
स्यशृंगारयोर्ज्ञेयौस्वरौपंचममध्यमौ।खड्गऋषभतथाज्ञेयौवीरेरौद्राद्भुतेरसे।गांधा
रश्चनिषादश्चकर्त्तव्यौकरुणारसे।धैवतश्चैवकर्त्तव्योबीभत्सेचभयानके।भैरवःपं
चमोमेघःमल्हारोगौडुमालवः।देशाषश्चेतिखड्गागाःप्रोच्यंतेलोकविश्रुताः।सप्तस्व

रास्त्रयोग्रामामूर्छनाश्चैकविंशतिः।श्रुतीनांद्वाविंशतिश्चैवतानाःपंचाशदूनकाःइति।
एवंतद्रागमोहितायास्तवसंभोगविह्नितेनत्वत्संकेतंगायतासहालिंगनानुगानेनतस्या
ःमौग्ध्यंस्फुटमेवकथितमितिभावः।तथाच।स्त्रियोहिगीतेनमोहिताभवंति।तदुक्तं।।गो
प्यस्तद्गीतमाकर्ण्यमूर्छितानाविदन्नृप।स्रंसद्दुकूलमात्मानंस्रस्तकेशस्रजंततः।इतिश्री
भागवते।श्रुतिश्च।अपक्रम्यातिष्ठततद्रोहितोजन्मतेदेवाअब्रुवन्नपयुष्मदक्रमीन्ना
स्यानुपावर्त्तते।विह्वयामहाइतिब्रह्मगंधर्वाअवदन्नागायन्देवाःसादेवानुगायत
उपावर्त्तत।तस्माद्गायंतंस्त्रिषुकामयतेकामुकाएनंस्त्रियोभवंतीति।श्रीराधायाअग्रेत
स्याअगौरवसूचनायकाचिदित्युक्तं।पंचमोरागभेदेस्यात्पंचानामपिपूरणे।पंचम

श्चतुरेऽद्येपंचमःपांडवोस्त्रियामितिविश्वः॥२॥ ॥कापीत्यादि॥ ॥कापिविलासविलोल
विलोचनखेलनजनितमनोजंध्यायतिमुग्धवधूरधिकंमधुसूदनवदनसरोजं॥३॥॥
कापिमुग्धवधूःमधुसूदनस्यवदनसरोजंमुखपद्मंअधिकंयथास्यात्तथाध्यायतिचिं
तयति।कीदृशं।विलासेनविलोलयोश्चलेचयोर्विलोचनयोर्यत्खेलनंतेनजनित
ःउत्पादितःमनोजःकामायेन।अर्थात्तत्स्मामेवतं।अधिकंअधिकमित्यपिमुखस्य।
विशेषणंवा।तदा।पुनःकीदृशंमुखपद्मं।अतुलावण्यास्पदमित्यर्थः।सौगंध्यादि
गुणख्यापनायमधुरस्यस्यंदनापि।कामोद्बोधत्वाच्चतापहारकत्वाच्चवदनस्यस
रोजोपमा।मधुसूदनपदेनतस्यामनुरागस्यास्थिरत्वंध्वनितं।तथाचापत्सहस्रध्या ५३

नादकौशलेनमुग्धवधूरित्युक्तं॥३॥कापिकपोलेत्यादि॥ ॥कापिकपोलतलेमिलिताल
पितुंकिमपिश्रुतिमूलेचारुचुंबनितंबवतीदयितंपुलकैरनुकूले॥४॥ ॥कापिनितंब
वतीदयितंपेष्टकपोलतलेचारुमनोहरंयथास्यात्तथाचुचुंबचुंबनंलब्धवतीकिंलक्षणं
किमपिकार्यंलपितुंमंत्रयितुंश्रुतिमूलेकर्णमूलेमिलितासंलग्नाकीदृशेपुलकैरोमां
चैःअनुकूलेप्रियानिलाषसूचकेअश्रुकेनसहमाकांतमुखचुंबनंग्रखीजनहा
स्यकरंभवतीतिव्याजेनचातुर्यंप्रमार्ष्यतदारब्धमितिभावः।अत्रापिस्वयमेवप्रथमं
चुंबनेनतस्याअधीरत्वंध्वनितं।नितंबवतीत्यनेनसौंदर्याधिक्यंचकथितं।अथवाका
पिनितंबवतीसुंदरीपरमविदग्धातवसखीश्रुतिमूलेलग्ना।किमर्थं।किमपितवसंग

मवार्त्तांपितुंकथनार्थमित्यर्थः।तदाकिंकृतवतीतदाह।दयितंपुलकैरनुकूलेकपो
लतलेचारुचुचुंबातवकथाश्रवणोदितसात्विकविकारेणत्वय्यनुगतत्वसूचकेकपो
लतलेश्रतएवचारुयथास्यात्तथाचुचुंबाश्रनुमोदनंकृतवती।श्रयंभावः।यदात
ववार्त्ताश्रवणेनापिएतादृशोभवतितदाकिंवक्तव्यं।तवसंगमानुरागस्तुतोमिल
नमेवकार्य्यं॥केलीत्यादि॥ ॥केलिकलाकुतुकेनचकाविदमुंयमुनाजलकूलेमंजु
लवंजुलकुंजगतंविचकर्षकरेणदुकूलेपा॥ ॥काचित्गोपीश्रमुंश्रीकृष्णंकेलिक
लाकुतुकेनदुकूलेपटवस्त्रेविषयेविकर्षाश्राकृष्टवती।दुकूलेगृहीत्वामुंविचक
र्षेति।केचित्योजयंति।कीदृशा।मंजुलोमनोहरोवंजुलोवेतसोयत्रतादृशोयःकुं ५४

जस्तत्रगतंतवसखीशिक्षयातासांवंचनायघाप्तं।कुत्रविचकर्षायमुनाजलकूले
यमुनायाःजलयुक्तेरोधसि।तवागमनाशयानिलीयवंजुलकुंजस्थंश्रीकृष्णंयमु
नाकूलंप्रतिक्रीडार्थंश्राकृष्टवतीत्यर्थः।श्रत्राप्यन्यानुरक्तस्यवस्त्राकर्षणादधीरत्व
व्यंगः।श्रथवाकेलिकलाकुतुकेनतेवविलासौत्सुक्येनतासांवंचनंकृत्वायमुनाज
लकूलेतटेयोवंजुलकुंजबकुलकुंजस्तत्रगतंश्रमुंकाचित्करेणदुकूलेविचकर्षे
त्यन्वयः।कुतुकेपिकुतूहलमित्यमरः।मनोज्ञेमंजुलमितिच।वंजुलोबकुलेख्यातो
वंजुलोवेतसेमतइतिधरणिः।दुकूलंक्षोमोसूक्ष्मांशुकेपि॥५॥ ॥करतलेत्यादि॥॥
करतलतालतरलवलयावलिकलितकलस्वनवंशोरासरसेसहनृत्यपराहरिणा

युवतिःप्रशशंसे॥६॥ननुगोपीभिःसहक्रीडांकुर्वतःकृष्णस्यकुत्रमय्यनुरागः॥
कथंवृथालापंकरोषीत्यतआह।स्वयमेवशृणु।काचित्युवतिःवरांगनाराधाभि
धानाहरिणाश्रीकृष्णेनप्रशशंसेस्तुता।कीदृशी।रासरसे।राससमूहोरासःसचासौ
रसश्चतस्मिन्रासरसे।बहुनर्त्तकनर्त्तकीनांनृत्यविशेषोरासःतस्मिन्योरसःसंगी
तकौशलेनचमत्कारविशेषस्तत्रवासहनृत्यपरा।कृष्णेनसहतुल्यंनृत्यती।कीदृशे
रासरसेकरतलयोस्तालेनपरस्परंवादनेनतरलाचंचलायावलयावलिःकंक
णपंक्तिःतयाकलितोमिश्रितःकलस्वनःअव्यक्तमधुरशब्दस्तत्सहितोवंशोवेणुर्य
त्रतादृशे।अयमभिप्रायः।श्रीराधांविनाऽन्ययुवतिगणेरासोत्सुकेसतिश्रीकृष्णः

पूर्ववृत्रप्रस्तावेनश्रीराधिकास्तोत्रेणाखिलगोपीगणंतिवर्त्तयतीति।अथवारासरसे
रासानुरागेसतिसहनृत्यपरायुवतिःहरिणाप्रशशंसे।कस्मिन्करतलतालतर
लवलयावलिकलितकलस्वनवंशे।संप्रतितत्करतालमिलितेवेणुकलध्वनौकेना
पिसंकेतेनतवस्तुतिकरोत्येव।ताभिर्नलक्ष्यते।अतस्तासांमौग्ध्यमितिभावः।द्रुमभे
देकरास्फालेतालंतुहरितालकइतिविश्वः।तरलश्चंचलेखड्गेहारमध्यमणावपीति
वंशोवेणौकुलेवर्गेपृष्टस्यावयवेपिच।रासरसस्तुरासेस्यादितिच।रासस्तुगोदुहा
क्रीडेतिहारावली।६।श्लिष्यवतीत्यादि॥ ॥श्लिष्यतिकामपिचुंबतिकामपिकामपिर
मयतिरामं।पश्यतिसस्मितचारुपरामपरामनुगच्छतिवामां॥७॥ ॥कामपिरामाक्री

डाशीलांश्लिष्यतिआलिंगती।कामपिचुंबति।कामपिमधुरवचनादिनारमयतिक्री
डयति।सकृष्णःस्मितेनईषद्धसितेनचारुयथास्यात्तथाऽपरांगोपीपश्यति।एवंतास्व
भिसृतासुदाक्षिण्येनालिंगनादिकदृष्ट्वारोषेणगछंतीअपरांवामांवक्रस्वभावांमनो
हरस्वभावांवातवसखींअनुगछतिअनुनयार्थमनुगतिंकरोति।अथवाएवंस्मि
तावलोकादिमात्रेणतासांवंचनंकृत्वामनुगछतिअनुनर्थार्थमभीसरतीत्यर्थः।अ
तएवत्वय्येवतस्यानुरागःअतोसंगमार्थंविलंबंमाकृथाइतिभावः।सुंदरीरमणी
रामेत्यमरः॥७॥श्रीजयदेवेत्यादि॥ ॥श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरह
स्यं।विपिनविनोदकलावलितंवितनोतुशुभानियशस्यं॥८॥ ॥श्रीजयदेवकवेरि

दंसर्वस्वरूपंगीतंशुभानिवितनोतुविस्तारयतु।कीदृशंअद्भुतकेशवस्यकेलिरहस्यं
क्रीडाकौशलंयत्रतादृशं।राधारताकृष्णस्याप्यनेकविलासवतीनामनुरंजकत्वाद
द्भुतत्वं।केशवपदेनसौंदर्यंचकथितं।पुनःकीदृशं।विपिनविनोदकलयावनवनवि
हारकौशलेनवलितंसंयुक्तं।पुनःकीदृशं।यशःस्यंयशःप्रदंवृंदावनविपिनेललित
मितिपाठेतदाइदंललितंगीतंशृंगारचेष्टितंइतिवा।वृंदावनेद्भुतकेशवकेलिरहस्यं
वा।८।४।अत्राभिसारिकाएवनायिका।धृष्टदक्षिणानुकूलशठश्चनायकः।तत्रकाम
पिरमयतिरामांसरागमित्यनेनधृष्टः।तद्यथा।अभिव्यक्तान्यतरुणीभोगलक्ष्मापि
निर्भयः।मिथ्यावचनदक्षश्चधृष्टोयंखलुकथ्यते।दक्षिणस्तुकथितःप्राक्।शठस्तुयथा

प्रियंवक्तिपुरोऽन्यत्रविप्रियंकुरुतेभृशं।निगूढमपराधंचशठोयंकथितोबुधैः।मंजुलवं
जुलकुंजगतिमितिरमयतिरामांचेत्यनेनोक्तः।अपरांवामामनुगछतीत्यनुकूलश्च।
कथितः।तल्लक्ष्यणंवक्ष्यतेग्रे।श्रीराधायामनुकूलोयंसदा।धीरोदात्तानुकूलताप्य
स्यात्रसंघटते।तद्यथा।कुवलयदृशःसंकेतस्थादृगंचलकौशलैर्मनसिजकलानाटी
प्रस्तावनामभितन्वतां।नकिलघटतेराधारंगप्रसंगविधायिताव्रतविलसितेशै
थिल्यस्यछटाप्यद्यविद्विषः।यद्यपिधीरललितानुकूलोयंनायकः।तथापिसर्वेनाय
कगुणाःश्रीराधारसपोषणायतत्तद्भावैःश्रीकृष्णेसंभजंति।ननुसकलकलाभिज्ञः
श्रीकृष्णःकथंहावाद्यनभिज्ञाभिर्गोपीभिःसहकेलिंकृतवानित्यतआह॥ ।विश्वेषा

मित्यादिना॥ ॥विश्वेषामनुरंजनेनजनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलै
रुपनयन्नंगैरनंगोत्सवं।स्वछंदंव्रजसुंदरीभिरभितःप्रत्यंगमालिंगतःशृंगारःस
खिमूर्त्तिमानिवमधौमुग्धोहरिःक्रीडति॥१२॥हेसखिराधेमधौवसंतेमुग्धोमनोह
रोहरिःक्रीडति।किंकुर्वन्विश्वेषांगोपीजनानांसर्वेषांप्राणिनांवाअनुरंजनेनआनं
दंजनयन्।पुनःकिंकुर्वन्।इंदीवराणांनीलकमलानांयाश्रेणीपंक्तिस्तद्वत्श्यामलैर्नि
र्मलैःकामलैःसुकुमारैरंगैरवयवैः।अनंगस्यकामस्यउत्सवंउपनयन्नुपस्थापयन्स्वा
वयवांशःभूतैरवयवैस्तस्यापिसांगीकरणात्।सौकुमार्य्यंचकोमलस्यापिस्पर्शासह
तोच्यते।तदुदाहृतिःप्राकृतैव।अंगैरितिसौंदर्यंकथितं।तदुक्तं।अंगप्रत्यंगकानांयःस

न्निवेशोयथोचितं।सुश्लिष्टसंधिबंधःस्यात्तत्सौंदर्यमुदीर्यते।इतिकीदृशौहरिः।अभि
तःसर्वतःबाह्यैरवयवैअंतश्चेतसाउभयतःप्रत्यंगंअंगंअंगंप्रतिस्वछंदंयथास्यादेवं
व्रजसुंदरीभिरालितः।कइव।मूर्त्तिमान्।शरीरीशृंगारइव।शृंगाररसइव।तथाचशृं
गाररसस्यश्यामलत्वात्श्रीकृष्णसादृश्यं।तदुक्तंभरते।श्यामोभवतिशृंगारःसितोहा
सःप्रकीर्त्तितइति।यथामुग्धोमनोहरोशृंगारोरसोमधौवसंतेक्रीडति।सर्वत्रविलस
ति।किंकुर्वन्।अनुरंजनेनयुनोःपरस्परानुरागजननेनविश्वेषांप्राणीनांआनंदंज
नयन्पुनःकिंकुर्वन्।अंगैःशृंगाररसस्यांगभूतैःकटाक्षादिभिरनुभावैरोमांचादि
भिश्चसात्विकभावैःशंकासूयादिभिःसंचारिभावैश्चअनंगोत्सवंउपनयन्नकेवल

मेतैःविभावैरपीत्याह।इंदीवरेत्यादि।इंदीवरश्रेणिभिःनीलोत्पलपंक्तिभिःश्याम
लैःगाढांधकारनीलनिचोलतमालवनादिभिःकोमलैश्चमृदुशय्यादिभिःअत्रहेतु
गर्भविशेषणमाह।स्वछंदमित्यादि।स्वछंदंयथास्यादेवंव्रजसुंदरीभिःअंगंअंगंप्र
तिआलिंगितःआश्रितःशृंगाररसस्यांगानांविभावादीनांमध्येकयाचित्तांबूलस्रक्
वंदनाद्युद्दीपनविभावरूपंकयाचित्सस्मितकटाक्षाद्यनुभावंरूपंकयाचिच्चशंकासू
यादिसंचारिभावरूपंकयाचिच्चरोमांचस्वेदादिसात्विकभावरूपंशृंगाररसस्याग
माश्रितमितिभावः।विभावादीनामंगत्वंप्रतितुभरतः।विभावैरनुभावैश्चभावैःसं
चारिसात्विकैःजनितोबोधितःस्फीतोवृद्धःशृंगारइष्यतइति।विभावसामान्यलक्षणं

उरसरत्नदीपिकायां।भावयतिविशेषेणयेरसान्भावेमनोहरान्।तेविभावास्तुकथ्यंते
नाट्यशास्त्रविशारदैः।तत्रशृंगारविभावानरतेनोक्ताः।ऋतुमाल्यालंकारैर्वियजनगां
धर्वकाव्यसेवाभिः।उपवनगमनविहारैःशृंगाररसःसमुन्नयति।अनुभावस्सामान्यज
ञाणंक्रियतेयैःरसाःसम्यक्लोकानुभवगोचराः।तेनुभावास्तुकथ्यंते।नाट्यशास्त्रवि
शारदैः।तत्रशृंगारानुभावाः।नयनवदनप्रसादैःस्मितमधुरवचोधृतिप्रमोदैश्च।मधुरै
श्चांगविकारैस्तस्याभिनयःप्रयोक्तव्यः।व्यभिचारिसामान्यलक्षणंदर्शरूपकोविशेषा
दाभिमुख्येनचरंतोव्यभिचारिणः।शृंगारतिलकोशंकासूयानथास्रानिःव्याधिश्चिं
तास्मृतिधृतिःव्रीडौत्सुक्यंविस्मयोहर्षोव्रीडोन्मादौनयंतथा।।विषादोजडतोन्निद्रावहि ५९

त्थाचापलंमतिः।इतिभावाःप्रयोक्तव्याशृंगारेव्यभिचारिणइति।सात्विकभावाशृंगा
रतिलकोस्तंभस्वेदोथरोमोच्चस्वरभंगोथवेपथुः।वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्वि
काःस्मृताइति।एतेषामवांतरलक्षणानिग्रंथगौरवभयान्नलिख्यंते।अत्रसकलक
लानिज्ञस्यापिव्रजसुंदरीभिः।सहतत्तदनुसारेणक्रीडतःकृष्णस्यनहत्वहानिः।ता
सांतथैवानुरंजनात्।अतएवविश्वेषामनुरंजनेनेत्यनेनविश्वानुरंजकत्वंकृष्णस्योक्तं
तेनचतासुसाधारणप्रेमकथनेनतस्याएवोत्कर्षःकथितइतिभावः।अथवाहेस
खि।तवानुरंजनेनप्रीत्युत्पादनेनविश्वेषांसर्वेषांसखीजनानांनः।आनंदंजनयनक्री
डतीत्यर्थः।स्त्रीसंयोगेनास्मिन्ननुसूयानकर्तव्येतिभावः।स्वातंत्र्येणालिंगितत्वाततस्य

तुतवालिंगनेप्रीतिरितिभावः।अन्यत्समानं।शृंगारःसुस्वरेनाट्येरसेचगजमंडनेइतिवि
श्वः।विश्वसर्वंभवश्चापीतिच।इंदीवरंतुनीलेस्मिनित्यमरः।कालःश्यामलमेचकाइति
च।मूर्त्तिःकाठिन्यकाययोरितिच।पुंसःस्त्रियांस्त्रियाःपुंसिसंभोगंप्रतियास्पृहा॥स
शृंगारइतिप्रोक्तोरतिक्रीडादिकारणं।इति।तथाचव्रजसुंदरीभिरभितःप्रत्यंगमा
लिंगितइत्यनेनाभितःसर्वतःयदंगंयाआलिंगितवती।तदंगमाधुर्यातिरेकात्सा
त्यक्तुंसमर्थानबभूवेतिभावः।उक्तंचसाक्षान्ममथमन्मथः।काचित्करांबुजंशौरेर्ज
गृहेंजलिनामुदेत्यादि।स्वच्छंदमितिच।यथेष्टविलासास्पदत्वंचतस्यकथितं॥१२॥
इदानींसर्गांतकविराशिषंप्रयुंक्ते।रासोल्लासेति॥ ॥रासोल्लासभरेणविभ्रमभृ

तामाभीरवामभ्रुवामभ्यर्णंपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया॥साधुत्वद्वदनंसु
धामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः॥१३॥
श्रीहरिःकृष्णःवोयुष्मानपातुरक्षतु।किंभूतोहरिःस्मितेनमंदहसितेनैवान्यनारीणां
मनोहर्त्तुंशीलमस्यसतथा।पुनःकिंभूतःराधयाउद्भटंप्रकटमेवयथास्यात्तथाचुंबि
तः।किंकृत्वा।आभीरवामभ्रुवांगोपसुभ्रुवामभ्यर्णेसमीपेउरोवक्षःनिर्भरंगाढंयथा
भवत्येवंपरिरभ्यालिंग्य।किंलक्षणानागोपांगनानांरासेरासक्रीडायांउल्लासभरेण
हर्षातिशयेनविभ्रमभृताविलासवतीनांविभ्रमभृतनश्यतीति।ननुभवतु।तासुविभ्र
मः।प्रत्यक्षंयुवतिगणंपश्यंत्यातयाकथंचुंबितस्तत्राह।प्रेमांधया।प्रेम्णाहर्षातिशयेन

अंतया।श्रीकृष्णंविनाऽन्यन्नपश्यतीतितथा।लज्जाजनकस्यद्वितीयस्यादर्शनादेवनि
र्भरमालिंग्यचुंबनंकृतवतीतिभावः।तत्रापिनकेवलंग्राम्यतयाएवंकृतवतीकिंतुस
चातुर्यमित्याह।त्वद्वदनंत्वन्मुखंसुधामयममृतमयंसाधुशोभनमितिव्याहृत्यउक्त्वा
गीतस्तुतिव्याजातगानप्रशंसाछलेन।यद्गीतममृतमयंत्वद्वदनं।सुधातिधानमिति
साधुयुक्तमेतदिदिति।चातुरीमारचय्यचुंबनंकृतवतीतिभावः॥१३॥ ॥इतिश्रीगी
तगोविंदेसामोददामोदरोनामप्रथमःसर्गः॥ ॥१॥ ॥पूर्वसर्गेऽभिलाषचिंतारूपां
दशांनिरूप्येदानींस्मरणरूपांदशांवर्णयति।तल्लक्षणंवर्ण्यते।तत्तद्वचनैःसख्याप्रे
रितापिराधासमक्षमन्याभिःसहवर्त्तमानंकृष्णंद्रष्टुमसहमानाक्वचित्कुंजांतरेगत्वा

सखीमाह॥ ॥विहरतीत्यादि॥ ॥विहरतिवनेराधासाधारणप्रणयेहरौ॥विगलित
निजोत्कर्षादीर्षावशेनगत्वान्यतः।क्वचिदपिलताकुंजेगुंजन्मधुव्रतमंडलीमुखरशि
खरेलीनादीनाप्युवाचरहःसखीं॥१४॥श्रीराधासखींरहोपिगोप्यमपिवक्ष्यमाणमुवा
च।कृतवती।कीदृशीसाईर्षावशेनासहिष्णुतयाअन्यतःअन्यत्रगताईर्ष्यायांहेतुमाह॥
विगलितेत्यादि।विगलितनिजोत्कर्षातविगलितोगतोनिजःस्वीयःउत्कर्षोऽहमेवा
स्यातिप्रणयिनीत्येवंरूपंतस्मात्अन्यस्त्रीभ्योनिजातिरेकापगमादित्यर्थः।क्वसति
।हरौकृष्णेवनेविहरतिसति।कीदृशेहरौ।साधारणोराधायामन्यगोपांगनासमानःप्र
णयःप्रेमायस्यतादृशे।असाधारणप्रणयेइतिवा।अनुलितप्रेमवतीत्यर्थः।अतोदीनादुःखि

अ॰टी॰
६२

ता।पुनःकीदृशी।क्वचिदपिलताकुंजेलताभिरितिनिविडे।कुंजेलीना।अदृश्यतयैवस्थि
ता।कीदृशेकुंजेगुंजंतःशब्दायमानाःयेमधुव्रताःभ्रमरास्तेषांमंडलीपंक्तिस्तयामुखरं
वाचालंशिखरमग्रभागोयस्यतादृशेअत्रकुंजेनैवलताछादितगृहप्राप्तौलतापदमि
तिनिविडत्वसूचनाय।प्रणयःप्रेम्णिविश्रम्भइतिविश्वःईर्ष्यामाहुःसमानेषुमानदा
नादमर्षण।तथाच।भ्रमराणांशब्देनाधिकभावोद्रेकःकथितइतिभावः।ईर्ष्यावशे
नेत्यनेनव्यभिचारिभावानांप्रवेशःकथितः॥१४॥किमुवाचेत्यतआह॥संचरइत्या
दि॥ ॥संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं।चलितदृगंचलचंचलमौलि
कपोलविलोलवतंसं।रासेहरिमिहविहितविलासं।स्मरतिमनोममकृतपरिहासं॥॥ ६२

ध्रुवपदं॥ ॥गीतस्यास्यगुर्ज्जरीरागः॥ ॥तालस्तुप्रतिमंठः॥ ॥रागलक्षणं।प्राक्कथि
तं।ताललक्षणंतु।तारश्चाप्यपरश्चैवविचारश्चकुंदसंज्ञकः।चत्वारःकथिताह्येतेप्रति
मंठाविचक्षणैः।विरमांतंद्रुतद्वंद्वंगुरुश्चैकस्ततःपरं।सुरंगतालेगातव्यस्तारस्तुप्रति
मंठकः।गुरुरेकोभवेद्यत्रसन्निपातःसकथ्यते।अपरःप्रतिमंठोसौविद्वद्भिस्तेनगी
यते।लघुद्वयंविरामांतंतालेकंदुकसंज्ञके।विचारोगीयतेतेनविलंबश्चलयोभवेत्॥
द्रुतमेकंभवेद्यत्रसतालःखंडसंज्ञकः।द्रुतलयेनगीतव्यःकुंदश्चप्रतिमंठकः।सुरंगः
सन्निपातःकंदुकःखंडः।इतिप्रतिमंठश्चतुर्विधः।श्रीराधायाःसुष्ठुरंगंवर्णनात्सुरंगा
यंप्रतिमंठकः।अपरेऽग्रिमप्रबंधेषुज्ञेयाः।गीतार्थःस्तु।हेसखिममममनोहरिंचित्तचौरं

कृष्णंस्मरतिगोचरंकरोति।पूर्वानुभूतविषयत्वात्।कीदृशं।इहवनेरासक्रीडायांवि
हितविलासं।विहितःकृतोविलासोमयासहक्रीडायेनतादृशं।पुनःकीदृशं।कृतःपरि
हासोनर्मकेलिर्येनसतथातं।अथवाअन्यगोपागनानांकृतपरिहासंयथास्यात्तथाम
यासहविहितःविविधविभ्रमोयेन।तादृशंहरिंचित्तचौरंइहलताकुंजेलीनायाअपिम
ममनःस्मरति।अथवाविहितःकृतोममविलासःविभ्रमोयेनातिरसावहानुरागेणम
त्तःकारितइत्यर्थः।तदुक्तं।अधीनस्यापिसेवायांकांतस्यानभिनंदना।विभ्रमोवामतो
द्रेकात्स्यादित्याख्यातिकश्चन।तद्यथा।त्वंगोविंदमयासिकिंतुकबरीबंधार्थमभ्यर्थि
तः।क्लेशेनालमबद्धएवचिकुरस्तोमोमुदंदोग्धिमे।वक्त्रस्यापिनमार्जनंकुरुघनंघर्मा

बुमेरोचते।नैवोत्तंसयमालतीर्ममशिरःखेदंभरेणास्यति।इतिरसामृतसिंधौस्त्रीणां
विलासविवेकविभ्रमाललितंतथा।हेलालीलेत्यमीभावाःक्रियाःशृंगारभावजाइत्य
मरः।तयाचस्मरतीत्यनेनाष्टसंभोगेछैवध्वन्यते।यतस्तस्याष्टविधस्यस्मरणमेवसा
धनं।तद्यथा।स्मरणंकीर्त्तनंकेलिप्रेक्षणंगुह्यभाषणं।संकल्पोध्यवसायश्चक्रियानिवृ
त्तिरेवच।एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः।विपरीतंब्रह्मचर्यमेतदेवाष्टलक्षण
मिति।तत्रकेलिस्मानसीक्रीडा।दिदृक्षयाप्रकर्षेणेक्षणंप्रेक्षणं।कथंमिलिष्यतीति
विचारः।संकल्पः।अध्यवसायःमिलननिश्चयःसुरतसुखप्राप्तिःक्रियानिवृत्तिः।केचि
त्तुइहरासेइतिव्याकुर्वंति।तत्तुनसमीचीनंअनुपपत्तिग्रस्तत्वात्।इहपदार्थस्यप्रत्य

क्षेशक्तत्वात्। तदुक्तं भट्टैः। इदमः प्रत्यक्षगतमिति तस्मान्न चात्र रासः प्रत्यक्षस्तस्या
तीतत्वात्। राधायाश्च लताकुंजे लीनत्वात्। न तद्विना रासस्यासंभव इति। एतच्च ध्रुव
पदं॥ उत्तमा मध्येयं नायिका। तल्लक्षणं। दोषानुरूपकोपायाऽनुनीता च प्रसीदति।
रज्यते च भृशं नाथ गुणहार्योत्तमा यथा। कांते किं कुपितासि कः परजने प्राणेश कोपो
भवेत्। कोयं सुभ्रु परस्त्वमेव दयिते दासोस्मि कस्ते परः इत्युक्त्वा प्रणतः प्रियः क्षिति
तलादुत्थाप्य सानंदया नेत्रांभःकणिकांकितस्तनतटे तन्व्या समारोपितः। इति शृंगा
रतिलके। यथा वा। कर्तुं शर्म क्षणिकमपि मे साध्यमुद्गत्य शेषं चित्तोत्संगेन भजति मया
दत्तखेदाप्यसूयां। श्रुत्वा चांतर्विदलति मृषाप्यार्त्तिवार्त्तालवं मे राधामूर्द्धन्यखिलसुदृ

शां राजते सद्गुणेनेति। किंच। समानलज्जामदनाप्रोद्यत्तारुण्यशालिनी। किंचित्प्रग
ल्भवचना मोहांतसुरतक्षमा। मध्यास्यात्कोमलाक्वापि माने कुत्रापि कर्कशेति। अथप
दानि। कीदृशं। हरिं। संचरता तानप्रतानक्रमेण स्फुरता अधरेण ओष्ठेन सुधामधुरध्वनि
र्मुखरितो वादितो मोहनवंशः परमहर्षकारी वेणुर्येन तादृशं। अथवा संचरंत्या संक्रम
माणया अधरसुधया मधुरो ध्वनिर्यत्र तद्यथा स्यात्तथा मुखरितो मोहनाख्यो वेणुर्येन
तादृशं। संचरदधरसुधामधुरध्वनीति क्रियाविशेषणं। क्रियाः व्ययविशेषणानां। क्ली
वत्वमेकवचनांतं वाच्यमिति। तदुक्तं। रंध्रान्वेणोरधरसुधया पूरयन्निति। कास्त्र्यंगते
कलपदामृतवेणुगीतसंमोहितार्यचरितात्र चलेदिति च। यथा वा। सत्यं शृणोमि नित्य

नवप्रियोसौगोपस्तथापिहृदयंमदनोदुनोति।युक्त्याकथंचनशमंगमितेपित
स्मिन्मांतस्यकालमुरलीकवलीकरोतीति।तद्वंशरवेणमोहितंममममनःसांप्रतंकृ
तापराधमपितंस्मरतीतिभावः।पुनःकीदृशं।चलितःकेनापिभावविशेषेणसत्संमा
ननायघूर्णितोदृगंचलोपांगोयत्रएँयथास्यात्तथा।चंचलोदोलायमानोमौलिःशेषरो
यस्यकपोलयोर्विलोलौचंचलौकर्णाभरणेचयस्य।अनेनैवशिरःकंपदोषंविनैवशेष
रकुंडलचालनेनवादकवैचित्रीकथिता।यथावाधरसुधापादोपादानात्तदाननस्य
चंद्रादप्यानंदकरत्वंद्योतितं।पुंस्युत्तंसावतंसौद्वौकर्ण्यपूरेवशेखरतइति।वतंसः
अवतंसःवष्टिभागुरिरल्लोपइत्यवस्यावकारलोपः।१ननुव्यासंगिनासविस्मार्यता

तामित्यादिह।चंद्रकेत्यादि॥ ॥चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं॥
प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं॥२॥ ॥चंद्रकेनविचित्रवर्णचिह्नि
तेनाग्रभागेनचारूणांमनोहराणांमयूरशिखंडकानांमयूरपिछानांमंडलेनसमू
हेनवलयिताःवेष्टिताःकेशायेनतादृशं।तथाचात्रमयूरादिदर्शनेनापितस्यैवस्म
रणंभवतीतिध्वनितंपुनःकीदृशं।प्रचुरैर्बहुलैःपुरंदरधनुभिरनुरंजितःचिह्नितोयो
मेदुरःसांद्रस्निग्धोमुदिरोमेघस्तद्वत्शोभनोवेशआकृतिर्यस्यतादृशं।अत्रनाना
मणिखचितहारमुकुटकेयूरादीनामिंद्रधनुर्भिःसाम्यंश्रीकृष्णस्यचमेघसाम्यंबोध्यं
इयंचाभूतोपमा।प्रचुरपुरंदरधनुरनुभिरनुरंजितस्यमेघस्याप्रसिद्धेः।अथवाकेशा

नांकृष्णस्यवामेघसाम्यंशिखंडिकानांधनुर्भिःसाम्यं।वनमालाकृष्णयोर्वासमौ।चंद्रक
मेचकावित्यमरः।बर्हिकंठसमंवर्णमेवकंब्रुवतेबुधाइतिकाव्यः।शिखंडस्तुपिछबर्हेन
पुंसकइत्यमरः।वेष्टितंस्याद्वलयितंमित्यपि।मुदितःकामुकेबुदेंइतिविश्वः।मुदिरोजल
दःप्रोक्तोमुदिरोहर्षसंमतइत्यनेकार्थः।वेशोवेश्यागृहेप्रोक्तोनेपथ्येगृहमात्रकइत्य
पि।२।गोपेत्यादि॥ ॥गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं।बंधुजीवमधुराध
रपल्लवमुल्लसितस्मितशोभं॥३॥ ॥गोपकदंबस्याभीरसमूहस्ययानितंबवत्यःप्र
शस्तनितंबशालिन्यःस्त्रियस्तास्यांमुखचुंबनेनलंभितःप्रापितःलोभोयनतं।अथवा
गोपकदंबनितंबवतीनांमध्येममुखचुंबनेलंभितःलोभोयेनतंलंबितेतिपाठेलंबि

तोलंबीरकृतःविस्तारितइत्यर्थः।गोपकदंबनितंबवतीभिर्मुखचुंबनेलंभितःप्रापितो
लोभोयस्यतमितिवा।तस्यतु।प्रणयोमय्येवस्वाभावाविकस्ताभिर्बलान्कारितइतिभाव
ः।पुनःकीदृशं।बंधुजीवपुष्पवत्मधुरोमनोहरोऽधरपल्लवःपल्लवाकृतिरधरोयस्य।
तं।अथवाबंधुजीवयतीतिबंधुजीवःप्रियजनस्यजीवनंअमृतनिधानत्वात्।सचासौ
मधुरोऽधरपल्लवोयस्यतं।मधुरपदेनसरसतापल्लवपदेनकुसुमाकरताऽरुणता
चकथिता।उल्लसितेनविकाशितेनस्मितेनशोभायस्यतं।अनेनेंदीवरेबंधकोद्भवस्त
त्रकुंदोदयउपमीयते।तथाचबंधकादिभिःसएवस्मार्यतइतिभावः।रक्तकस्तुबंधूकोबं
धुजीवकइत्यमरः।सरसोपिमधुरःप्रोक्तोमधुरोथमनोहरइत्यनेकार्थः॥३॥विपुलेति।

विपुलपुलकनुन्नपद्मवलयितवल्लवयुवतिसहस्रं।करश्चरणोरसिमणिगणन्यू
षणकिरणविनिन्नतमिस्रं॥ध॥ ॥विपुलो विस्तीर्णः पुलको रोमांचो यत्रताहशान्यांनु
न्नपद्मवान्यांपद्मवतत्कोमलान्यांबाहुभ्यांवलयितंवेष्टितंवल्लवयुवतीनांआभीरकां
गनानांसहस्रंयेनताहशं।अत्रवलयितमित्यनेनापिअवज्ञयातासांवेष्टनमात्रं॥स
रहस्यालिंगनादिकंतस्योन्मय्येवेतिध्वनितंपुनःकीदृशंकरयोश्चरणयोरुरसिचम
णिमयानिविन्यूषणानितेषांकिरणैर्विनिन्नंनाशितंतमिस्रंतमोयेनतं।अथवाकरादि
ष्ववर्त्तमानान्मणिगणान्न्यूषयंतियेकिरणास्तैर्गद्युतयस्तेरिति।अंधकारोऽस्त्रियाध्वां
तंतमिस्रंतिमिरंतमश्चेत्यमरः।अथवाविपुलःपुलकोयासांतास्ताश्चनुन्नपद्मवेनवलयि ६७

तावेष्टिताश्चएवंभूताःयावल्लवयुवतयःतान्निःसहसमकालमेवश्रवतीतिसहस्रमि
तितथाचवाजसनेयायनीयेसूत्रे।सहस्रवतीतिसहस्रमितिएवंविधिंकायुवतीनस्मरती।
तिनावःकरश्चरणयोरसिमणिगणन्यूषणैर्विनिन्नतंविशेषेणनित्यंनेदोयेभ्यःतेवि
निद्रःसपत्निरूपाशत्रवोनतायस्मात्तं।तन्यूषणैर्न्यूषितांमांदृष्ट्वासपत्नीनांपरानवोऽ
नवस्थित्यर्थः।उस्त्रमितिपावेपागंतरेणउस्त्रशब्दःकिरणवाचीततःउस्त्रंप्रकाशमान।
मित्यर्थः।केचिदेवंव्याकुर्वंति॥ ॥जलदेति॥ ॥जलदपटलचलदिंदुविनिंदकचंदनेतिलक
ललाटं।पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं॥ध॥पुनःकीदृशं।जलदपटले
सजलमेघसमूहे।चलतःसंनद्यमानस्यंदीश्चंद्रस्यविनिंदकस्तछोनातिशायीचंदनतिल

कोलललाटोयस्यतं।क्वचिज्जलदपटलचलदिंदुविनिंदकचंदनबिंदुललाटमितिपाठः
तदाजलदपटलेचलत्संचरद्यइंदुश्चंद्रस्तस्यविशेषेणनिंदकस्तीरस्कारकःचंदनबिंदु
र्मंडलाकृतितिलकोललाटेयस्यतं।पुनःकीदृशं।पीनौमांसलौकठोरौयौपयोधरौस्त
नौतयोःपरिसरस्यपर्यंतभागस्यमर्द्दनेनिर्द्दयंहृदयकपाटंकपाटवद्विस्तीर्णंहृदयंयस्य।ता
दृशंमणिमयेति॥ ॥मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं।पीतवसनमनु
गतमुनिमनुजसुरासुरवरपरिवारं॥६॥ ॥पुनःकीदृशं।मणिमयेमणिप्रचुरेमकरव
न्मनोहरेयेकुंडलेताभ्यांमंडितौगंडौयस्य।तंअथवामणिमयमकरमनोहरेकुंडलेमंडि
तेताभ्यांयादृशौकपोलौयस्यतं।तदुक्तं।भूषणभूषणांगमिति।किंच।विभूषणंविभूष्य

स्याद्येनतद्रूपमित्युच्यतइति।रूपंलावण्यमपिकथितं।मुक्ताफलेषुछायायास्तरल
त्वमिवांतरा।प्रतिभातियदंगेषुलावण्यंतदिहोच्यते।तद्यथा।शृणुसखितवकर्णेवर्णे
याम्यत्रनीचैर्विरचयमुखचंद्रंमावृथाराद्विवर्णं।इयमुरसिमुरारेरस्तिनान्यामृगाक्षी
मरकतमुकुराभेबिंबितासित्वमेवेति।रसामृतसिंधौ।अतएवमुदारंसुंदरमित्यर्थ
ः।तथाच।एतादृशंसुंदरवरंकथंनस्मरामीतिभावः।अदायंविनयंप्राहुःसर्वावस्था
गतंबुधाइति।विनयगुणयुक्तंवा।अथवामणिमयमकरमनोहरकुंडलाभ्यांमंडि
तौअलंकृतौममकपोलौयेनतं।अतएवउदारं।अदार्यगुणयुक्तं।रहसिममाभिलषितं
सर्वंतत्क्षणमेवपूरितवानितिसकथंनस्मर्यते।इतिध्वनितं।पुनःकीदृशं।पीतंवसनंव

स्त्रंयस्य।तादृशं।पुनःकीदृशं।औदार्योपपादकंविशेषणमाह।अनुगतेत्यादि।अनुग
ताआश्रितायेमुनिवराद्यसुरवरांतास्तएवपरिवाराःपरिजनायस्यतं।अथवाअनुग
तानांआश्रितानांमुनिवराद्यसुरवरांतानांपरिवारःप्रकर्षोयस्मात्तं।परिवारःपरिकरे
परिक्लेशप्रकर्षयोरितिविश्वः।द्वंद्वांतेवरपदस्यमुन्यादिपदैःप्रत्येकमभिसंबंधः।तथा
चतैरप्यधिगतत्वस्वस्वाभिमतफलैःसततंसेव्यतइतितस्यौदार्यंख्यातमेवेतिभावः।त
त्रमुनिवराःशुकनारदादयःमुनुजवराःपरीकृतादयःसुरवरायःब्रह्मरुद्रादयःअ
सुरवराःप्रह्लादादयः।अथवा।अनुगतायेमुनिमनुजसुरासुरास्तेभ्योपिवरःश्रेष्ठोगोपल
क्षणोगोपीलक्षणोवा।परिवारोयस्यतं।अथवा।अनुगतःअनुसृतःमाधुर्यभरेणाकर्षणात्मु

न्यादीनिवरपरिवारःश्रेष्ठःपरिग्रहोयंतमिति।उक्तंच।आरुंधानमरुधतीहृदयमध्यार्द्र
स्मितार्द्रश्रियेति।कास्त्रीतद्रूपेतिच।मय्यनुगतोमुन्यादीनांपरिग्रहोयस्मात्तंमितिवा।दा
नमभ्युपपत्तिश्चतथाचप्रियभाषणं।स्वजनेपिपरेचापितदौदार्यस्मृतमिति।नायकौ
दार्यगुणलक्षणं॥विशदेति॥ ॥विशदकदंबतलेमिलितंकलिकलुषभयंशमयंतं।मा
मपिकिमपितरंगदनंगदृशामनसारमयंतं॥७॥ ॥पुनःकीदृशं।विशदस्यनिर्मलस्य
कदंबस्यतलेमूलेमिलितंसंलग्नंमत्संकेतीकृतकदंबतलेमदपेक्षयाऽग्रतएवगत्वाका
चित्मामापश्यत्विति।मयासहनर्मार्थंवानिलीयस्थितं।पुनःकीदृशं।कलिःप्रणयकल
हस्तस्माद्यत्कलुषंचित्तेकश्मलंअहंसंकेतेसमागतायंनागतःप्रायशोऽन्यनारीसक्तोभ

विष्यतीति।अतःपरंयद्यायास्यतितदामयानसंभाषणीयइत्येवंरूपंएकाकिनीकथमत्र
तिष्ठामीतिचभयं।अथवा।मन्माद्यद्भयंएततद्वयंकदंबमूलादुपेत्यवादूक्तिभिःशमयंतं
।पुनकीदृशं।किमप्यनिर्वचनीयं।यथास्यादेवंतरंगततरंगइवाचरत्वारंवारंउद्गच्छन्ननं
गःकामोयत्रएतादृक्यादृक्तयादृशादृष्ट्यामनसाचमामपिरमयेंतं।यद्वा।मत्संनिधौ
विश्वस्मिन्तदंगदनंगमेवपश्यतीतितरंगदनंगदृक्तादृशेनमनसामामपिरमयं
तमित्यर्थः।मामपीत्यपिशब्देनेसोल्लुठोक्त्याअहमपितस्यकस्यचिल्लोकोत्तरप्रणयस्य
पात्रमासमिति॥ध्वनितं॥एवंभूतंकृष्णंमेमनःस्मरतीतिभावः।कलिःस्यात्कलहेशूरेक
लिंरत्ययुगेयुधीतिविश्वः।कलुषंत्वाविलैनसोरितिच॥श्रीजयदेवेत्यादि॥ ॥श्रीजयदेव

भणितमतिसुंदरमोहनमधुरिपुरूपं॥हरिचरणस्मरणंप्रतिसंप्रतिपुण्यवतामनुरू
पं॥८॥ ॥श्रीजयदेवकवेःइदंभणितंपुण्यवताश्रीकृष्णचरणस्मरणजनकपुण्यविशि
ष्टानांहरिचरणस्मरणंप्रतिश्रीराधाकथितरासक्रीडाद्याचरणंतस्यस्मरणंप्रतिसंप्रतिइ
दानींअपिअनुरूपंयोग्यंतादृशभावविशेषेणास्वादनीयमितिभावः।कीदृशं।अति
सुंदरंमोहनंगोपवधूमोहकारि।मधुरिपोकृष्णस्यरूपंवर्णनीयत्वेनयत्रतादृशं।८॥
५॥ननुकृष्णस्त्वांविनान्यगोपीभिःसहविहरतित्वंकिमितिस्मरसीत्यतआह॥ ॥गणय
तीत्यादि॥ ॥गणयतिगुणग्रामंभ्रामंभ्रमादपिनेहतेवहतिचपरितोषंदोषंविमुंच
तिदूरतः।युवतिषुचलत्तृष्णेकृष्णेविहाणिंमांविनापुनरपिमनोवामंकामंकरोतिकरो

मिकिं॥५॥ममममनःक्षुब्धेपुनरपिकाममन्निलाषंकरोतितत्किंकरोमि।कीदृशोऽक्षुब्धेयु
वतिषुबकीषुगोपवधूषुवलंतीवर्द्धमानाद्दक्षायस्मतादृशो।अतएवमांविनाविहारिणि
वारंवारंविहरणशीले।कीदृशंमनः।वामंप्रतिकूलं।वामत्वेहेतंतरमप्याहागणयतीत्या
दि।तस्यगुणानांसौंदर्यादीनांग्रामंसमूहंगणयति।परिसंख्याति।नामंक्रोधंन्यमादन्निने
दृतेनेछति।दोषंमद्विधप्रणयिन्यवधीरणादिकंदूरतोविमुंचति।तत्रहेतुमाह।परीतोषं
संतोषंवदति।अत्रविभावनाविशेषोक्तीअलंकारौनिजानुसरणरूपानुरागहेतुंविनाप्यनु
रागप्रकाशनात्॥अन्यांगनासक्तिरूपवैराग्यानुकथनाच्चतथाचकाव्यप्रकाशव्याख्येय
कारिका।क्रियायाःप्रतिषेधेपिफलव्यक्तिर्विभावना।विशेषोक्तिरखंडेषुकलावचःएषाच ७१

काव्यप्रकाशऋतावाख्याता।हेतुरूपक्रियाप्रतिषेधेपिफलप्रकाशतंविभावना।मिलि
तेष्वपिकारणेषुकार्यस्याकथनंविशेषोक्तिरिति।ग्रामःस्त्रेसंवसथेष्टंदेशश्चदिपूरकेशति
विश्वःकामक्रोधेरवौदीप्तावितिचवामंसव्येप्रतीपेचेति।कामःस्मरोऽनिलाषेचेत्यपि।अत्र
यथा।ममममनःक्षुब्धेरसमयमूर्त्तेकामंकमंकरोति।तत्रहेतुःवलन्नृत्तेऽर्थान्मयि।अतएव
युवतिषुमांविनाऽविहारिणिनविहरतीतितथान्नृतेकिंचामगुणग्रामंगणयति।अत्र
तोनामंक्रमादपीत्यादि।दोषमन्ययुवतीषुदाक्षिण्यरूपंवामंसुंदरमित्यर्थः॥५॥अत्र
थोत्कंठितारसमयीश्रीराधासखींस्वयमनोरथानाह।निन्नृतेत्यादिना॥ ॥निन्नृत
निकुंजगृहंगतयानिशिरहसिविलीयवसंतं।चकितविलोकितसकलदिशारतिरभस

रसेनहसंतं।एसखिदेकेशीमथनमुदारंरमयमयासदमदनमनोरथभावितयासवि
कारं॥ध्रुवपदं॥ ॥गीतस्यास्यमालवगौडरागः।एकतालीतालः।रागलक्षणं।कथितंप्रा
क्ताललक्षणं।एकतालीत्रिधाप्रोक्तागीतशास्त्रविशारदैः।रामा चंद्रिकातद्विधु
लेत्यथलक्षणं।द्रुतमेकंनवेद्यत्रतालोयंखंडसंज्ञितः।रामातैनैकतालीतुकीर्त्यतेगा
यनोत्तमैः।गुरुद्वयं।नवेद्यत्रतालोललितसंज्ञकः।चंद्रिकाचैकतालीस्यात्तेनसौभाग्य
दायिनी।कोकिलप्रियतालेवैद्रुतत्रयमुदाहृतं।विपुलाचैकतालीस्यात्तेनगीतज्ञसं
मता।खंडललितकोकिलप्रिया।इतिभेदास्तत्रज्ञेयाः।उत्कंठितायाश्चलक्षणं।उद्दाम
मन्मथमहाज्वरवेपमानं।रोमांचकंटकितगात्रलतांवदंतीं।संवेदवेपथुघनोक्तजि ७२

काकुलांगीमुत्कंठितांवदतितांनरतःकविंद्रः।इतिगीतार्थस्तु।हेसखि।मयासदके
शिमथनंश्रीकृष्णंरमयाक्रीडयाकीदृग्रूपामयामदनस्यमनोरथःइच्छात्मकोयोना
वोरताख्यःसंज्ञातोयस्यास्तादृग्रूपा।अथवा।मदनमनोरथेनभावितयावासयाननु
कोवेदमयापार्थनेकृतेकदाचिन्नातीत्यतआह।उदारंउदार्यगुणयुक्तंत्वत्साथि।
तमवश्यंदास्यत्येवेतिभावः।अथवा।मदनःश्रीकृष्णस्तत्कोनकत्वात्।तस्ययोमनोर
थःसंभोगेच्छातयैवभावितयाननुकथंतस्येच्छाज्ञानेत्यतआह।सविकारमिति॥वि
कारोमानसोभावोस्तत्सहितं।एवमन्यानुरागपूर्वकत्वेनशृंगाररसपोषणमुक्तंभ
हाह।अनुरागोनुरक्तायांरसावदृतिस्थिति।अत्रभावेत्यनुरागस्यरसभानजंगुर्बुधा

इति। तथाचात्र महाभावमयी उत्तमा नायिका ज्ञेया नायकश्चोत्तमस्तद्गुणा निरूपिता
ः। प्राक्। सविकारमिति क्रियाविशेषणं वा। तदा विकारः स्तनप्रांतादिकं प्रेटनं तत्सहितं
यथा स्यादेवं मदनमनोरथभावितयेत्यन्वयः। तदुक्तं रसिकस्वर्वस्वे। नाभीमूलकुचो
दरप्रकटनव्याजेन यद्योषितां साकांक्षं मुहुरीक्षणं स्खलितं तानीवीनिबंधस्य च। के
शभ्रंशनसंयमौ च कमितुमित्रादिसंदर्शनैः सौभाग्यादिगुणप्रसक्तिकथनैस्तासां नुरा
गेंगितमिति। अत्र सामर्थ्यख्यापनाय केशिमथनपदोपादानं। तत्प्रयोजनं च निःशंक
केलिप्रतिपादनं। अथवा। प्रशस्ताः केशा यस्य कैशीतं मथ्नातीति केशिमथनस्तं स्वसौं
दर्येणाशेषं सुंदराणां क्षोभकमित्यर्थः। केशी प्रशस्तकेशवान् स चासौ मथनश्च केशिम

थन इति वा। स्वसौंदर्येणाशेषनागरीणां चित्तक्षोभकमित्यर्थः। उक्तं च। वीक्ष्यालकावृ
तमुखमित्यादि। अथवा। कंकाममीशितुं शीलमस्यासौ केशी। सुप्यजातौ णिनिस्ताछी
ल्ये अजात्यर्थे सुपि धातोर्णिनिः स्यात्तछील्ये इति। मथ विलोडने नंदिग्रहिपदादिभ्य इति ल्यु
ः। इति मथ्नातीति मथनः। केशी वासौ मथनश्चेति कामस्यापि कामं मम मानसक्षोभकं
चेत्यर्थः। उक्तं च साक्षान्मन्मथमन्मथ इति। अथवा केशिनं कामनियंतारं योगिवर्यम
पि स्वमाधुर्येण। क्षोभयतीति तथाभूतं केशिमथन। तद्यथा। उदिते हरिवक्त्रेंदौ वेणुना
दसुधामुचि। हंत रुद्रसमुद्रेण स्वमर्यादा विलंघिता। इति। किं पुनः रागिणामिति भावः॥
मूर्द्धि वित्रे मूले काये सुखे ब्रह्मणि मारुते। कामे काले सुवर्णे च कः शब्द इत्यनेकार्थः। भावि

तेत्यत्रप्रथमव्याख्यानेतारकादित्वादितच।द्वितीयपक्षेभावितंवासितेप्राप्तेइतिविश्व
ः।ध्रुवपदं।अथपदानि।पुनःकीदृश्यामया।निभृतमेकांतंयन्निकुंजरूपंगृहंतत्रगत
या।कीदृशंकृष्णं।निशिरात्रौरहसिएकांतेनिलीयतिरोहितीभूयवसंतं।एवंभूतंमांरा
धामापश्यत्वितिकुतुकेनमयापरिहसितुंसंकुचितमात्मानंकृत्वाऽवस्थितमितिभा
वः।अन्याकाचित्मापश्यत्वितिवा।पुनःकीदृश्या।चकितंयथास्यादेवंविलोकिताः
सकलादिशोयया।तादृश्या।कुत्रकृष्णोनिलीयतिष्ठतीतिकृत्वाभिसरंतीकश्चनप
श्यत्विति।वाचकितंपश्यत्येवेतिभावः।इयंचविभ्रांतादृष्टिस्तदुक्तंसंगीतरत्नाकरेया
तुक्वचिदविश्रांतमविषह्यंविलोकने।विस्तीर्णंचंचलोत्फुल्लतारासादृष्टिरुच्यते॥वि

भ्रांतेविभ्रमेवेगेसंभ्रमेचभवेदसाविति।कीदृशंकृष्णं।रत्यानुरागेणअथवा।रतौसं
भोगेयोरभसःउत्साहस्तद्युक्तोयोरसःशृंगाराख्यस्तेनहसंत।रत्यनुभावोयंहासः।त
थाच।क्रीडायांकालापेक्षासहिष्णुतयात्मप्रकटनार्थंपुरस्थितमपिमामियंनपश्य
तीतिकृत्वाहसंतमितिभावः।निभृतंरहएकांतमितिधरणिः।रभसोवेगउत्साहइ
त्यमरः।१।प्रथमेति॥ ॥प्रथमसमागमलज्जितयापटुचाटुशतैरनुकूलं।मृदुमधु
रस्मितभाषितयाशिथिलीकृतजघनदुकूलं॥२॥ ॥पुनःकीदृश्यामया।प्रथमस
मागमेनलज्जितया।व्रीडितया।नित्योपभुक्तचरेपिहरौकेनापिरसविशेषमाधुर्ये
णनित्यनूतनयाप्रथमसमागमेत्युक्तं।यथाचश्रीभागवते।यद्यप्यसौपार्श्वगतोर

होगतस्तथापितस्यांह्रियुगंनवंनवं।पदेपदेकोविरमेततत्पदाच्चलापियंश्रीर्नजहा
तिकर्हिचित्।तथाचप्रथमसमागमेकामिन्योलज्जंतेवामनामावहंतिचयथाहभर
तः।श्लिष्टःकंठेकिमपिनमयामूढयाप्राणनाथश्चुंबत्यस्मिन्वदनविकृतिःकिंकृतावा
नदृष्टः।नोक्तंकस्मादतिनववधूश्चेष्टितंचिंतयंतीपश्चात्तापंवहतितरुणीप्रेम्णिजाते
रसज्ञाइति।प्रथमसमागमवतलज्जितयेतिवायोजनीयं।कीदृशंकृष्णं।पटुनायिका
प्रसादनक्षमंयच्चाटुशतंप्रियवचनशतंतेनानुकूलविनयोक्तिशतैरनुनयपरमि
त्यर्थः।तत्क्षणमधुनेत्यादिनाप्रकटयिष्यति।शृंगारशास्त्रे।तद्यथा।प्रथममिहहिए
वंपुष्पपूगादिकंस्यान्मृदुमधुरवचोभिर्योजयेत्संनिधाने।करतलमथगात्रेभ्रामये

छश्वदस्याःछुरितमुदरपृष्ठेमंदमाश्लिष्यदद्यादिति।एवंवावैलक्ष्यापनोदनचातुर्य्यंत
दुक्तं।मुग्धामनुनयत्येषमृदूपायेनसांत्वयन्।नातिभीतिभवैर्भावैर्निर्बंधैर्वालभीषकैः
।तद्यथा।सरतिसरसस्तीरादेषाभ्रमद्भ्रमरावलीसुमुखिविमुखीपद्मेमन्येतवास्यपिपा
सया।इतिनिगदितेकिंचिद्भीत्याविवक्रितकंधरावदनकमलेबालाभर्त्ताचिरंपरिचुं
बितेतिशृंगारतिलके।पुनःकीदृश्यामया।मृदुकोमलंमधुरंमाधुर्यगुणयुक्तं।मृद्वल्पं
मधुरंरसवदितिवास्मितयुक्तंचभाषितंयस्यास्तया।तदीयवाटूक्तिभिरपहृतलज्जा
याःकिंचित्स्मितंचयथास्यास्तयेत्यर्थः।उक्तंच।श्रुतंरसविशेषेणह्यभिलाषंनयेच्छ्रु
ति।यन्नायकामुखगतेमार्द्दवंतदुदीरितं।माधुर्यंचभवेद्यत्रशब्देर्थेचस्फुटोरसःइति।कीदृ

शं।कृष्णं।शिथिलीकृतंस्मितादिनानुकूलांमांज्ञात्वाश्लथीकृतंजघनस्थितंदुकूलंपट्टव
स्त्रंयेन।तादृशं।अशेषनायकशिरोमणेःश्रीकृष्णस्यदर्शनेनदृढंबधापिनीवीस्वयमवस्ख
लिष्यति।ततोमेखलाबलंबितंजघनस्थितंमेववासस्तेनापहारणीयमितिजघनमित्यपा
त्तं।तदुक्तंरतिंरहस्ये।ऊष्टाग्रंस्फुरतीक्षणेविचलतःकूपोदरेमत्स्यवत्धम्मिल्लःकुसुमा
कुलेविगलतिप्राप्नोतिबंधंपुनः।प्रछन्नौव्रजतस्तनौप्रकटतांश्रेणीतटंदृश्यतेनीवी
चस्खलतिस्थितापिसुदृढंकामेंगितेयोषितामिति।यथावा।कांतेतल्पमुपागतेविगलि
तानीवीस्वयंबंधनाद्वासोविश्लथमेखलागुणधृतंकिंचिन्नतंबेस्थितं।एतावत्सखिवेद्मि
केवलमहंतस्यांगसंगेपुनःकोसौकास्मिरतंचकीदृशमितिस्वल्पापिमेनस्मृतिरितिभ

रतः।रतेःपूर्वावस्थेयंसूचिता।त्रुट्यद्यंगंस्फुरद्वक्षःविकसन्मुखपंकजं।निमीलन्नयनंनी
वीनाभिशैथिल्यमेवचेति।चाटुर्नारीप्रियोक्तिःस्यादितिरत्नमालाजघनेकटेरधोभागेइ
तिहारावली॥२॥किशलयेति॥ ॥किशलयशयननिवेशितयाचिरमुरसिममैवशया
नं।कृतपरिरंभणचुंबनयापरिरभ्यकृताधरपानं॥३॥पुनःकीदृश्यामया।किशलयशयनेन
चपल्लवशय्यायांनिवेशितया।कीदृशंकृष्णं।चिरंबहुकालंव्याप्यममैवउरसिशयानं
सुप्तं।एतेनालिंगनविशेषउक्तः।तदुक्तंपंचसायके।गात्रोपरिष्टादथतल्पमध्येसंलीयतेय
न्मिथुनंशरीरे।कामाभिमानाक्षतपूर्णचेष्टितंतत्क्षीरनीराख्यमिदंप्रदिष्टमिति।पुनःकी
दृश्यामया।कृतेपरिरंभणचुंबनेययातादृश्या।एतच्चजघनोपेश्लेषरूपालिंगनाभिप्रायेण।

तदुक्तं।जघनकलितकांतश्रोणिरांगोपरिष्टाद्व्रजतियदिहनारीस्रस्तकेशोत्तरीया।कर
जरदनकृत्यंचुंबनंवाविधित्सुःकलयतिजघनोपश्लेषमेनंमुनींद्रइति।चुंबनमपिपंच
सायकेयथा।ओष्ठेनकांतस्यमुखौष्ठयुग्मंनिपीड्यजिह्वांचिततालुभागं।चुंबोत्सवंनृत्य
तियत्रनारीप्रोक्तंसमौष्ठंकविभिःपुराणैरितिकीदृशंकृष्णं।परिरभ्यालिंग्यकृतंमदीया
धरपानंयेनतं।अनेनलालाटिकंलिंगमुक्तं।तदुक्तंपंचसायके।अन्योन्यसंसक्तमु
खंकपोलंनेत्रंललाटंहृदयंचबाहू।सानंदभावश्रममीलिताक्षंलालाटिकंतत्वविदोव
दंतीतियथावा।संकेततल्पेचसुखोपविष्टांगाढंपतिःश्लिष्यतिसापिकांतं।अन्योन्यगात्रेवि
शतीवरागाद्वंद्वंतदास्खलितलज्जापिधानमिति।पल्लवोस्त्रीकिशलयमित्यमरः॥३

अलसेति॥ ॥अलसनिमीलितलोचनयापुलकावलिललितकपोलं।श्रमजलसि
क्तकलेवरयावरमदनमदादतिलोलं॥४॥ ॥पुनःकीदृश्यामया।अलसेमंथरेचतेनि
मीलितेचतादृशेलोचनेयस्याःतया।एतेनांगिकःकामविकारःकथितः।यत्रमूर्द्धानमा
रभ्यपादपर्यंतिकाःक्रियाः।अंगेनविहितायस्मात्तस्मादांगिकमुच्यते।इतिनायकालक्षणे
तदंगसंभरसानंदेमुकुलादृष्टिश्चकथिता।तदुक्तंसंगीतरत्नाकरे।स्फुरत्संश्लिष्टपक्ष्मा
ग्रामुखविश्रांतितारकाः।मुकुलादृष्टिरानंदेहृद्ययोःस्पर्शगंधयोरिति।अथवा।अलसे
आलस्ययुक्तेऽतएवनिमीलितेमुद्रितेलोचनेयया।अत्रनिमीलितेस्याद्युपादानादव
धृष्टाख्यंचुंबनमुक्तं।तदुक्तंपंचसायके।हस्तेननेत्रेपरिमील्यभर्त्तुःसंमीलिताक्षीवदनेस्व

जिह्वां।निक्षिप्य चक्रीडति यत्र लोलाख्यातं रसज्ञैरवधृष्टसंज्ञमिति।कीदृशं।कृष्णं।पुलका
वल्यारोमांचपंक्त्या ललितौ मनोहरौ कपोलौ यस्य तं।अनेन सात्विकविकारः कथितः।त
दुक्तं भरतेन।संगमे स्मरणे चैव प्रिलस्यालोकने तथा।हेतुत्रयं समासाद्य सात्विकः संप्र
चक्षते इति।पुनः कीदृश्या मया श्रमजलशकलकलेवरयेति पाठे श्रमजलसकलानि स्वे
दबिंदवः कलेवरे यस्यास्तया।क्वचिच्च श्रमजलसिक्तेत्यपि पाठः।कीदृशं।कृष्णं।वर उत्कृ
ष्टो यो मदनकृतो मदो हर्षस्तेनातिशयेन लोलं चंचलं।वरः प्रचुरो यो मदनस्तेन यो मदः
मत्तता तयाऽतिलोलमिति वा।प्रचुरश्रेष्ठयोः वर इति विश्वः।श्रमजलेत्यादिना।निराकु
लाप्रगल्भेयं नायिका चोक्ता।यथा धन्याः स्वाः सखि योषितः प्रियतमे सर्वांगलग्ने पियाः प्रा

गल्भं प्रथयंति मोहनविधावालंब्य धैर्य्यं महत्।अस्माकं तु तदीयपाणिकमलेप्युन्मोचं
यत्पंशुकं।कोयं कावयमत्र किंतु सुरतं नैव स्मृतिर्जायते॥४॥कोकिलेति॥ ॥कोकिलक
लरवकूजितयाजितमनसिजतंत्रविचारं।श्लथकुसुमाकुलकुंतलया नखलिखितघन
स्तनभारं॥५॥ ॥पुनः कीदृश्या मया।कलोऽव्यक्तमधुरो यो रवः शब्दस्तद्वल्कूजितं श
ब्दितं।यस्यास्तया।अथवा कलरवः पारावतपर्यायः तदा कोकिलकरवयोः कूजितमिव
कूजितं यस्यास्तया।अनेन कूजिताख्यं बाह्यरतमुक्तं।तदुक्तं पंचसायके।पिकशिखिक
लहंसप्रायपक्षिव्रजानां स्वनितमनुकरोति ह्यंगनामन्मथार्त्ता।मुखदशनविवर्त्ता तत्क
वींद्रा वदंति स्तनितमिति समासाच्चित्रसंभोगकाले।यथा वा।रसिकसर्वस्वे।दात्यूहला

वकमयूरकपोतहंसपरातोपेदिरुतानिध्वनितंरतास्यं।तन्मिश्रनिःश्वसितसीकृत।
हाननादैःसंयोजयेन्मदनचुंबनमैथुनादौ।तथाचोक्तं।कांतेतथाकथमपिप्रथितंमृ।
गाक्षीचातुर्यमुद्धृतमनोभवारतेषु।तत्कूजितंमृदुवदन्निरनेकवारंशिक्षायितंशृ।
द्धकपोतशतैर्यथास्यात्।ननुवात्स्यायनादिशास्त्रेऽप्येवक्रमउक्तः।तदुक्तं।आश्लेषप्र
थमंकुर्यात्द्वितीयंचुंबनंतथा।तृतीयंनखदानंचदंष्ट्राघातंचतुर्थकं।पंचमंक्षेपणंप्रो
क्तंषष्ठंप्रहरणंतथा।सप्तमंकंठशाष्टंचबंधनंचाष्टमंरतमित्यत्रकंठशाष्टस्यसप्तमरतस्याग्रे
वक्ष्यमाणनखदानादिनाश्लिष्टस्यरसिकतानंगःनंगःस्यादित्यतआह।जितेत्यादिकी
दृशंशास्त्रं।जितोवशीकृतःकामशास्त्रविचारोयेनतं।तत्रकामशास्त्रविचारःप्रवीणता।ति ७९

द्यथा।।चतुर्दशविधानार्यास्वीयासेव्यापरानतु।परकीयामपिनजनुत्तमामेवकामयेत्
।परापिबालामध्याचप्रौढादृष्टाचतुर्विधा।बालाबलकरीश्लिष्टामध्याश्लिष्टारतिप्रदा।प्रौढा
बलक्षयकरीदृष्टापुंस्त्वविनाशिनी।एवंचतुर्दशविधानांदेवादिसत्वानांमध्येगांधर्वस
त्वांमध्यंरममाणस्यजितकामशास्त्रविचारइत्यर्थः।गांधर्वसत्वायालक्षणं।उद्यानक
ननरतागीतवाद्यरतारथा।हरिन्नकाचसुस्नातातागांधर्वीसाप्रकीर्त्तिता।। ।।तस्मेव
नंयथास्नात्वासुगंधद्रव्यैस्तुसंगीतध्वनिपूर्वकं।मृदालिंगनदानेनगांधर्वीकामयेद्बुध
इति।अथवा।मनसिजतंत्रविचारंबंधादिकौशलं।आनंदावाप्तेःस्थितिरितिवा।अथ
वाजितोऽवज्ञातोमनसिजतंत्राणांकामपरायणानांअन्यविलासिनांविचारःयेनतोयेन।

तं।तदुक्तं।साक्षान्मन्मथमन्मथः।कामिनां दर्शयन दैन्यमिति।ततोऽभिभूतः विस्तारितः
मनसिजतंत्रस्य विचारो येन तमिति वा।अयं भावः चतुःषष्टिकलाकुलेशस्यापि परमर
सिकनायकस्य पुरुषोत्तमस्य स्वानुकूलोत्तम।नायिकासन्निधौ रसमग्नतया क्रमस्य
रणाभावान्न दोषः।न च रसहानिः तदुक्तं रतिचक्रप्रवर्त्तस्य नैव शास्त्रं न च क्रमः इति
पुनः कीदृश्या मया।श्लथाः केशग्रहणचुंबनादिदानेन शिथिलाः कुसुमैराकुला व्या
प्ताश्च कुंतलाः केशकलापा यस्यास्तथा।अथवा श्लथकुसुमैराकुलाः कुंतला यस्यास्त
या।कीदृशं।नखैः लिखितोंकितो घनः निविडस्तनभारो येन तं।अत्र विलिखितपदोपा
दानात्पंकजपत्राख्यं नखदानमुक्तं।तदुक्तं पंचसायके।अत्यर्द्धमेकस्फुरितोर्द्धरेखं प्रा ८०

हुंक्षतं पंकजपत्रसज्ञं।दोर्मूलवक्षःस्तननाभिसंधावस्योपयोगं मनुते महेश इति॥
तंत्रं प्राधानशास्त्रयोरिति विश्वः।चिकुरः कुंतलो वालः कचः केशः शिरोरुह इत्यमरः।
५।एतावत्पर्यंतं पंचवद्यालिंगनादिसप्तविधं बाह्यरतमुक्तं।संप्रतिबंधाख्यमष्टमं रत
माह॥५॥चरणेति॥ ॥चरणरणितमणिनूपुरया परिपूरितसुरतवितानं।मुखरवि
शृंखलमेखलया सकचग्रहचुंबनदानं॥६॥ ॥चरणयोरणितौ शक्षायमानौ मणिख
चितौ नूपुरौ यस्यास्तया।नायककृतबंधविशेषो दर्शितः।यद्वा।तच्चरणयोः रणितौ शक्षा
यमानौ कृतौ मणिनूपुरौ ययेत्यर्थः।एतच्च भ्रामरकनामविपरीतरताभिप्रायेणोक्तं
तदुक्तं रतिरहस्ये।चक्रवद्भ्रमति कुंचितांघ्रिका भ्रामरकं नृजनेसमुच्छ्रिते इति।कीदृशं

।परिपूरितःसर्वतःसंपूर्णतांनीतःसुरतवितानःरतिविस्तारोयेनतं।अनेननायिका
कर्तृकाबंधाःकथिताः।पक्षांतरैः।भ्रामरकबंधश्रांतांविदित्वाकिशलयशयनस्थितां
मांस्वयमपिरमयिष्यतीतिभावः।पुनःकीदृश्यामया।पूर्वंमुखराशक्षायमानापश्चा
द्विशृंखलात्रुटितगुणामेखलाकांचीयस्यास्तया।अनेनप्रेंखोलितनामकंविपरीत
रतमुक्तं।तदुक्तंवात्स्यायनीये।पुरुषायितप्रकरणे।स्वजघनमेवदोलायमानंसर्व
त्रभ्रामयेदिति।प्रेंखोलितमितितत्रसर्वत्रशक्षोमनोरमाकारेणव्याख्यातः।मध्या
त्पूर्वपश्चिमभागेदक्षिणोत्तरभागेचेति।रतिरहस्येपि।सर्वतःकटितटभ्रमोयदिप्रें
खपूर्वमिदमुक्तमूलमिति।अत्रापिसर्वत्रशक्षार्थःसएव।कीदृशंकृष्णं।सकचग्रहंके

शग्रहणसहितंचुंबनदानंयस्यतं।केशग्रहणपूर्वकंचुंबनंविपरीतरतएवोक्तंतदु
क्तंशृंगारचुंबनंकार्यंपुंसांलिंगनपूर्वकं।विपरीतग्रहेनार्य्याःसकचग्रहचुंबनमि
ति।मेखलाखड्गबंधेस्यात्कांचीशैलनितंबयोरितिविश्वः।शृंखलाकुमुदेकांच्यावचक्र
बंधनेइतिच॥६॥रतिमुखेति॥ ॥रतिसुखसमयरसालसयादरमुकुलितनयनस
रोजं।निःसहनिपतिततनुलतयामधुसूदनमुदितमनोजं॥७॥ ॥पुनःकीदृश्याम
या।रतिसुखसमयेसुरतसुखप्राप्तिकालेलोकोत्तरानुभवकाष्ठांप्राप्तोयःसंभोगःशृंगा
राख्योरसस्तेनालसयामंथरया।कीदृशंकृष्णंदरइषट्मुकुलितेमुद्रितेनयनसरोजे
नेत्रकमलेयस्यतं।अनेनद्वयोरानंदावाप्तिर्युगपदेवसूचिता।तदुक्तं।रतिरहस्ये।मूर्छ

नामीलनं वा क्षणोश्च्युतिकालस्य लक्षणं। सर्वमेतत्परिज्ञाय साधयेत्तत्स्वयं तत इति।
पुनः कथंभूतया निःसहा असमर्था अत एव किशलयशयने निपतिता तनुलताय
स्यास्तया। अनेन सुरतांतसमय उक्तः। अंगे स्वेदश्लथत्वं च केशवस्त्रादिसंवृतिः। या ते च्यु
तिमुखे नार्या विरामेच्छा च जायते। इति भरतः। तथा च विपरीतरतांते कोकः। स्वेच्छया
मिलितवल्लभेथवा। योषिदाचरति पूरुषायितं। आदितो घटितमेव यंत्रितं भूपतत्य
करणं वचेष्टते। इति। तद्यथा। अतिप्रयत्नेन रतांतताताकृष्णेन तल्पादेव रोपितासा
त ।आलंब्य स्यैव करं करेण ज्योत्स्नाकृतानंदमलिंदमापेतिरसार्णवसुधाकरे। कीदृशं
मधुसूदनं। मधुररसास्वादलंपटं। अत्र मधुसूदनशब्दो भ्रमरपर्यायः। तदेव विशेषे

णस्पष्टयति कीदृशं मधुसूदनं। उदितमनोजं। उदितस्तत्कालत्रुटितमुक्तारकांचीगु
णस्वस्वस्थानसंघटनसंजातपयोधरश्रोणीपरिसरस्पर्शादिना सलज्जस्मितराधायां
गविलोकनादिना च पुनराविर्भूतो मनोजकामो यस्य तं। तदुक्तं वात्स्यायने। अवसाने
पि च प्रीतिरुपचारैरुपस्कृता। सविस्रंभकथायोगैः रतिं जनयते परामिति। अनेन
द्वयोर्माधुर्यभरः कथितः। अथवा। घृदक्षरश्रुतिहत्योरिति। नंद्यादेर्ल्युट् इति मधुमा
धुर्यं क्षरातीति मधुसूदनः। स चासौ मुदितमनोजश्च। मुदितो माधुर्यभराशृंगाररसकौ
शलेनानंदितो मनोजः कामो येनेति। तमित्यर्थः। केचिच्च सामर्थ्यद्योतनाय मधुनामा
नं दैत्यं सूदितवानिति मधुसूदनः। इति व्याकुर्वंति। ७। श्रीजयदेवेति॥ ॥श्रीजयदेवभ

लितमिदमतिशयमधुरिपुमधुवनशीलं।सुखमुत्कंवितगोपवधूकथितंवितनोतु
सलीलं॥७॥श्रीजयदेवकविनाननितंवर्णितंयउत्कंवितायागोपवधूराधिकाया
:कथितंवचनंतत्सुखंवितनोतुविस्तारयतु।पाठांतरेश्रुएवतामितिशेषः।कीदृशंश्र
तिशयेनमधुरिपोःकृष्णस्यनिधुवनंसुरतक्रीडांशीलयतीत्येवंरूपांसलीलमिति
लीलाशृंगारजाक्रियातत्सहितमित्यर्थः।सलीलंयथास्यादितिवा।आयोधनंनिधुव
नंसुरतंचरंतंसममित्यमरः।कथितमित्यत्रभावेक्तः।७।इदानींस्वत्कंठयासख्या
नीयमानागोपीगणवृतंकृष्णंदृष्ट्वापरावृत्यसखीमाह।हस्तेत्यादिना॥ ॥हस्तन्यस्तवि
लासवंशमनृजुभ्रूवल्गिमवल्गवीक्षंदोक्षारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं॥मामु ७३

क्षीक्ष्यविलक्षितःस्मितसुधामुग्धाननंकाननेविंगोदंव्रजसुंदरीगणवृतंपश्यामिहृ
ष्यामिच।१६॥ ॥हेसखि।अहंगोविंदंकाननेपश्यामिहृष्यामि।हृष्यामिच।पश्यामी
तिवर्त्तमानसामीप्यावर्त्तमानता।कीदृशं।व्रजसुंदरीगणवृतं।गोपवधूकदंबपरिवृ
तं।ननुसपत्नीनिःपरिवृतंदृष्ट्वाकथंतेहर्षइत्यतआह।मामितिमांउक्षीक्ष्य।दृष्ट्वाविल
क्षितंअन्यवधूनिःपरिवृतोहमनयादृष्टइतिहेतोर्जज्ञासहितंयतस्मितंतदेवसुधा
श्रुत्वादंतिस्पृहणीयत्वाच्चतयामुग्धंमनोहरमाननंयस्य।तांतथाचसुंदरीशतदृ
तोपिसापराधमात्मानंमन्यमानस्ततोपिबिभेमीतिहर्षउचितएवेतिभावः।पुनः
कीदृशं।अनृजुःकुटिलाभ्रूवल्गीभ्रूलतायासामेतादृशोयावद्व्रव्यःगोपवधूस्तासां

वृंदं उत्सारयत्यपसारयत्येवंशीलं दृगंतवीक्षितं नेत्रांतेनावलोकितं यस्य तं। मय्यागता
यां भियादृगंतचेष्टयाऽन्यगोपीरपसारयतमित्यर्थः। पुनः कीदृशं। हस्तात्स्रस्तो म
र्द्दनेन साध्वसवशात्स्खलितो विलासवंशः क्रीडावेणुर्यस्य तं। पुनः कीदृशं अतिशये
न स्वेदैः प्रस्वेदैरार्द्रं गंडस्थलं यस्य तं। सर्वत्र मामुद्वीक्षेत्यस्य संबंधः अनृजुभ्रूवल्लीमद्व
ल्लवीत्यनेन तासां सौंदर्यमुक्तं। अथवा अनृजुः कुटिला मदाधिक्यदर्शनेन वक्रा भ्रूल
तायासां तासां वृंदमपसारयतीत्येवंभूतं दृगंतं वीक्षितं यस्य। अथवा। अनृजुभ्रूवल्ली
मत्कटाक्षावलोकितं। मयि यस्य अत एव वल्लवीवृंदमपसारयतीत्यर्थः। अत्रानृजुभ्रू
वल्लीति प्रियादर्शनेन भ्रूनर्त्तनं कथितं। तत्सौंदर्यमपि। अथवा अनृजुभ्रूवल्लिमद्वल्लवी

वृंदं तद्भावो बोधकत्वेन उत् अधिकं सारि विस्तारणशीलं कटाक्षवीक्षितं यस्य। तद्भाव
विस्तारकमित्यर्थः। तासामेवाभिसारकमिति वा। अथवा। अनृजुभ्रूवल्लीमद्वल्लवीवृंदे
न मद्गणदर्शनेनोत्सारि ऊर्द्ध्वप्रसरणशीलं दृगंतवीक्षितं कटाक्षेक्षणं यस्य। एवं सकल
गुणसंपन्ननायिकामुकुटमणेर्दर्शनादेव कृष्णे सांगरसोत्पत्तिर्दर्शिता। तत्र राधामो
हनावालंबनविभवौ। अनुकूलप्रतिकूलभाववशंकारिणी रतिः स्थायीभावः वनाद्यु
द्दीपनविभावाः स्मितकटाक्षाद्यनुभावाः। स्मितसुधामुग्धा ततमिति दृगंतवीक्षितमि
ति दर्शिताः। स्वेदकंपादयः सात्विकाः। अतिस्वेदार्द्रेत्युद्रिक्तत्वं तेषां दर्शितं। हस्तस्रस्तवि
लासवंशमिति वेपथुनास्तद्दीप्तसात्विकः साध्वसादिति व्यभिचारीभावः। लज्जाभया

दिकाश्चव्यभिचारिणः।इतिमहाकविनाश्रीवृंदावनेश्वर्याःपरमविदग्धायाःवक्तृत्वेन
सांगोरससम्राट्शृंगारोवर्णितः।अलमितिविस्तरेणअनुकूलश्चात्रनायकः।तदुक्तं।
अतिरक्ततयानार्य्यांत्यक्तान्यललनास्पृहः।सीतायांरामवत्सोयमनुकूलःप्रकीर्त्तित
ः।राधायामेवकृष्णस्यप्रसिद्धानुकूलता।तदालोकेकदाप्यस्यनान्यासंगःस्मृतिंव्रजे
दिति।तद्यथा।वैदग्धीनिकुरंबचुंबितधियःसौंदर्यसारोज्वलाःकामिन्यकलिभाद्य
वल्लवपतेर्द्दीव्यंतिगोष्टांतरेराधेपुण्यवतीशिखामणिरसिक्षामोदरित्वांविनाप्रेंखंती
नपरासुयद्वकरिपोर्दृष्टात्रदृष्टिर्मयेति॥ ॥प्रेयोनामालंकारश्च।तदुक्तंदंडिना।प्रीतिप्र
काशनंयत्तत्प्रेयइत्यभिधीयतेइति।१६।पुनःविभावानाह।दुरालोकइति॥ ॥दुरालो

कस्तोकस्तबकेनवकाशोकलतिकाविकाशःकासारोपवनपवनोपिव्यथयति॥
अपिभ्राम्यद्भृंगीरणितरमणीयानमुकुलप्रसूतिश्चूतानांसखिशिखरिणीयंसुखय
ति॥१७॥ ॥हेसखि।स्तोकोल्पःस्तबकोगुंछोयस्याएतादृशीयानवकाअतिनवाअशो
का कलतिअनुकंप्याशोकशाखातस्याःकिशलउद्बोधोदुरालोकोदुःखेनालोकितुंश
क्यःनवकेत्यत्रकेऽणइतिह्रस्वः।लतिकेत्यत्रानुकंपायांकः।मद्धस्तपालितां।तएवानुकं
प्याः।शोकलतिकादुरालोकेतिभावः।किमपरं।कासारःसरसीतत्संबंधीयदुपवनंत
त्संबंधीयःपवनोवायुःसोपिव्यथयति।दुःखंददातिकासारइत्यनेनवायोःशैत्यंकथि
तं।उपवनसंबंधित्वेनचसौगंध्यंमांद्यंचध्वनितंयतोवृक्षैरुपहतगतत्वेनमंदएववायुर्भ

वतीति। अथवा स्तोकेत्यादिवायोरिव विशेषणं। तदा स्तोकस्तबकनवकाशोकलतिकां विका
शयतीत्येवंभूतः पवनो व्यथयतीत्यन्वयः। नन्वभिमुखमागच्छन् पवनोंचलनादिना
निवार्यतामत आह। दुरालोक अतींद्रिय इत्यर्थः। तथा चाकस्मादेवापतन्न दृश्यत इति
भावः। अपि शब्देन तद्विकाशिकाशोकलतिकापि व्यथयतीति ध्वनितं। अपि चेयं शि
खरिणी गोवर्द्धनपर्वते वर्त्तमानाचूतानामाम्राणां मुकुलप्रसूतिकुड्मलोद्गमोपि न
सुखयति विकाशदशायां तु को वेद किं करिष्यतीत्यपि नाध्वनितं। अथवा कीदृशी मु
कुलप्रसूतिः शिखरिणी प्रशस्ताग्रभागवतीत्यर्थः। शिखरिणीति प्रशंसायामिन्। अ
थवा शिखरिणी मल्लिका न सुखयतीत्यर्थः। कीदृशी भ्राम्यंतीनां भ्रमरांगनानां रणितैर्गु

जितैः रमणीया भृंगांगनानां भ्रमणं नायकान्वेषणार्थमिति ध्वनितं। शिखरिणी नामकं छं
द इदमित्यपि सूचितं। स्तोकोल्पे चातके इति विश्वः। स्याद्गुच्छकस्तु स्तबक इत्यमरः। लताज्यो
तिष्मती वृक्षशाखावल्लिप्रियंगुष्विति विश्वः। कासारः सरसी सर इत्यमरः। स्त्रीरत्ने मल्लि
कायां च प्रोक्ता शिखरिणी बुधैरिति विश्वः। १७। साकूतेति॥ ॥साकूतस्मितमाकुलाकुल
गलधम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धहस्तस्तनं। गोपीनां निभृतं नि
रीक्ष्य गमिताकांक्षश्चिरं चिंतयन्नंतर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः॥१८॥ ॥केशवो
हरिर्वो युष्माकं क्लेशं हरतु। किंलक्षणगमिताकांक्षः। श्रीराधायां प्राप्ताभिलाषः। अन्यासु गो
पीषु तद्दर्शनात् गमिता निरस्ताकांक्षा यस्य इति वा। अंतः हृदये चिरं चिंतयन्। किं निरीक्ष्येत्य

पेक्षायामाह।साकूतस्मितंसाभिप्रायमीषद्धसितं।पुनःकिं।आकुलाकुलगलद्धम्मिल्लं
आकुलाकुलोत्यंतास्तव्यस्तोगलन्उन्मुक्तीभवद्धम्मिल्लःकेशपाशस्तं।कामोद्रेकाद्रोमो
द्गमादिहेतुना।पुनःकिं।उल्लासितभ्रूवल्लीकंउत्क्षिप्तभ्रूवल्लीकंअलीकदर्शितभुजामू
लार्द्धहस्तस्तनं।अलीकेनछलेनदर्शिताःभुजामूलार्द्धहस्तस्तनाःयत्रकर्मणितत्अत्रा
र्द्धशब्दोहस्तस्तनाभ्यामभिसंबध्यते।हस्तौचस्तनौचेतिद्वंद्वसमासः।जृंभणादिव्याजेन
भुजामूलोर्द्धहस्तस्तनप्रकटनमितिभावः।किंचार्द्धजृंभणमप्यत्रज्ञेयं।तदुक्तं।वामबा
हुशिरोलग्नोयत्रवामस्तनोन्नतिः।सालसभ्रूविलासंचतदुक्तंत्वर्द्धजृंभणमिति।कासा।
मित्यतआह।गोपीनांकिंभूतंतच्चतुष्टयं।मुग्धमनोहरमिति।मुग्धानांमनोहरतीतितथा

किंलक्षणोहरिः।नवस्तरुणः।तरुणंदृष्ट्वास्त्रीणांकामविकारोजायतइति।अथवानवः॥
श्रीराधांदृष्ट्वाऽन्यादृशइवजातः।अत्यद्भुतगुणप्रकटनात्।अथवा।नवःनूयतेनायकगु
णैस्तूयतेइति।अनथवानवःनित्यनूतननित्यानुभूयमानस्याननुभूतइतिप्रतीतेः।त
द्यथा।कुलवरतनुधर्मग्राहवृंदानिभिंदन्सुमुखिनिशितदीर्घापांगगंडच्छटाभिः।युग
पदयमपूर्वःकःपुरोविश्वकर्मामरकतमणिलक्षैःकोष्ठकक्षांचिनोति।निभृतंभाव
प्रकाशनमितिव्याख्यानेसाकूतस्मितेत्यादिचतुर्णामपिपदानांभावविशेषणत्वं।मुग्धं
मनोहरमितिचक्रियाविशेषणंविरंचिंतयन्श्रीराधामितिपावत्॥१८॥ ॥इतिश्रीगी
तगोविंदेऽक्लेशकेशवोनामद्वितीयःसर्गः॥ ॥२॥ ॥प्रियजनानांक्लेशापहारीकेश

वोयत्रतादृशः।राधादर्शनाह्लादेनगतक्लेशइतिवा॥२॥सर्गद्वयेश्रीराधायाःश्रीकृष्णवि
षयिणीमुत्कंठामुक्त्वासंप्रतिकृष्णस्यापितस्यामाह॥कंसारिरपीत्यादि॥ ॥कंसारिरपि
संसारवासनाबंधशृंखलां।राधामाधायहृदयेतत्याजव्रजसुंदरीः॥९॥कंसारिरपिकृ
ष्णोपिव्रजसुंदरीस्तत्याजत्यागेहेतुमाह।राधामितिराधांहृदयेआधायआरोप्यं।सौंद
र्यवतीर्बह्वीरपितत्याजेतिकृष्णस्यश्रीराधायामनुरागातिशयोध्वनितः।कीदृशींराधां।
संसारविषयिणीयावासनासंस्कारस्तस्यबंधायशृंखलामिव।अनेनाभिलाखाख्या
प्रथमावस्थाकथिता।तल्लक्षणंकथितंप्राक्।किंच।संगमोपायरचिताप्रारब्धव्यवसा
यतः।संकल्पेच्छासमुद्भूतिरभिलाषोत्रविक्रियाः।प्रवेशनिर्गमौतूष्णींतदृष्टिपथगामि

नौ।रागप्रकाशनपराश्चेष्टाःस्वात्मप्रसाधनं।व्याजोक्तयश्चविजनेस्थितिरित्यादयोम
ता।इति।सकार्यस्यास्यसर्वास्वप्यवस्थासुप्रवेशोज्ञेयः।प्रथमकारणत्वात्प्रेम्णोमाधुर्य
भरसंपादकत्वाच्चेतिअथवा।सम्यक्सारःसंसारः।आनंदचिन्मयोमधुराख्यरसः।
भगवदाश्रयत्वात्।तद्विषयिणीयावासनानित्यसंस्कारःतस्मिन्बंधायशृंखला
मिवनिगडरूपामिवेत्यर्थः।उक्तंच।आनंदचिन्मयरसप्रतिभाविताभिर्यएषनिजरू
पतयाकलाभिः।गोलोकएवनिवसत्यखिलात्मभूतोगोविंदमादिपुरुषंतममुंभजा
मि।इतिब्रह्मसंहितायां॥अथवा।सर्वात्मभावेनाभिसरणंश्रीराधायामितिसंसारःत
द्विषयिणीयावासनानिरंतराहृदयवृत्तिस्तयाबंधायस्ववशीकारायशृंखलामिवत

थावकंसुखंसारयतिविस्तारयतीतिकंसारिःअर्णादिकश्णश्तिकंसोपियस्मात्वि
नेतीतिसामर्थ्यद्योतनायकसारिरितिवाउक्तंचानयाकंसश्तिशंखलापुंस्कटीवस्त्र
बंधेपिनिगडेपिचतिविश्वः॥१९॥श्तस्ततश्त्यादि॥ ॥श्तस्ततस्तामनुसृत्यराधिकामनं
गबाणव्रणाखिन्नमानसःसन्नतानुतापःसकलिंदनंदिनीतटांतकुंजेविषसादमाधवः
२०॥ ॥पुनःकिंकृतवांस्तत्राहासमाधवःकलिंदनंदिन्याःयमुनायाःतटांतकुंजेतीर
प्रांतजातापिहितोदरगृहेपिविषसादविषादंचकारात्रत्रमाधवपदेनमाजह्मीस्त
स्यात्रापिधवःस्वामीयदिरद्याकुलोबभूवेतिराधायासेनाग्याधिक्यध्वनितं।माधव
ःनास्तिधवोरक्षकोलांविनायस्येतिवा।किंकृत्वा।श्तस्ततःनेषुतेषुसंकेतस्थानेषुतां ८९

श्रखिलजनपरित्यागेनस्वहृदिविनिहितं।राधिकांश्रनुसृत्यान्विष्य।कीदृशःश्रनं
गःकामस्तद्बाणस्यव्रणंक्षतंतेनखिन्नंदुःखितंमानसंयस्यसः।पुनःकीदृशः।कृता
नुतापः।पूर्वमेवकथंमयानानुनीयानीतदानींतद्विनाकथमवस्थातुंशक्यतश्ति।पश्चा
त्तापःकृतोयेनसः।श्रनंगपदेनानिवार्यत्वंध्वनितं।श्रनेनश्लोकेनचिंताख्याद्वितीयाव
स्थाकथिता।तद्व्रक्षणंकथितंपाक॥२०॥यथावसंतेवासंतीत्यादिनाराधायाश्रनुस
रणंकथितं।तथैवात्रश्तस्ततश्त्यादिनाक्षत्स्यानुसरणंप्रदर्शितं।इदानींकृतानुता
पश्तियद्भणितंतदेवगीतेनवर्णयति॥मामियमित्यादि॥ ॥मामियंचलितांविलोक्य
वृतंवधूनिचयेनसापराधतयामयापिननिवारितातिनयेन।हरिहरिहतादरत

यागतासाकुपितेव॥ध्रुवपदं॥ ॥गीतस्यास्यगुर्जरीरागः॥तालस्तुप्रतिमंठः॥तयो
र्लक्षणंकथितंप्राक्॥गीतार्थस्तु॥हरिहरिहाकष्टंसामत्प्राणकोटिवल्लभाप्रख्यातगु
णाराधाहतादरतयाऽकृतबहुमानतयाकुपितेवगताविस्रंभेणाकुपितेवेत्युक्तंप्र
णययोगेनसमग्रकोपाभावात्व्यभिचारीभावोयंकोपइतिज्ञेयं।इतिध्रुवपदं।ननुसा
कुपितागतेतिकथंत्वयाज्ञातमित्यतआह।मामियमित्यादि।मांवधूनिचयेनगोपव
धूसमूहेनवृतंवेष्टितंविलोक्यदृष्ट्वाचलिताप्रस्थिता।विलोक्येत्यव्यवहितपूर्वकाले
क्त्वाप्रत्ययस्तेनगोपवधूवेष्टितंमांदृष्ट्वाव्यवहितकालएवयतश्चलितातततोज्ञायते।
कुपितेवेतिभावः।ननुसागच्छंतीत्वयाकिंननिवारितेत्यतआह।सापराधतयेति॥ ९०

मयातिभयेनातिशयितभीत्यासाननिवारिताअस्याअग्रेकथंवक्तुंशक्यतइति।भये
हेतुमाह।सापराधतयेति।अपराधोराधांविहायान्यगोपीभिःसहक्रीडारूपस्तद्युक्त
तया॥किंकरिष्यतीति॥ ॥किंकरिष्यतिकिंवदिष्यतिसाचिरंविरहेण।किंजनेनधने
नकिंममकिंगृहेनसुखेन॥२॥ ॥साचिरंविरहेणचिरकालीनमद्विश्लेषेणकिंकरिष्यति
।विरहतापशांत्यर्थंकमुपायंकरिष्यतीत्यर्थः॥अनेनस्वविहारमहाज्वालामवधीर्यदु
ःखाक्रांतत्वेनसुष्टुप्रणयोत्कर्षोदर्शितः।तद्यथा।यत्तेसुजातचरणांबुरुहंस्तनेषुभी
ताःशनैःप्रियदधीमहिकर्कशेषु।तेनाटवीमटसितद्व्यथतेनकिंस्वितकूर्प्यादिभिर्भ्र
मतिधीर्भवदायुषांनइति।अथवाचिरंविरहेणतप्तंमांज्ञात्वाममांगीकारंकिंकरिष्यति॥य

थाकथंचिदपीतिशेषः।किमितिवितर्कोऽत्रक्षणस्यापिविश्लेषेबहुकालस्फूर्त्तिः।त
दुक्तंश्रीनागवतेऽक्षणंयुगशतमिवयासांयेनविनाभवत्।इतिमहाभावस्यानुभावो
यंविरमित्यनेनकथितः।अथचकिंवदिष्यते।अपराधक्षमापनार्थंचरणौनिपतिमां
दृष्ट्वाकिंकोपेनतिरस्कारकवचनमपिकथयिष्यति।अथवाकिंमयासहकदाचिन्मा
धुर्यवर्षिणीवाणीसशब्दंकथयिष्यति।अथवाकिंममसत्कथांवदिष्यति।दोषान्वाव
दिष्यतीत्यर्थः।अथवा।मयिवाटुनिर्मिलितेकिंकोपादिकंकरिष्यतिकिंपरुषंवावदिष्य
तिअपित्वकोपंविहायप्रसन्नासतीमधुरमेववदिष्यतीत्यर्थः।एवंमानादिप्रकरणे
स्मिन्नरसेमुनिनादरिवंशेनजयदेवेनचात्रैवश्रीकृष्णस्परसास्वादलीलामयमूर्त्तेःब ९१

कुधाचेष्टितंनिरूपितंतेनएषुव्याख्यानेषुकल्पनानाशंकनीया।ननुएतावतातस्या
मेवकोवाग्रहः।अन्यगोपीजनानुशीलनेनवित्तव्यावर्त्तनंकर्त्तव्यमित्यतआह।किंजने
नेति।तयाविनाममजनेनगोपीरूपपरिजनेनकिंगोपांगनारूपोपरिजनोऽपिकिंवि
कुरुइत्यर्थः।जनेनाशेषपरिजनेनकिमितिवा।तद्वियोगेनसर्वजनपरित्यागात्।अ
पिचधनेनकिंधनेनपितुःब्रजेश्वरस्याखिललोकातिशायिन्यांसंपत्त्यामम किंन
किमपिमपीत्यर्थः।तद्वियोगेविविधविचित्रालंकारणानामपिसंतापकत्वेनपरित्या
गात्अतःसैवममभूषणरूपामहाधनरूपाचेतिभावः।वक्ष्यतेचाग्रेत्वमसीत्यादि॥
ननुधनंविनागृहसौख्यंनस्यादितिचेत्तत्राह।गृहेनकिंतयाविनागृहेममकिंप्रयोज

नंनकिमपीत्यर्थः।तद्वियोगेनवनवासांगीकारात्।ननुसुखास्पदंगृहंतेनविना।
सुखंनस्यादतआह।ममसुखेनकिं।तयाविनाम्यसुखेनापिममकिंप्रयोजनं।सैव
ममसुखरूपेतिभावः।अथवाममसुखेनात्मसंबंधिसुखेनकिंममसुखंतद्दुःखा
तुन्नवेनसुखत्वहानामपिदुःखप्रदत्वात्।तत्सुखेनैवममसुखमित्यर्थः।किंजनेनध
नेनकिंममजीवितेनगृहेनेतिपावेममजीवितेनकिंतद्दुःखासहिष्णुतयाममजीवित
मपिअकिंचित्करमित्यर्थः।स्मृत्याख्यातृतीयावस्थेयंकथिता।तद्भक्तेरसार्णवसुधाकरे।
अर्थानामनुभूतानांदेशकालानुवर्त्तिनां।सातत्येनपरामर्शोमानसंस्यादनुस्मृतिः।अ
त्रानुभावानिश्वासोध्मानहत्पंविहस्तरा।शय्यासनादिविद्वेषइत्याद्याःस्मरकल्पिताश्चेति ९२

श।एवंतांविनासर्वेषांदुःखरूपंकथितं।इदानींतद्दुःखक्रांतस्यापिकृपितायाअपितस्या
एवैकचिंतनपरत्वेनप्रेमसौष्ठवंदर्शयति।चिंतयामीति॥ ॥चिंतयामितदाननंकुटि
लभ्रुकोपभरेण।शोणपद्ममिवोपरिभ्रमताकुलंभ्रमरेण॥३॥अहंतदाननंचिंतया
मि।स्मरामि।कीदृशं।रोषभरेणकोपातिशयेनकुटिलभ्रुकुटिलाभ्रूर्यत्रतादृशं।कमिव।
उपरिभ्रमतासंचरताभ्रमरेणआकुलंव्याप्तं।शोणपद्ममिव।रक्तपद्ममिवअत्ररोषारु
णेमुखेशोणपद्मसादृश्यंबोध्यं।वारंवाररोषाक्रीनवंत्योश्चभ्रुवोर्भ्रमद्भ्रमरोपमाबो
ध्या।अनेनगुणकीर्त्तनाख्याचतुर्थ्यवस्थाकथिता।तद्भक्तेः।अंगप्रत्यंगलीलानिवाकचेष्टा
हसितेक्षणैः।नतत्सदृशंकिंचिदित्यादिगुणकीर्त्तनमिति।शोणःकोकनदच्छविरित्य

मरः।अनेनाव्यभिचारिसौंदर्यदर्शितं।कुचोपिशोभनावदत्वात्।किंचमाधुर्यनामैतदेवत
उक्तं।माधुर्यनामचेष्टानांसर्वावस्थासुचारुतेति।तामहमित्यादि॥ ॥तामहंहृदिसंगताम
निशंहृशंरमयामि।किंवनेतुसरामितामिहकिंवृथाविलपामि॥ध॥ ॥अहंवनेकिंतांअनु
सरामि।किमितितस्याअनुसरणंकरोमि।इहकिंवृथाविलपामि।किमितिवृथाविला
पंकरोमि।हृदिसंगतांहृदयेलग्नांतांअनिशंनिरंतरंहृशंअतिशयेनरमयामिक्रीडया
मि।वियोगेसंयोगस्फूर्त्तिः।महाभावविकारोयंअथवा।किंशब्दःप्रश्ने।अहंतांहृदिसंगतां
अनिशंकिंरमयामिकिंवनेतामनुसरामिवृथाविलपामीत्यर्थः॥ध॥तन्वीति॥ ॥तन्विखि
न्नमसूयाहृदयंतवाकलयामि।तन्नवेत्थिकुतोगतास्मिनतेनतेनुनयामि॥५॥ ॥हेत ९३

न्विकृशांगि तवहृदयंअसूयायामयिदोषाविकारेणखिन्नंखेदयुक्तं।आकलयामि
पश्यामिजानामीत्यर्थः।इयंचोद्वेगावस्था।तदुक्तंशृंगारतिलकेयस्मिन्रम्यमरम्यंस्या
न्नचहर्षायकिंचना।विद्वेषःप्राणितव्येपिसउद्वेगःस्मृतोयथेति।इयंतुश्रीराधायोंयुज्य
ते।तथाचमनसःखेदयुक्तत्वात्तन्वीतिसंबोधनमुचितमेवेति।तन्नवेत्थित्यादि।त्वंकुतो
गतासितदहंनवेत्थिते तवनतेनप्रणत्याऽनुनयामित्वामित्यर्थः।क्वचिन्नुतिनेतिपाठ
स्तदातेनुतेनतवस्तुत्यानुनयामित्वामित्यर्थः।अथवानुशतिवितर्कोतेनेतिलक्षणेऽव्य
यंतथाचयंमार्गंलक्षीकृत्यगतासितेनतंमार्गंलक्षीकृत्यगत्वातेऽनुनयामि।तवानुन
यंकरोमि।तेइतिसंबंधमात्रविवक्षायांषष्टी।अनेनविलापावस्थाकथिता।तदुक्तंशृंगार

तिलके।बंभ्रमीतिमनोयस्मिन्नत्यौत्सुक्यादितस्ततः।वाचःप्रियाश्रयाएवसप्रलापःस्मृतो
यथेति॥५॥दृश्यसइत्यादि॥ ॥दृश्यसेपुरतोगतागतमेवमेविदधासि।किंपुरेवससंभ्रमं
परिरंभणंनददासि॥६॥ ॥हेसुंदरिपुरेवपूर्वमिव।ससंभ्रमंसादरं।भंग्यासचकितंवाप
रिरंभणंआलिंगनंकिंकिमितिनददासिनप्रयच्छसीत्यर्थः।ससंभ्रममितिस्वामिभीष्टे
पिप्रियतमाश्लेषेउद्वेगमिवव्यंजनाद्विष्ठोनुभावविशेषोध्वनितः।तदुक्तं।इष्टेपिगर्वमा
नाभ्यांविद्वेषःस्यादनादरइति।तद्यथा।प्रियोक्तिलक्षेणविपक्षसन्निधौस्वीकारितांपश्य
शिखंडिमौलिना।श्यामातिवामाहृदयंगमामपिस्रजंदराघ्रायनिरासहेलया।अथवा
।स्फुरत्यग्रेतिष्ठन्सखिनवमुखक्षिप्तनयनः।प्रतीक्षांकृत्वायंभवदवसरस्याद्यदमनः

दृशागर्वग्रामोद्गरणगुरुहेलांगहनया।हसंतीवक्षीवेत्वमिहवनमालांचयसीति।त्वं
मेममपुरतोऽग्रतःदृश्यसेगतागतंयातायातंविदधासिकरोषि।विरहिणोहिचित्तानु
षंगात्सर्वतस्तामेवपश्यंतियथा।प्रासादेसादिशिदिशितुसापृष्ठतःसापुरःसापर्यंकेसा
पथिपथिवसातद्वियोगातुरस्य।हंहोचेतःप्रकृतिरपरानास्तिमेकापिसासासासासा
साजगतिसकलेकोयमद्वैतवादः॥६॥क्षम्यतामिति॥ ॥क्षम्यतामपरंकदापितवेदृ
शंनकरोमि।देहिसुंदरिदर्शनंमममन्मथेनदुनोमि॥७॥ ॥हेसुंदरिदर्शनीयरूपेक्षम्य
तांइममपराधंक्षमस्व।कदापितवईदृशंअपरंविप्रियनकरोमि।नकरिष्यामि।इयंचो
न्मदावस्था।तदुक्तं।रसार्णवसुधाकरे।अतस्तस्मिंस्तदतिभ्रांतिरुन्मादोविरहोद्भवइति

पुनः किंचित्संजातविवेकः कथयति। देहीत्यादि। हे सुंदरि मम मत्कृते। संबंधमात्रे षष्ठी।
दर्शनं देहि प्रयच्छ। तद्दर्शनसंप्रदानत्वायोग्यत्वेपि मम कृपयापि दर्शनं देहीति योगेन
चतुर्थी ज्ञेयं। तथा सुंदरीति संबोधनेन प्रोत्साहयति। मन्मथेन कामेन अहं दुनोमि। संत
प्तो भवामि। वर्णितमिति॥ ॥वर्णितं जयदेवकेन हरेरिदं प्रवणेन। किंदुबिल्वसमुद्रसंभ
वरोहिणीरमणेन॥८॥ ॥जयदेवकवेन जयदेवेन स्वार्थे कः। इदं हरेश्चरित्रं वर्णितं। की
दृशेन प्रणतेन। अर्थात् हरिमित्यर्थः। प्रवणेनेति पाठे हरिपरायणेनेत्यर्थः। पुनः कीदृशे
न किंदुबिल्वो जयदेवस्य कुलवृत्तिग्रामः। स एव महत्वात्समुद्र इव तत्र संभवो यस्य तादृ
शेन रोहिणीरमणेन चंद्रेण। तथा समुद्रात्पन्नेन पूर्णचंद्रेण तस्योन्नतिः क्रियते। तथा त

कुलस्योन्नतिर्जयदेवेन कृतेति चंद्रसाम्यं। किंदुबिल्वनाम जयदेवस्य कुलमेव। केचित्तु
किंदुबिल्वनामा कश्चिन्महाभागवतः समृद्धः कविश्च जयदेवस्य पूर्वपुरुष इति कथयं
ति। ग्लौरिंदुरेण तिलके हरिरोहिणीशावितिहारावली। तथा च पद्मावत्या उत्कर्षकथ
नाय रोहिणीरमणेत्युक्तं॥८॥७॥ ॥इदानीं काम एव मे दुःखं प्रयच्छतीति तमोपालंभ
गोचरं करोमित्याशयेनाह॥ हृदीत्यादि॥ ॥हृदि बिशलताहारो नायं भुजंगमनायक
ः कुवलयदलश्रेणीकंठेन गरलद्युतिः। मलयजरजो नेदं भस्म प्रियारहिते मयि। प्रहर
न हर भ्रांत्या नंग क्रुद्धा किमु धावसि॥२१॥ हे अनंग कंदर्प मयि न प्रहर प्रहारं मा कुरु॥
किमु इति वितर्के। मयि हर भ्रांत्या महादेवभ्रमेण क्रुधा क्रोधात्त्वं। धावसीति। किमु तर्कया

मि।अथवा।उश्तिहेअनंगहरस्तोत्वामयिकिंकिमितिधावसि।कीदृशेमयिप्रियारहितेवि
रहिते।हरःसर्वदाप्रियायुक्तोअहंत्वधुनाप्रियारहितश्तिमयिहरस्त्रमोनयुक्तश्तिना
वः।तथाचप्रियाविरहसंतप्तेमयिनोचितमितिध्वनितं।कामःपूर्वहरेणतछरीरंदग्धं
गरहितःकृतश्तिनावः।हरेकामस्यमदधैरसूचनायानंगपदेनसंबोधनं।अस्त्रमबीजंनि
रस्यति।हृदिअयंबिशलतायामृणालजलतायाहारस्तद्विरहजन्यसंतापश्रांत्यर्थंधृतः
नुस्तुजंगमनायकःसर्पराजोवासुकिः।इयंकंठेऽकवलयदलानांनीलोत्पलपत्राणांश्रे
णीपंक्तिः।औत्सायधृतानतुसागरजद्युतिर्विषकांतिः।इदंसर्वंगितापश्रांत्यर्थंधृतंम
लयजरजश्चंदनधूलिःनतुअस्मविभूतिरंगेलिप्तः।प्रश्निप्पिलचंदनश्चवोपिविरहता ९६

पवश्रात्धूलीकृतश्तिरहःपदेनसूचितं।तथाचबिशलतायांश्रोत्यदीर्घत्वादिदर्शना
त्तववासुकिस्त्रमानीलोत्पलपंक्तौश्यामत्वादिधर्मदर्शनाऽरलस्त्रमाच्चंदनरजसिनस्म
स्त्रमाच्चमयिमहादेवस्त्रमस्तवनयुक्तश्तिनावः।त्रयंचस्त्रांतिमानलंकारः।सादृश्याद्व
स्त्वंतरश्रतीतिस्त्रांतिमानितात्स्त्रहणात्।वितर्केकिंकिमुचेत्यमरः।उसंबुद्धौरुषोक्तौचे
तिविश्वः॥२१॥ऊसुमसायकत्वेनकामःप्रसिद्धोतःश्मानेवचूतमंजरीरूपान्बाणान्
धनुष्यारोप्यमांताडयिष्यतीतिशंकयापुनरपिकामायैवदैन्यंकरोति॥पाणावित्यादि
ना॥ ॥पाणौमाऊरुचूतसायकममुंमाचापमारोपयक्रीडानिर्जितविश्वमूर्छितज्जना
घातेनकिंपौरुषंतस्याएवमृगीदृशामनसिजप्रेंखत्कटाक्षाश्रुगज्वालातर्जरितंमनाग

पिमनोनाद्यापिसंधुक्षते॥२२॥ ॥हेमनसिजमदन।अमुंपुरःस्थितंचूतसायकमाम्रपु
ष्परूपंबाणं।पाणौहस्तेमाकुरु।वसंतकालीनपुष्पोद्गमंदृष्ट्वाह।चापंधनुर्मारोपयप्र
त्यंचायुक्तंमाकुरु।यद्वा।चूतसायकंहस्तेमाकुरु।हस्तेपिचेत्करोषि।तदाअमुंसायकंमा
आरोपयमासंधेहीत्यर्थः।अत्रमनसिजपदेनमन्मसोजातस्यतेमत्संतापकारित्वमनु
चितमितिध्वनितं।हेक्रीडानिर्जितविश्व।क्रीडयालीलयानिर्जितंविश्वंजगतयेनतादृश
स्यमूर्छितस्यमूर्छांप्राप्तस्यजनस्यमादृशस्यआघातेनप्रहारेणतवकिंपौरुषंअपितुन
किमपीत्यर्थः।अथवा।मूर्छितजनाघातेनतवकिंपौरुषंकुत्सितंपौरुषमित्यर्थः।मूर्छि
तत्वेहेतुमाह।तस्याएवमृगीशोहरिणीदृशःतस्याएवेतिविरहाधिक्येनराधानामग्र

हणाशक्तिः।प्रतिपाद्यते।प्रेंखंतःप्रसर्पंतोयेकटाक्षास्तएवआशुगाबाणास्तेषांश्रेणि
भिःपंक्तिभिर्जर्जरितंखंडखंडीकृतंमनोमनागपिस्वल्पमपिनसंधुंक्षतेनस्वस्थंभव
तिअद्यापि।अद्यपर्यंतमपिधुक्षधिक्षदीपनक्लेशजीवनेष्वितिधात्वनुसारात्।नसंधु
क्षतेनजीवतीत्यर्थः।इतिवा।तथाच।तत्कटाक्षरूपबाणैरहंमूर्छितः।संप्रतिः।संप्रति
मयिचूतमंजरीरूपसायकप्रहारोमृतमारणमिवाचरतीति।लीलयैवयेनविश्व
मपिजितंतस्यतेमूर्छितजनेषुप्रहारोयशोहानिकरइतिध्वनितं।सायकःखरख
ड्गोरितिविश्वः।अथास्त्रियांधनुश्चापावित्यमरः।किंपौरुषमित्यत्रद्वितीयव्याख्यानप
क्षेकिंपक्षेइत्यनेननिंदायांसमासः।आशुगोमारुतेबाणेइतिविश्वः।२२।ननुतत्कटाक्षा

दिस्मरणादेवतवऽःखंभवति।कामस्यतत्रकोपराधइत्यताआह॥भ्रूपल्लवमित्यादि
॥भ्रूपल्लवंधनुरपांगतरंगितानिबाणगुणःश्रवणपालिरितिस्मरेण॥तस्माअनं
गजयजंगमदेवतायामस्त्राणिनिर्जितजगंतिकिमर्पितानि॥३३॥ ॥किमित्यपेक्षे॥
तस्यांराधायांस्मरेणकामेनअस्त्राणिअर्पितानिस्थापितानितितर्कयामि।नन्वस्त्राणि
वीरेणहस्तेस्थापियितुमुचितानि।नत्वन्यत्रेत्यतआह।निर्जितेत्यादिनिर्जितानिजगं
तियैस्तानितथाचतैरेवास्त्रैर्जगत्रयंजित्वातत्रस्थापितानीतिभावः।तर्ह्यन्यत्रकिंनस्था
पितानीत्यतआह।अनंगेत्यादि।अनंगस्यकामस्यजयायजंगमदेवतायांगमनशी
लदेवतायांतथाचतयैवत्रैलोक्यजयायास्त्राणिदत्तानिअतोजातप्रयोजनानितत्रै ९८

वस्थापितानीतिभावः।देवतायायदस्त्रंदीयतेतत्केनापिप्रतिहंतुंनशक्यतइति
ध्वनितंअहोदेवतायामाहात्म्यंअंगंविनैवयत्स्मरेणजगज्जितं।अतएवानंगस्तज्ज
नितत्वात्देवदेवेशंशस्त्रंविहायतामेवाश्रितवानितिज्ञेयं।कानितान्यस्त्राणीत्यतआ
ह।भ्रूपल्लवमित्यादि।भ्रूःपल्लवमिवतदेवधनुःअपांगतरंगितानिकटाक्षस्यगता
निबाणाःश्रवणपालिःकर्मजिताप्रांतमेवगुणःप्रत्यंचा।अत्रनीलस्निग्धत्वात्भ्रुवः
पल्लवत्वेननिरूपणं।वक्रत्वेनचधनुष्ट्वेनरूपणं।अपांगस्यपरमर्मभेदकत्वाबाण
त्वेनरूपणं।कर्मपालिश्चदीर्घत्वात्प्रत्यंचिकात्वेननिरूपिता।अपांगमंगहीनेस्थाने
त्रांतेतिजकेपिचेतिविश्वः।पालिःकर्मलतायेस्त्रीपंक्तावंशाग्रनेदयोरिति॥संप्रतिराधा ॥२३॥

गविलसितान्येवस्मरबाणेरूपाणिमांपीडयंतिइतितस्याएवोपालंभंकरोमीत्याशये
नकामनुपेक्षपुरःस्थितामिवराधांसंबोध्याहान्रूचापइति॥ ॥भ्रूचापेनिर्दितःकटाक्ष
विशिषोनिर्मानुमर्मव्यथांश्यामात्माऋटिलःकरोतुकबरीभारोपिमारोद्यमंमोहं
तावदयंचतन्वितनुतांबिंबाधरोरागवान्सहृत्तःस्तनमंडलस्तवकथांबाणेर्मर्मक्रीड
ति॥२४॥ ॥भ्रूचापेभ्रूरूपेधनुषिनिर्दितोऽर्पितःकटाक्षविशिषःकटाक्षरूपोबाणो
मर्मव्यथांमर्मपीडांनिर्मानुकरोतुधनुष्यारोपितस्यबाणस्यपरमर्मपीडानमेवध
र्मइतितऽचितमेवाअथचाऋटिलोवक्रःश्यामात्माश्यामःआत्मास्वरूपंयस्यएताद
शःकबरीभारोपिग्रथितवेणीकेशसंचयोषिमारोद्यमंमारणायऽद्यमंपराक्रमंक ९९९

रोतुअथवामारस्यकामस्यऽद्यमंकरोतुयोंतर्मलिनःऋटिलश्चभवतिसोन्यमा
रणायततइतिअपिनासूचितंअथवाहेतन्वीअयंबिंबाधरोबिंबफलतुल्योध
रोमोहंमूर्छांतनुतांतनोतुकीदृशोरागवान्रक्तांविशिष्टःइदमपिनानुचितंयत
तोयोरागवान्मात्सर्ययुक्तःसपरमोहंकरोत्येवेतिअयंतवसहृत्तोसहर्तुलःस्तनमं
डलःऊचविस्तारोममबाणैःकथंकिमितिक्रीडतिबाणग्रहणरूपांक्रीडांकिमितिक
रोतिनसहृत्तस्यसञ्चरितस्यपरबाणग्राहित्वमुचितमितिभावःविरोधनामायम
लंकारःसहृत्तरूपगुणस्यपरबाणग्रहणक्रियाविरोधकथनात्तऽक्तंकाव्यप्रकाशे
विरोधःसोविरोधेपिविरुद्धत्वेनयद्वचःइतिविशिषस्तोमरेशरेइतिविश्वःश्यामोनिं

दितकल्पयोरितिधरणिः।कबरीकेशपाशोस्यादितिहारावली।कबरीकेशवेशइत्यमरः
।मारोमृतौविषेऽनंगेइतिविश्वः।बिंबोफलेबिंबिकायांप्रतिबिंबेचमंडलेदेहेछायाम
पिचारागोऽनुरक्तोमाऋर्येरंजनेपिनिगद्यतइतिविश्वः।चरितवल्लितवृत्तइतिशाश्वत
ः।आत्मादेहमनोब्रह्मस्वभावधृतिबुधिधितिविश्वः।२४।ननुतस्याश्रपिनापराधेनवा
स्मरस्यकिंतुतदंगस्यशब्दादिविषयाज्ञानाच्चंचलत्वंतच्चेतस्त्वांऽःखीकरोतीत्यतोनु
च्यमानातामन्वानश्राह।तानीत्यादि।। ।तानिस्पर्शसुखानितेचतरलाःस्निग्धाद
शोर्विभ्रमास्तद्वक्रांबुजसौरभंसमुधास्यदीगिरांवक्रिमा।।साबिंबाधरमाधुरीतिवि
षयासंगेपिचेन्मानसं।तस्माज्जय्यसमाधिहंतविरहव्याधिःकथंवर्ध्यते।।२५।।स्पर्शसुखा १००

नितदंगस्पर्शजन्यानिसुखानिइदानीमनुभूयमानानितान्येवपूर्वानुभूतान्येव
।एतेनत्वागेंद्रियविषयज्ञानंःकथितः।दृशौनेत्रयोस्तरलाश्चंचलाःस्निग्धाःस्नेह
गर्भाविभ्रमाविलासास्तएवपूर्वानुभूताएवाश्रनेनचक्षुर्विषयज्ञानंउक्तंवक्त्रांबुज
सौरभंतस्यामुखपद्मसौरभंतदेवश्रनेनघ्राणस्यविषयाप्तिरुक्ता।गिरांतद्वचसांसु
धाममृतंस्यंदतेश्रवतीत्येवंश्रीलोवक्रिमावक्रत्वमिदानींश्रोत्रेणगृह्यमाणंःसए
वपूर्वानुभूतएवश्रनेनश्रोत्रेंद्रियविषयसान्निध्यमुक्तं।बिंबाधरमाधुरीतस्माबि
बफलवायस्माधरस्यायामाधुरीमधुरताऽधुनामयास्वाद्यमानासैवपूर्वानुभूतैव
।श्रनेनरसनेंद्रियस्यविषयज्ञानंःकथितः।इत्येवंप्रकारेणविषयासंगेपितन्नदिंद्रि

याणांस्वस्वविषयासक्तावपिमानसंमन्मथश्चतस्यांराधायांलग्नसमाधितदेका
ग्रंयदिहंतेतिखेदेतदाविरहव्याधिस्तद्विश्लेषजन्योव्याधिःकथंवर्द्धते।अपिशब्दो
विरोधाभासालंकारसूचनार्थः।बाह्येंद्रियविषयासंगेसमाधेरभावात्।बाह्येंद्रि
यवृत्तिनिरोधेसतिमनसएकाग्रतयाएवसमाधिपदार्थत्वात्।तथाच।तदिंद्रिया
णांस्वस्वाभिमतविषयालाभेएवविरहसंभवति।ममतत्तदिंद्रियाणांविषयविछे
दस्याभावान्मनसश्चतच्चिंतनैकपरत्वात्तयासहविश्लेषएवनास्तीतिकथंविर
हजन्यव्याधिःसंभवइतिभावः।समाधौव्याधेरनुद्भवइतिध्वनिः।चएवार्थः।गंध
रूपरसस्पर्शशब्दाश्चविषयाअमीत्यमरः।तस्मात्कोप्यद्भुतोअवितर्क्यस्तत्प्रेमविव

र्त्तत इति सिद्धांतः॥२५॥इदानींसर्गांतेआशिषमाशास्ते।तिर्यगिति॥ ॥तिर्यक्कंठवि
लोलमौलितरलोत्तंसस्यवंशोच्चरद्गीतिस्थानकृतावधानललनालक्षैर्नसंलक्षि
ताः।संमुग्धंमधुसूदनस्यमधुरेराधामुखेंदौमृदुस्फंदंकंदलिताश्चिरंददतुवःक्षेमं
कटाक्षोर्मयः॥२६॥ ॥मधुसूदनस्यश्रीकृष्णस्यकटाक्षोर्मयोनेत्रांतदर्शनतरंगावो
युष्माकंक्षेमंददतु।कल्याणंप्रयच्छतु।दुरितासद्भावेनक्षेमदातृत्वंसंभवतीतिदुरित
दारणसामर्थ्यद्योतनायमधुसूदनपदोपादानं।अपिचापलसूचनायेतिवाकिंलक्षण
ः।मधुरेअमृतादपिमधुरिमाश्रये।राधायामुखबिंदुमिव।तस्मिन्मृदुस्पंदंईषच्चलनं
संमुग्धमव्यक्तंचसुंदरंवायथास्यात्तथाकंदलिताःपल्लविताःतथाचेंदुदर्शनात्तरंगाअ

तीवपल्लविताभवंतीतिकटाक्षाणांतरगसाम्यं।क्वचिच्चप्रेम्णाकंदलिःसुमुग्धमधु
रेराधाननेंदौसुधासारेवोमधुसूदनस्यददतुक्षेमकटाक्षोर्मइयेतिपाठः।तदाकिं
विशिष्टेमुखेंदौ।सुष्टुमुग्धंचतन्मधुरंचतत्तस्मिन्।रम्येनवप्रियेचेत्यर्थः।मधुरस्तु
प्रियेस्वादाविति।पुनःकिंभूते।सुधासारे।सुधायाःसारे।नन्वन्यासुपश्यंतीषुक
थंराधामुखचंद्रएवपल्लविताऊर्म्मयअतआह।वंशेउच्चरतगीतिस्थानेषुगानप
देषुस्वरग्रामादिषुकृतावधानैःसमर्पितचित्तवृत्तिभिर्ललनालक्षकैःकामिनीकदं
बकैर्नसलक्षितानावलोकिताः।यथाचसकलएवकलत्रकदंबोवंशध्वनिमोहितोन
किंचिदपश्यदिति।तत्रैवपल्लविताइतिभावः।वंशपूरणेस्वभावमनुवर्णयति॥किं

किंभूतस्य।तिर्यक्वक्रःकंठोयस्य।विलोलश्चंचलोमौलिःकिरीटोयस्यतरलश्चच
लउत्तंसः।कर्णाभरणंयस्यसः।तिर्यक्कंठश्चासौविलोलमौलिश्चासौतरलोत्तंस
श्चेतिकर्मधारयः।तथाविधस्येत्यर्थः।गीतिर्गानं।ललनातुनितंबिनीत्यमरः।उ
त्तंसःकर्णपूरेपिसुंदरेनायकेपिचेतिधरणिः।कंदलंतुनवांकुरेकलध्वनौउप
रागेचेति।ऊर्मिःपीडालवोत्कंठाभृंगप्रकाशवीचिषु।वस्त्रसंकोचलेखायामिति
॥२६॥ ॥इतिश्रीगीतगोविंदटीकायांमुग्धमधुसूदनोनामतृतीयःसर्गः॥ ॥३॥
पूर्वसर्गेश्रीकृष्णस्यविरहजनितावस्थावर्णिता।अत्रतुराधायाविरहावस्थांश्री
कृष्णंप्रत्याह।यमुनेत्यादिना॥ ॥यमुनातीरवानीरनिकुंजेमंदमास्थितं।प्राहप्रेम

भरोद्भ्रांतंमाधवंराधिकासखी॥२७॥ ॥राधिकायाःसखीमाधवंकृष्णंप्राह।वक्ष्य
माणमुवाच।राधेत्यनुकंपायांकः।कीदृशंप्रेमभरेण।राधाविषयकस्नेहाधिक्येनउ
द्भ्रांतंउत्क्षिप्तं।चलवलनादिक्रियांकर्त्तुमशक्तं।अतएवतदन्वेषणंविहाययमुनाया
स्तीरेयद्वानीरनिकुंजंतत्रमंदंनिरुत्साहं।आस्थितमासीनं।अमंदमिति।वचनवि
शेषणंवा।अभिशयव्याकुलांराधांदृष्ट्वाअमंदंसवेगमाहेत्यर्थः।मंदःखलेमंदग
तेमूर्खेस्वैरिणिरोगिणीतिविश्वः।सप्रेमाभेदरहितं।यूनोर्यद्भावबंधनमिति।रसार्ण
वसुधाकरे॥२७॥तदेवगीतेनदर्शयति।निंदयतीत्यादि॥ ॥निंदतिचंदनमिंदुकिर
णमनुविंदतिखेदमधीरं॥व्यालनिलयमिलनेनगरलमिवकलयतिमलयसमीरं

॥१॥साविरहेतवदीनामाधवमनसिजविशिषभयादिवभावनयात्वयिलीना।ध्रु
वपदं॥ ॥गीतस्यास्यकर्णाटरागः।तल्लक्षणं।कृपाणपाणिर्गजदंतपत्रमेकंवहन्
दक्षिणकर्णपूरे॥संस्तूयमानःसुरचारणौघैःकर्णाटरागःशिखिकंठनीलः।इति॥
एकतालीतालश्च।तल्लक्षणंप्राक्कृतं।विरहोत्कंठितानायकाचेयं॥नैवागतःसमु
चितेष्वपिवासरेषुप्राणेश्वरःस्वगुरुकार्यवशेनयस्याः।दुर्वारवृत्तविरहज्वरतापि
तांगीमुत्कंठितांवदतितांभरतःकवींद्रः।इति।गीतार्थस्तु।हेमाधवसाराधातवविरहे
दीनादुःखिता।तथाचसादुःखिताभयांस्तुसस्त्रीकएवेतिनतद्दुःखंजानातीतिमा
धवपदेनकटाक्षेक्षितं।हाकष्टं।यदिदुःखितातर्हिसाकथंवरीवर्त्ति।तदाह।त्वयिलीना

मग्ना।कस्मादिव।मनसिजस्यकामस्ययेविशिषाबाणास्तद्भयादिव।भवतोमनसो
जातइति।त्वयिलीनेसतितस्माद्भयंनभवतीतिमनसिजेतिध्वनितं।मनुमयिकथं
लीनेत्यतआह।भावनयेति।भावनयासर्वविषयनिंदापूर्वकत्वत्स्मरणेनेत्यर्थः।ध्रु
वपदं॥विषयनिंदामाह।चंदनंमलयजंनिंदति।विरहिणामुपतापकरंवृथाशैत्या
धाराभिधांबिभ्रतीति।निंदांकरोति।किंच।इंदुकिरणंसुधांशुकिरणंअनुलक्षीकृ
त्यखेदंकष्टंविदेति।प्राप्नोति।तत्रापिअधरं।अनल्पं।धीरस्त्रुकुंकुमेस्वल्पेबुधेधै
र्यवतित्रिष्विति विश्वः।अधीरंधैर्यरहितंयथास्यात्तथानिंदतीतिवा।अधिकंईरय
तिकामशरान्प्रेरयतीतिचंदनविशेषणंवा।अपिच।मलयसमीरंमलयपर्वतसं

बंधिवातंव्यालनिलयमिलनेनव्यालानांसर्पाणानिलयोनिवासश्चंदनवृक्षस्तस्य
संसर्गेणगरलमिवविषमिवकलयतिमन्यते।चंदनवृक्षस्थितसर्पैःपीत्वोद्गीर्णाएते
मलयवायवोऽतएवसमीरंयंति।स्थानात्स्थानांतरंस्त्वेवेतिसमीरोवस्तुचालक
स्वभावात्विषयमयाःकथमन्यथाशरीरंसंपर्कादिवमूर्छांजनयंतीतिगरलमिवम
न्यतीतिभावः।तथाचदुःखितस्यविरहिणोहिसुखहेतवोपिदुःखायैवभवतीतिध्व
नितं।विरहौत्कंठ्येनस्मरणरूपांदशांचप्राप्नोति।तदुक्तंशृंगारतिलके।दोषोयत्रा
न्यकार्येषुतदेकाग्रंचमानसं।श्वासैर्मनोरथैश्चापिचेष्टातत्स्मरणंयथेति।इंदुंनिंद
ति।पद्मकंदलदलीतल्पंनवामन्यते।कर्पूरंकिरतिप्रयातिनरतिप्रालेयधारागृहे॥

श्यामैःकेवलमेवखिद्यतितनूजाताप्यसौबालिकायत्तत्कोपियुवासखिस्मरसख
श्वेतस्पन्दुष्पाऽस्तितःव्यालोभुजंगमेक्रूरेश्वापदेऽष्टदंतनीतिविश्वःगरलंतुविषे
मानेगरलंतृणमूलकेऽत्यपि॥अविरलेति॥ ॥अविरलनिपतितमदनशरादिव
नवदवनायविशालंस्वहृदयमर्मणिवर्मकरोतिसजलनलिनीदलजालं॥२॥सा
स्वहृदयमर्मणिहृदयरूपमर्मस्थानेसजलनलिनीदलजालंजलसहितपद्मिनी
पत्रसमूहंवर्मकवचंकरोति।कीदृशंविशालंकिमर्थमिवअविरलंयथास्यादेवंनिप
तितोयोमदनशरःकामबाणस्तस्माद्भवदवनायेवंभवतोरक्षणायेच।तस्माद्धृद
येत्वंसर्वदातिष्ठसि।अतोऽविरलनिपतद्भिर्मदनशरैस्तेपीडामाभूदितिकमलिनीप १०५

त्रैःसन्नाहमिव।करोतीतिनावगकेचित्तुकीदृशंवर्मअविरलनिपतितमदनश
राद्भवनायस्वरक्षणायभवदिवसंपद्यमानमिवेतिव्याकुर्वंति।अवनंरक्षणेप्रीता
वितिविश्वप्रकाशः।यथासद्दंस्थलंमर्मेत्यपि।विशालंविस्तीर्णमपि।भवद्भवनायेति
प्रथमव्याख्यानेसख्यास्नेहाधिक्यंसूचितं।तेनहृतीकर्मकुशलत्वमपिकथितं॥
२॥कुसुमेति॥ ॥कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं।व्रतमि
वतवपरिरंभसुखायकरोतिकुसुमशयनीयं॥३॥ ॥साकुसुमशयनीयंपुष्पशा
य्यांकरोति।रचयति।कीदृशं।अनल्पविलासकलायांबहुतरक्रीडाकलायांकमनी
यंकाङ्क्षणीयं।एवंभूतावस्थायामपित्वदागमनाशयानुरागातिशयेनकुसुमशय्या

मारचय्यनून्मार्गदत्तदृष्टिरेवतिष्ठतीतिभावः।किमिवाऽकुसुमविशिषःकामःतस्य
येशराःऽकुसुमस्वरूपास्तेषांतल्पंशय्यायत्रतादृशं।व्रतमिव।किमर्थंतवपरिरंभ
सुखायालिंगनसुखप्राप्तये।तल्पंचशयनीस्यात्तल्पमष्टकजत्रयोरितिविश्वः।एभि
स्त्रिभिःपदैरुद्वेगाख्यापंचम्यवस्थाकथिता।सुखस्पर्शंपुष्पमपिबाणत्वेनवतीति
ध्वनितं।अथवासानल्पविलासकलाकमनीयंकुसुमशयनीयंतवपरिरंभसुखा
यकुसुमविशिषशरतल्पंव्रतमिवकरोतित्यर्थः॥३॥वहतिचेति॥ ॥वहतिचगजि
तविलोचनजलधरमाननकमलमुदारं।विधुमिवविकटविधुंतदंतदलनगलि
तामृतधारं॥४॥ ॥साउदारंसुंदरंआननकमलंमुखपद्मंवहति।धारयतिपेमामृ १०६
ताश्रुदावृत्वेनोदारमितिवा॥कीदृशं।चजितेत्वन्मार्गप्रेक्षणायतिर्यक्प्रसारि
तेविलोचनेनेत्रेएवजलधरोरसवर्षिणौमेघौयत्रतादृशं।अत्रनिरंतराश्रुवर्षित्वे
ननेत्रयोर्जलधरत्वेनरूपणं।कमिवचंद्रमिव।कीदृशं।विकटाःकरालाःविशालाः
वायेविधुंतुदस्यराहोर्दंतास्तैर्यद्दलनंपीडनंतस्माज्जिताप्रच्युताऽमृतस्यधारा
यत्स्तादृशं।अत्रमुखस्यविधुनानेत्रजलस्यचामृतधारयासादृश्यादाक्षेपालंकारो
बोध्यः।तथाचानेनवैवर्ण्यमपिध्वनितं।किकटंसुंदरेषोक्तौविशालविकराजयोरि
तिविश्वः।तमस्तुराऽस्वर्भानुःसैंहिकेयोविधुंतुदश्चत्यमरः॥४॥विलिखतीति॥ ॥वि
लिखतिरहसिकुरंगमदेननवंतमशरसमद्भुतं।प्रणमतिमकरमधोविनिधायक

रेवशरंनवचूतं॥५॥ ॥किंचारहसिएकांतेकुरंगमदेनकस्तूर्याभिवंतविलिखति
।कीदृशं।असमशरभूतं।कामरूपिणं।तेधः आसनस्थानेमकरंविनिधायधृत्वात
वकरेनवचूतंनूतनाम्रमंजरीरूपंशरंबाणंचनिधायप्रणमति।नमस्करोतिमक
रवाहनस्त्वमेवमांकिमितिसंतापयसीतिप्रणम्यप्रेष्टंयाचतइतिभावः।तथाचवाह
नारूढःप्रियतमःशीघ्रमागमिष्यतीतिवाहनलिखनमितिध्वनितं।विरहिणीव्यापा
रश्चकथितः।तदाहभरतः।देवतापूजनंकुर्याद्दद्याद्बलिभुजेबलिं।लिखेत्कांतप्रति
कृतिं।पाठयेच्छुकसारिकां।गणयेच्चावधिदिनंगीतंगायेत्तदंगकं।एवंविधत्वियोगेन
तयेत्कालंवियोगिनीति॥ ॥मृगनाभिर्मृगमदःकस्तूरीगंधशेषरः।इतिहारावली॥

यद्यपिवियोगिन्याःकाममूर्त्तिलिखनंनघटेततथाप्यत्रश्रीकृष्णस्यकंदर्पस्वरूप
त्वात्।तदाक्रांतचित्तत्वेनतद्रूपेणलिखनं॥५॥प्रतिपदमिति॥ ॥प्रतिपदमिदमपि
निगदतिमाधवतवेवरणेपतिताहं।त्वयिविमुखेमयिसपदिसुधानिधिरपितनुते
तनुदाहं॥६॥ ॥प्रतिपदंइतस्ततश्चलंतीपदंपदंप्रतिवचनंप्रतीतिवाइतिनिगदति
जल्पति।हेमाधवतवचरणेहंपतितात्वांनमामीत्यर्थः।त्वयिविमुखेविश्लिष्टेसति।सु
धानिधिरपिअमृतनिधिश्चंद्रोपितनुदाहंमच्छरीरसंतापंतनुतेविस्तारयति।अत
नुयथास्यात्तथा।तनुर्दुर्लक्ष्यंवा।एतदवसरेमांनरक्षसीत्यनुचितमितिमाधवस्यार्थ
ः।त्वंमायाःलक्ष्म्याःधवःस्वामी।श्चंद्रश्चसमुद्रोत्पन्नत्वालक्ष्म्याःसहोदरइतित्वयिनिक

अतनुदाहंस्म
रतापंवा×३

टेस्थितेसतिलक्ष्म्याःसपत्न्यपिमेकिमितिकर्त्तुनशक्नोति।त्वयिप्रतिकूलेचसति।
स्वभगिनीसापत्न्यंमयिस्मरन्सुधानिधिरपिमेतनुदाहंतनुतइतिमाधवपदेनध्व
नितं।सुधानिधेस्तापकारित्वंविरुद्धमिति।विरोधनामायमलंकारः॥६॥ध्यानेत्यादि
॥ ॥ध्यानलयेनपुरःपरिकल्प्यभवंतमतीवदुरापं॥विलपतिहसतिविषीदतिरोदि
तिचंचतिमुंचतिपापं॥७॥ ॥अतिशयेनदुःखेनप्राप्यं।अतीवदुरापं।भवंतंध्यानल
येनएकाग्रतयापुरःपरिकल्प्यअग्रेलिखित्वा।अथवा।अतीवदुरापंभवंतंदौत्यादि
नाअतिदुर्लभंत्वाध्यानलयेनध्यानंचिंतनंतत्रयोलयस्तत्परत्वंतेनपुरोग्रेपरिक
ल्प्यसाक्षात्कृत्वा।प्रथमपक्षेतुविलिखति।रहसीत्युक्तत्वान्नकल्पना।साविलपति।वि

लापोदुःखजंवचःशठइयत्कालंयदर्थेविरतोसि।तत्रैवगच्छेत्याद्युक्त्वाहसति।उपसंह
ति।विषीदतिपुरःस्थितोपिचरणौगृहीत्वानानुनयनीत्येवंविषादप्राप्नोति।पुनःकथ
मयंवश्यःस्यादितिरोदिति।तदुक्तं।रुदितमुदितमस्रंयोषितांविग्रहेष्विति।चंचतिचादू
क्तिभिरनुस्मृतंदृष्ट्वागच्छति।पश्चादनुनीयालिंगितातापंमुंचति।स्वविश्लेषदुःखंत्यजति
।यद्वारोदिति।पश्चादनुनयंतंप्रणयरोषान्मुंचतिति।रस्करोति।अतएवतापंचंचतिता
पंप्राप्नोतीत्यर्थः।अलंकारोत्रदीपकः।वहतीत्यारभ्यउन्मादावस्थाकथिता।तदुक्तं।श्वास
प्ररोदनोत्कंपवसुधाश्लेषणैरपिव्यापारोजायतेयत्रसउन्मादःस्मृतोयथेतिकिलंकिं।
चिताख्यश्चायंहावः।तदुक्तं।दशरूपकोक्रोधाश्रुतीहर्षभीत्यादेःसंकरःकिलकिंचित

मिति। अलंकारलक्षणं काव्यप्रकाशे। सैव क्रियासु बह्वीषु कारस्येति दीपकं। अस्यार्थः।
बह्वीषु क्रियासु कारकस्य सैव सकृद्वृत्तिरेव दीपकमिति॥७॥ श्रीजयदेवेति॥ ॥श्रीजय
देवभणितमिदमधिकं यदि मनसा नटनीयं॥ हरिविरहाकुलवल्लवयुवतिसखीवचनं
पठनीयं॥५॥ श्रीजयदेवभणितं यदि मनसा नटनीयं॥ अभिनेतव्यं भावनया स्वादनीय
मित्यर्थः। तदा इदं इः कामस्तं ददातीति इदस्तं कृष्णे तादृशाभिलाषप्रदमित्यर्थः। अत ए
वाधिकं सुखमधिकृत्य वर्त्तमानं। हरिविरहा श्रीराधा तस्या या आकुलवल्लवयुवति।
सखी सभर्तृका सहचरी तस्याः वचनं पठनीयमिति स्ववेदनया परवेदनां जानातीति स
भर्तृकेति ज्ञेया। वल्लवयुवत्युक्तं। आकुलाया वल्लवयुवतिस्तस्याया सखीदूतिस्वेन प्रेषि

ता तस्याः वचनं पठनीयं॥८॥ सा त्वां विना कुत्रापि निर्वृतिं न लभत इत्याह। आवास इ
ति॥ ॥आवासो विपिनायते प्रियसखी मालापि जालायते तापोपि श्वसितेन दावदहन
ज्वालाकलापायते॥ सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमाय
ते विरचयन् शार्दूलविक्रीडितं॥२८॥ ॥तद्विरहेण सा हरिणीरूपायते मृगीरूपमिवा
चरति। विश्लेषव्याधिजनितपांडुवर्णा हरिणीरूपेणोपमीयते। तथा च। यथा मृगवधू
वने संमतान् प्रदीप्तदावाग्निज्वालोद्विग्ना व्याघ्रेण त्रासिताग्रे व्याधजालं विततपश्यंती द
शदिश्वकित्चकितं विलोकमाना क्वापि शं न लभते। तद्वदियमपीति दर्शयति। आवा
सो मंदिरं विपिनायते। ऽरण्यमिवाचरति। प्रियसखी। पंक्तिरपि जालायते वियोगदुः

खासहिष्णुतयाप्राणमपित्यक्तुंप्रवृत्तायाःतद्रोधकत्वात्।तापशांत्यर्थंप्रियसखीदत्ता
मालापिजालायते।तथाहरिणीबंधनार्थंजालंक्षिप्यतेतद्वदाचरति।तापोपिविरहज
नितःसंतापोविश्वसितेननिश्वासेनसहायभूतेनश्वासवायुनावनाग्निज्वालावलीवाच
रति।एवंखेदमभितयंत्याह।हाकष्टंसाकथंवर्त्तते।यतःकंदर्पोपिशार्दूलविक्रीडितंवि
रचयन्कृतांतइवाचरति।हाहाकथंपरमानंदजनकोपिकामःत्वद्विश्लेषेविपरीतमा
चरति।हरिणीभूशब्देनएवंभूतायामवस्थायांमत्सख्याःमृग्याइवत्वयिस्नेहाधिक्यमि
तिध्वनितं।शार्दूलविक्रीडितंछंदः।प्रथमदेउद्वेगाख्यावस्थाशेषेष्टमीव्याध्यवस्था
कथिवा।तल्लक्षणं।अभीष्टसंगमाभावात्व्याधिःसंतापलक्षणः।अत्रसंतापनिश्वासौ

शीतवस्तुनिषेधनं।नोत्तरंभाषतेप्रश्नेनैतेनशृणोतिचेति॥२०॥तदेवगीतेनप्रपंच
यति॥स्तनविनिहितमिति॥ ॥स्तनविनिहितमपिहारमुदारंसामनुतेकृशतनु
रतिभारं॥१॥राधिकाविरहेतवकेशव॥ध्रुवपदं॥ ॥गीतस्यास्यदेशाखरागः।आ
स्फोटनाविःकृतरोमहर्षोनियुद्धसंनद्धविशालबाहुः।प्रांशुःप्रचंडद्युतिरिंदुगौरो
देशाखरागःकिलमल्लमूर्त्तिरिति॥एकतालीतालश्चतल्लक्षणं।प्राक्कथितं।गीतार्थस्तु।हेकेश
वतवविरहेसाराधिकाअनुकंप्याराधास्तनविनिहितमपिस्तनयोरुपरिधृतमपि
उदारमनोहरंसंभोगादौस्वांगसंसर्गित्वयादत्तंहारंअथवापूर्वंयेनस्वकंठधृतेनत
वसंगमःप्राप्तस्तं।अतएवउदारंमनोहरंबहुप्रदमपिअतिभारंमनुतेतत्रहेतुःकृशा

तनुर्यस्माइतिआतिकृशतयासखीजनैःप्राणरक्षार्थंवह्निसमर्पितंतत्कारणेशाक्या
सात्वयाप्राणनीयेतिभावःअनेनकार्श्यरूपोव्याधिरुक्तःकृतंत्रीरूपोनुभावश्चायं
।तथाचाकंसुखंतस्येशोनियंताकेशःसर्वेषांसुखप्रदइतिमृतयुवतिजीवनंतद्रूप
ःकेशश्चासोवश्चकेशवःएतादृशोनत्वयाएवंभूताप्राणायिनीमत्सखीदुःखितानभवति
।तन्नोचितमितिकेशवेतिसंबोधनेनध्वनितं॥१॥सरसेति॥ ॥सरसमसृणमपिम।
लयजपंकंपश्यतिविषमिववपुषिसशंकं॥२॥ ॥अपिचासामलयजपंकंचंदनद्र
वंचवपुषिदेशेदेसशंकंयथास्यादेवंविषमिवपश्यतिकीदृशंस्निग्धार्द्रमपिमसृणो
कर्कशोस्निधेइतिमेदिनीकरःपंकःकर्दमपापयोरितिविश्वःसरसःरसोद्बोधकश ११११

तिवा॥२॥श्वसितेति॥ ॥श्वसितपवनमनुपमपरिणाहंमदनदहनमिववहतिस
दाहं॥३॥ ॥श्वसितपवनंनिश्वासवायुंवहतिधारयति।कीदृशंश्चनुपमपरिणाहं
।उपमारहितःपरिणाहोदैर्घ्यंयस्यतादृशं।कमिव।कामाग्निमिव।कीदृशं।सदाहं।स
दाहंयथास्यात्तथावहतीतिवा॥३॥दिशिदिशीति॥ ॥दिशिदिशिकिरतिसजलकणजा
लं।नयननलिनमिवविगलितनालं॥४॥ ॥सादिशिदिशिनयनंनेत्रपद्मंकिरति॥
कीदृशं।सजलकणजालं।जलकणजालैरश्रुजलकणजालैरश्रुजलकणिकासमू
हैःसहितं।किमिव।विगलितंनालंयस्मएवंभूतंनलिनमिवात्यर्थमाश्रूस्रानावहि
र्भूतप्रायनयनावलोकनत्यक्तनालंसजलप्रक्षिप्तपद्मंनोप्रेक्षितंतथाचस्नेहात

स्वनेत्रपद्मेनत्वदागमनमार्गरचनमिवकरोतीत्यपिध्वनितं॥४॥नयनेति॥ ॥नयनविष
यमपिकिशलयतल्पंकलयतिविहितहुताशविकल्पं॥५॥ ।किंच।किशलयतल्पंनव
पल्लवशयनीयंविहितोहुताशस्याग्नेर्विकल्पःसंशयोयत्रतादृशं।कलयति।किंभूतं
नयनविषयमपिदर्शनीयमपिप्रत्यक्षोपलभमानमितिवा।अथवा।दृग्गोचरमपि
एवंभवति।स्पर्शेकिवक्तव्यं।त्वद्विश्लेषमसंख्यात्यक्तंशयनादिकमितिध्वनितं।उद्वेगा
वस्थाचेयंकथिता।त्यजतीति॥ ॥त्यजतिनपाणितलेनकपोलं।बालशशिनमिवसा
यमलोलं॥६॥ ॥सासांयंसंध्यासमयेपाणितलेनकपोलंनत्यजति।ब्लीदृशं।अलोलं
।अचंचलं।दिवसस्तुयथाकथविन्नीतोरात्रिस्तुयुगायमानाकथंनेतव्येति।कपोलेपा

ने

णिंकृत्वासायंचिंतयतीतिभावः।कमिव।बालशशिनमिव।द्वितीयाचंद्रमिव।मुखा
र्द्धस्यकरतलछन्नतयार्द्धस्यदृश्यमानतयाविरहेणपांडुतयासायमुदयेनालोलत
याकृशत्वेनचद्वितीयाचंद्रसादृश्यं।इयंचजडावस्था।तदुक्तं।यत्रध्यायतिनिःसं
ज्ञंजडतासाप्रकीर्त्तिता।अत्रस्पर्शानिभिज्ञत्वंवैवर्ण्यंशिथिलांगता।अकांडहुंकृति
स्तंभनिःश्वासकृशतादयइति॥६॥हरिरितीति॥ ॥हरिरितिहरिरितिजपतिसकामं।
विरहविहितमरणेवनिकामं॥७॥ ॥सानिकाममतिशयेनहरिरितिहरिरितिजप
ति।केव।विरहेणत्वद्वियोगेनविहितमारब्धंमरणंयस्याःसेव।कथंयस्याःसकामंसा
भिलाषंएवंक्रमाद्दशम्यवस्थायांप्राप्तायामपिसाभिलाषमितिनवानुरागंकुर्वाणाऽ

रि

था

स्मिन्नेवशरीरेतवसंगमामृतंकामयमानाचिंतामणिरूपंस्वसर्वस्वभूतंतवानाम
मंगलंजपति।परमेष्टमंत्रवदावर्त्तयतीत्यर्थः।मनोहारिसर्वज्ञत्वगुणविशिष्टत्वा
द्धरिरितिअखिलक्लेशहरणाद्वा।अत्रप्राप्त्यभावेजन्मांतरेपिसएववल्लभोभूयादं
तेयामतिःसागतिरितिन्यायात्एवमनुरागेदशावस्थानिरूपिता।तदुक्तं।आलोका
लापसंरूढरागाकुलितचेतसोः।तयोर्भवेदसंप्राप्तौदशावस्थःस्मरोयथेति।अभि
लाषोथचिंतास्यात्स्मृतिश्चगुणकीर्त्तनं।उद्वेगोथप्रलापःस्यादुन्मादोव्याधिरेवच।ज
डतामरणंचेतिदशमीजायतेक्रमात्।असंप्राप्तौभवंत्येतास्तयोर्दशदशायथेति।शृं
गारतिलके।अत्रतुनित्यानंदरूपयोर्मधुररससर्वस्वविग्रहयोर्नवावस्थाएवसंगता।

ः।अनुरागकाष्ठांदर्शयन्तदभासोऽत्रदर्शितः।साक्षात्तुकेष्वेवश्रीकृष्णस्यमाधुर्यभर
दर्शनायैवशुकादिभिस्तादृशाधिकारिजनेषुनिरूपितातेननवानामिहलक्षणं।कृतं
।तत्रव्याधिलक्षणंसंतापवेदनाप्रायोदीर्घश्वाससमाकुलः।तनूकृत्तनुव्याधिरष्ट
मोजायतेयथेति।शेषानांभेदाः।पूर्वमेवदर्शिताः।यद्यपिकटुपरिणामाइवएतेप्र
भासंतेतदप्यानंदरूपानुरागमूलत्वात्परमानंदनिधानश्रीभगवदाश्रयत्वात्च
मत्कारिमहानदरसविकारत्वाच्चतत्पोषकत्वाच्चानंदसंदोहाएवह्येतेभावाः।इति
सिद्धांतः।वस्तुतस्तुनदुःखमयाः॥७॥श्रीजयदेवेति॥ ॥श्रीजयदेवभणितमितिगी
तं।सुखयतुकेशवपदमुपनीतं॥८॥ ॥इतिअमुनाप्रकारेणश्रीजयदेवभणितंश्री

राधिकासख्यागीतंश्रीकृष्णंप्रतिउपनीतंप्रापितंकेशवपदंसुखयतु।त्वरयाश्रीराधा
भिसारणेनश्रीकृष्णस्यचरणंप्रतिशंविदधातु।अथवा।यत्सख्याश्रीकृष्णंप्रतिकथि
तंतदेवश्रीजयदेवेनरागतालादिनाबद्धंगीतंगायतांशृण्वतांसुखयतु।केशवप।
दंउपनीतं।समर्पितं।केशवस्यपदंस्थानवैकुंठलोकंतत्रोपनीतं।वावैकुंठलोके
पिगीयतइतिभावः।अथवा।उपनीतंउपस्थितीकृतंगीतंकेशवःपदंत्राणंयस्यास
वैष्णवस्तंसुखयतु।केशवस्यपदंस्थानमितिवा।पदंस्थानेचवाक्येचसंनिधिव्यवसा
ययोः।त्राणेपिपदमाख्यातमितिविश्वः॥८॥९॥एवंदशम्यवस्थापर्यंतंविरहोद्रे
कश्रुत्वानिरूपायस्थकितचित्तंप्रत्याह॥सारोमांचतीति॥ ॥सारोमांचतिसीत्करो

तिविलपत्फक्कंपतेताम्यतिध्यायत्फद्भसतिप्रमीलतिपतत्फद्यातिमूर्छत्यपि।एता
वत्यतनुज्वरेवरतनुर्जीवेन्नकिंतेरसात्स्ववैद्यप्रतिमप्रसीदसियदित्यक्तोयथाह
स्तकः॥२९॥ ॥हेस्ववैद्यप्रतिम।स्ववैद्योधन्वंतरिःप्रतिमाप्रतिबिंबोयस्यतादृश।रू
पश्रियादिभिर्विरहव्याधिचिकित्सकतयात्वंचेत्प्रसीदसि।प्रसन्नोभवसि।तदाए।
तावत्यतनुज्वरेकामसंतापेसावरतनुःत्वाद्योग्यासौंदर्यादिभिःश्रेष्ठतनुर्यस्याःते
रसात्संभोगशृंगाररसरूपमृतसंजीवनमहौषधात्किंनजीवेदपितुजीवेदेव
।अन्यथात्वद्रसद्व्यतिरेकेनतयाहस्तकोपित्यक्तस्त्यक्तप्रायोभविष्यतीत्यर्थः।संप्र
तिमूर्छायांवक्तुमपारयंत्यात्याहस्तकेनतयासखीषुव्यवह्रीयतेत्वत्संगमाभावेसो

पित्यहतीतिन्नावः।अथवाअन्यथाऽपरोहस्तकोहस्तक्रियाप्रकारः।वैद्यकोपचार
ःत्यक्तइत्यर्थः।कचित्त्वतोऽन्यथानांतकइतिपाठस्तदाऽन्यथायदिनप्रसीदसितदा।
त्वन्नस्तवापेक्षयान्योंतकोनअपितुत्वमेवांतकइत्यर्थः।तदेवकामज्वरजनितचेष्टि
तमनुवर्णयति।सारोमांचतीत्यादि।रोमांचतिपुलकोऽमयतीत्यर्थः।सीत्करोति
सीत्कारशब्दमनुऽरुतेसान्निलाषरोमोऽमेनकंठध्वनिंकरोतीत्यर्थः।विलपति
शब्दोनमिलितइत्यादिविलापंकरोतिविशेषेणोत्कंठयात्वऽगुणान्आलपति।क
थयतीतिवा।उत्कंपतेकथमस्यविश्लेषःसोढव्यइतिकंठयुक्तासतीताम्यतिध्याना
भवति।अनेनवेपथुर्वैवर्ण्यरूपश्चसात्विकःकथितःध्यायतिकथंलभ्येतेतिचिं ११५

तयति।तीव्रचिंतयाऽऽधमतिन्नमंकरोति।अनेनोन्मादःकथितःतस्यविशेषणा
निमीलतिबाह्यन्नमेनचक्षुर्मीलनंकृत्वात्वयिमनोधारयति।हृदिस्फुरितेउद्याति
गछति।कार्श्येनक्षीणतयापततित्वय्यप्राप्तेमूर्छतिमूर्छांप्राप्नोति।अनेनमूर्छाकि
थिता।अपिशब्देनएतावत्यामपिव्यवस्थायांसकलगुणगणालयमशेषनायकशि
रोरत्नंत्वामेवपरमरसज्ञासाधुजनादिनिःसात्विकैःशीत्कारादिनिरनुन्नावैःचिं
तादिव्यभिचारिनिरनिलाषाद्यवस्थाभिःसागरसोदयोनकामयते।मासर्वथैव
त्वयाप्राणनीया।तथाचातस्याःसंगमेऽद्भुतमधुररसोऽवस्त्वयामास्वानीयश्रुति
भावःवरतनुरनेनत्वयापित्वविरहःसोढुमशक्यइतिध्वनितं।ज्वरव्याधेएवंभूता

निलक्षणानिभवंति।शीतादिनारोमांचति।वेदनयाशीत्कारंकरोति।विलपतिमो
हात्।यत्किंचित्वदतिकंपयुक्तोभवतिध्यायति।कथंजीवामीतिपित्तादिनाभ्रमति
।ग्लानिमाप्नोति।अचलतयाक्षिणीनिमीलयतिपतति।भूमौलुठति।दाघेन।वातेनो
गच्छतिमूर्छाप्राप्नोति।एवंविधेपिज्वरेमहावैद्यप्रयुक्तसिद्धरसात्जीवेदेव।तथात्वत्सं
गमरसादस्याअपिजीवनंक्रियादीपकोयमलंकारः।शार्दूलविक्रीडितंछंदोपीति
ज्ञेयं॥२९॥स्मरातुरामिति॥ ॥स्मरातुरांदैवतवैद्यहृद्यत्वदंगसंगामृतमात्रसाध्यां
।विमुक्तबाधांकुरुषेनराधामुपेंद्रवज्रादपिदारुणोसि॥३०॥ ॥हेदेवतवैद्यहृद्यवै
द्यौअश्विनीकुमारौताभ्यामपिमनोहरमूर्त्तेमृतयुवतिजीवनरसज्ञेतिवा।अथवा।अ

स्माकमिष्टदेवतारूपमनोज्ञवैद्यपुनःपुनःविरहव्याधेःरक्षणात्उपसमीपेऽस्मि
न्नेवनिकटेवर्त्तमानांराधां।कथंभूतां।स्मरातुरां।कामेनलग्नां।विमुक्तबाधांविगत
पीडांनकुरुषेनकरोषि।इंद्रवज्रादपिदारुणोसिकठिनोसि।अथवा।हेउपेंद्रवज्रेणा
प्यशक्यंकर्मयेनत्वयासाध्यतेअतःस्वरक्षणार्थमिंद्रेणत्वंवृतःतेनवज्रादपिकठिन
इत्यर्थः।नन्वौषधंविचार्यसंपादनीयंकिमेवमुपालभसेऽतआह।त्वदंगसंगःशरी
रसंबंधःसएवामृतंपरमानंदरसरूपजीवनमौषधं।तन्मात्रसाध्यांतदेकप्रतीका
र्यांअथवात्वदंगसंगःआसक्तिःसैवामृतंजीवनंतन्मात्रसाध्यांजीवनंसंपाद्यमाना
मित्यर्थः।त्वदंगसंगःतवांगसुखमितिवा।अंगःसुखंतथासक्तिरिति रत्नकोषः॥उपें

ऽवज्ञानामैतच्छंदोपि॥३०॥ननुयावद्दहमागमिष्येतावच्छीतोपचारैरुपचर्य्यतामित्स
ततआह।कंदर्पेत्यादि॥ ॥कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरंचेतश्चंदनचंद्रम
ःकमलिनीचिंतासुयत्नाम्पति।किंउक्तांतिरसेनशीतलतरंत्वामेकमेवप्रियंध्यायंती
रहसिस्थिताकथमपिक्षीणाक्षणंप्राणिति॥३१॥ ॥अहोआश्चर्यंअस्याश्चेतश्चित्तंचंदन
चंद्रमःकमलिनीचिंतासुमलयजसुधांशुपद्मिनीस्मरणेपिसंताम्पतिग्लानिंप्राप्नो।
तितत्रापिचिरं।किंभूतायाः।कंदर्पज्वरेणयःसंज्वरःसंतापःतेनातुरतनोर्व्यथितदेह
यााःविरोधोयमलंकारःनन्वेतादृशसंतापेनकथंजीवतीतित्रान्यदप्याश्चर्यमाह।कि
त्वितिरहस्येकांतेस्थितात्वामेवप्रियंएकमेवाद्वितीयंअन्यन्तिरपेक्षमित्यर्थः।प्रियंत्रा ११७

त्मवक्त्रंनं।अतएवक्षांतिरसेनशीतलतरं।अननुभूतस्नेहतापेनातिशयेनशीतलं।
तथाभूतमपित्वामेव।एकमेव।प्रियंअनन्यवक्त्रमितिवा।ध्यायंतीकथमपिमद्
ताकष्टेनक्षीणाऽशक्ताक्षणंप्राणितिक्षणमात्रंजीवतिअस्मिन्पेवक्षणेत्वयातत्रग
पेगंतव्यमितिभावः।पुनःतस्याःदर्शनमपितेऽर्लभमितित्वरयति।अथवाक्षणं
प्रतिक्षणंध्यायतीतियोज्यं।यस्यचिंतनेनजीवतितद्दर्शनेननिरुजाभविष्यती
तिकिंवाच्यं।शीतलात्राम्यतिजीवतिचेति।आश्चर्यदर्शितं।क्षांतिवशेनशीतलतनु
मितिपाठेक्षांतिवशेनश्रमाधिक्येन।इनहेप्रभो।क्षांतिवशेतिवा।इनःसूर्येनृपेपत्य
वितिविश्वः।शीतलाकामज्वरजनितसंतापहरातनुर्यस्यातमिति।ज्वरेविरुद्धशीतला

दपिजीवतीतिअत्याश्चर्यं।शार्दूलविक्रीडितंछंदः।३१।पुनरपिउद्दीपनविभावेनवि
रहोद्रेकमाह।क्षणमपीति॥ ॥क्षणमपिविरुद्धःपुरानसेहेनयननिमीलनखिन्नया
ययाते।श्वसितिकथमसौरसालशाखांचिरविरहेणविलोक्यपुष्पिताग्रां॥३२॥ ॥य
याश्रीराधायातवसंगमेपितेविरहक्षणमपिनसेहेनसोढः।कथंभूताया।नयनयो
र्यन्नीमीलनंनिमेषस्तेनखिन्नया।खेदयुक्तया।किमितिधात्राचक्षुषोनिर्मेषःसृष्टोय
तःप्रियतमावलोकेप्रत्यूहोभवतीति।तदुक्तंच।जडउदीक्षतांपक्ष्मकृद्दृशामिति।सासौ
चिरविरहेणरसालस्यआम्रस्यशाखांपुष्पितोऽग्रभागोयस्याःतांदृष्ट्वावसंतेकथंश्वसि
तिकेनप्रकारेणजीवेत्।दुःखवलितानिनिःश्वसितानिवहतीतिवा।छंदापिपुष्पिताग्रा

नामकमिदं॥३२॥वृष्टिव्याकुलगोकुलावनरसादुद्धृत्यगोवर्द्धनंबिभ्रद्वल्लववल्लभाभि
रधिकानंदाच्चिरंचुंबितः।दर्पेणैवतदर्पिताधरतटीसिंदूरमुद्रांकितोबाहुर्गोपतनोस्त
नोतुभवतःश्रेयांसिकंसद्विषः।३३।कंसद्विषःश्रीकृष्णस्यबाहुर्भवतःशुश्रूषोःश्रेयां
सिकल्याणानितनोतुविस्तारयतु।अन्योपिहस्तेनैवदिक्षितंप्रयच्छतीतिबाहोःकर्तृत्वं
।सामर्थ्यसूचनार्थमत्रकंसद्विष्पदोपादानं।कथंभूतस्यगोपतनोःपरमोदारश्रीगोप
राजकुलोत्पन्नस्यदातृत्वंदर्शयति।उद्धृत्यगोवर्द्धनंगिरिबिभ्रत्कुतः।दृष्ट्वाव्याकुलं
यद्गोकुलंतस्ययदवनंपालनंतत्ररसोरागोवीर्यंवातस्मात्।कथंभूतोबाहुवल्लववल्ल
भाभिःतत्प्रियाभिःअधिकानंदात्चिरंचुंबितः।पुनःकीदृशः।दर्पेणसौभाग्यमदेनता

न्निश्चुंबनार्थमर्पितायाधरतटीतयासिंहरमुद्रयांकितः।विक्रितः।अद्यरतद्यः एवसिं
हरवद्भक्तास्तानिरितिवाशार्दूलविक्रीडितंवृत्तं॥३३॥ ॥इतिश्रीगीतगोविंदेस्निग्धम
धुसूदनोनामचतुर्थःसर्गः॥ ॥४॥ ॥श्रीराधाभावश्रवणेनस्नेहवानित्यर्थः॥ ॥पूर्व
सर्गेश्रीराधायाःप्रेमचेष्टितंनिरूप्येदानींपंचमेसर्गेश्रीकृष्णचेष्टितंवर्णयति।तत्रप्रि
यायाःविरहचरितंश्रुत्वातामनिस्तत्संकेतनिकुंजेस्थितःसनसापराधतयाशाक
मानहृदयःस्वयमगच्छन्विरहदुःखनिवेदनेनश्रनुनीयानयनायतामेवसखींप्रहि
तवान्।अहमिहेत्यादि॥ ॥अहमिहनिवसामियाहिराधामनुनयमदचनेनचानयेथा
ःइतिमधुरिपुणासखीनियुक्तास्वयमिदमेत्यपुनर्जगादराधां॥३४॥ ॥मधुरिपुणाइ ११७

तिएवंप्रकारेणास्वयंनियुक्ताश्राज्ञप्तासखीएत्यराधांइदंवक्ष्यमाणंजगादः।उवाच।
स्वयंमधुरिपुणेति।श्रात्तिनरःकथितः।इतिकिंत्वंराधांयाहिगच्छमदचनेनतांश्रनु
नयनयुक्तामानवतीस्वयमेवगत्वाऽनुनीयतांकृतापराधेनमयासाकाद्रष्टुंनशक्य
तेऽतोत्वंश्रनुनयेतिभावः।चानयेथाःमच्चमीपमानयननुकदाचिद्यास्यतिचपलस्त्व
मलभ्यसेचेन्नत्रसदैन्यमाह।श्रहंतदेकनिष्ठःदैवतंबकुलंप्रतीक्षमाणस्तिष्ठामि
।३४॥यश्चसखीजगादस्तदेवगीतेनकथयति।वहतीत्यादि॥ ॥वहतिमलयसमीरेमद
नमुपनिधायस्फुटतिकुसुमनिकरेविरहिहृदयदलनाय॥१॥नवविरहेवनमा
लीसीदति॥ध्रुवपदं॥ ॥गीतस्यास्यविराडीरागःरूपकतालः।रागलक्षणंतु।विनोद

यंतीदयितसुकेशीसुकंकणाचामरचालनेन।कर्णेदधानासुरपुष्पगुंछंवरांगनेयं
कथिताविराडीति।उद्दीनविभावैःविरहोद्रेकमाह।हेसखीवनमालीकृष्णस्तवविरहे
त्वयोगेसीदति।अवसन्नोभवतिसुरतोत्सवेबहुयाञ्च्याभिःप्राप्तातदंगसंसर्गिणींमा
लांधारयन्त्वयिप्रणवेःसीदत्यतोत्वमभिसरेतिवनमालीपदोपादानं।अथवा॥त्य
क्तान्यसंगस्तवसंकेतमनोरमनिकुंजेवनमालीद्वितीयःप्रवर्त्तते।ऽतोवश्येगंतव्य
मितिभावः।ध्रुवपदं॥क्वसति।मलयसमीरेमलयाचलसंबंधिवातेवहतिसति।किं
कृत्वामदनंकामंउपनिधाय।समीपवर्त्तिनंकृत्वा।पुनःक्वसतिकुसुमनिकरेपुष्प
समूहेविरहिणांहृदयदलनायमर्मपीडनायस्फुटतिविकसतिसति।मदयतीतिम

दनःअन्यान्मदयतिस्वयंचमत्तःसंधितपुष्पबाणःतदनुवर्त्तिवायोःतत्प्रहितबाणा
नांचपरमर्मविदारणत्वमुचितमेव।अथवामदनस्यस्पृहांउपसाद्यसमीरेवहति।
सति।कुसुमसमूहेस्फुटतिसतिसीदतीति॥दहतीति॥ ॥दहतिशिशिरमयूषेमरण
मनुकरोति।पततिमदनविशिषेविलपतिविकलतरोति॥२॥शिशिरमयूषेहिमक
रेदहतिसति।संतापजनयतिसति।मरणमनुकरोमिदशम्यवस्थाजनितपीडाम
नुभवति।त्वन्मुखानुभवेतितिरस्कृत्यश्चंद्रःसमस्तजनसंतापहरोपित्वद्विश्लेषेलब्धा
वसरःदहतीतिभावः।अनुकरोतीत्यनेनानिष्टंवारितं।दशम्यवस्थासदृशीपीडामनु
भवतीति।त्वत्प्राप्त्याशयाकष्टेनजीवनधारयतीत्यर्थः।अथचमदनविशिषेपततिस

तिकामबाणोपतनमाचरयतिसतिविह्वलतरोऽतिविलपत्यतिशयेनविलापंकरो
ति।क्वप्रियेक्वासिरक्षरक्षेति॥२॥ध्वनतीति॥ ॥ध्वनतिमधुपसमूहेश्रवणमपिदधाति
।मनसिवलितविरहेनिशिनिशिरुजमुपयाति॥३॥ ॥किंच।मधुपसमूहेमधुंपिबती
तिमधुपाभ्रमरास्तेषांसंघेध्वनतिगुंजतिसति।श्रवणंकर्णौअपिदधाति।हस्ताभ्यामा
च्छादयति।एतेपिकामानुगाःमधुपानेनमत्ताःकामजयघोषमुद्घोषयंत्यतस्त्रस्तःक
र्णमुद्रणंकरोति।त्वदेकनिष्ठयात्वत्प्राप्त्यर्थमखिलशब्दादिविषयत्यागेनत्वामेवाह
र्निशंकामयतइतिभावः।महामधुरमोहनंतेवचसामृतंनिपीयकेनान्यशब्दःश्रुतिगो
चरःक्रियतइतिवा।ननुदिवादृष्टश्रुतेनोद्विग्नःत्यक्तेंद्रियविषयःहृदिरात्रौसुखीस्या

त्तत्राह।तद्विरहयुक्तेमनसिरात्रौअधिकपीडामुपयाति।प्राप्नोति।निशिविरहव्याधे
रुद्रेकात्निशिनिशीतितद्वृद्ध्यभिप्रायेणक्षणस्यापियुगायमानत्वात्॥३॥वसतीति
॥ ॥वसतिविपिनवितानेत्यजतिललितधाम।लुठतिधरणिशयनेबहुविलपति
तवनाम॥४॥ननुबहुभिरपेक्षितोसौतैःकथंनसुखीक्षयतेऽत्राह।ललितमनोहरं
धामपितुःश्रीव्रजराजस्यव्रजरूपंस्थानंगृहंवा।त्यजतिजहाति।विपिनवितानेवनवि
स्तारेवसतिसंतिष्ठते।सकलपरिजनत्यागेनयोगीवकांतारेनिगूढंवसतस्तैःकुतः
सुखमितिभावः।अथवाधामशरीरंअखिललावण्यास्पदंश्रीविग्रहमपित्वांविना
नाशास्तइत्यर्थः।धामदेहेगृहेरश्मौस्थानेजन्मप्रभावयोरितिविश्वप्रकाशः।धामश

ष्टार्थान्सर्वान्पित्यजतीतिध्वनितः।ननुकिंप्रमाणंमय्येवैतावतीप्रीतिः।तदनुभावे
नदर्शयति।सतववल्लभःधरणिशयेनेभूशय्यायालुठति।त्वच्चरणारविंदमकरं
दसंसिक्तश्रीवृंदारण्यभूमौलुठनंकरोति।अपिचतवनामहेप्राणेश्वरिहप्रियेराधे
इत्येवंबहुवारंवारंविलपतिविशेषेणलपति।अन्यत्साधनंसाध्यंत्यक्त्वात्वदेकनिष्ठ
ःत्वयानंदनीयइतिभावः॥४॥भणतीति॥ ॥भणतिकविजयदेवेविरहिविलसि
तेन।मनसिरभसविभवेहरिरुदयतुसुकृतेन॥५॥ ॥कविजयदेवेभणतिकथति
सति।विरहिविलसितेनवियोगविलासेनहरिरुदयतु।आविर्भवतु।अर्थाज्जायतां
शृण्वतांमनसि।रभसःप्रेमोत्साहस्तस्यविभवःप्राचुर्यंयत्रतादृशे।केन।सुकृतेन।सु

ष्टुभगवदाराधनरूपाचरणंसुकृतंतेनअथवा।शोभनंयज्जयदेवकृतंगीतंतेन।५
परमप्रेष्ठदुःखश्रवणासहिष्णुतयाकुलचित्तांश्रीराधांदृष्ट्वासखीस्थकितवाग्बभूवेति
पंचपदीयंदशमी॥१०॥पूर्वंयदुक्तंत्वदेकनिष्ठस्त्वामेववांछतितदेवश्लोकेनदर्शय
ति।पूर्वमिति॥ ॥पूर्वंयत्रसमंत्वयारतिपतेरासादिताःसिद्धयस्तस्मिन्नेवनिकुंजम
न्मथमहातीर्थेवसन्माधवः।ध्यायंस्त्वामनिशंजपन्नपितवैवालापमंत्रावलीभू
यस्त्वत्कुचकुंभनिर्भरपरीरंभामृतंवांछति॥३५॥ ॥हेसखिमाधवःकृष्णोभूयःपु
नःत्वदीयौकुंभाविवकुचौतयोर्निर्भरंगाढंयःपरिरंभःआलिंगनंतदेवामृतवत्स्वा
दुजीवनसंपादकंचपरमानंदसंदोहलक्षणंतद्वांछति।अनेनामृतरसपूर्णावमृत

मयस्वर्णकलशावितिध्वनितं।माधवपदेनपूर्वोक्तिगुणविशिष्टोपित्वयावशीकृतःसनत्वा
मेवंभजतइतितस्याःसौभाग्याधिक्यंसूचयंत्यभिसारयितुंत्वरयति।ननुमयाकथंवशी
कृतः।कथंचेष्टदेवताराधनव्यतिरेकेणपरमानंदंकामयतेऽतआह।त्वामेवेष्टदेवताम
निशंनिरंतरंध्यायन्अपिचतवालापाएवमहामाधुर्यवर्षिणोरहसिसंभाषणानित
एवमंत्राःहृदिमनुरिवावर्त्तनत्वाततेषामालींवश्रेणींजपन्।ननुजपादिकंइष्टदेव
तासंबंधितीर्थकृतंझटितिसिध्यतीत्यतआह।निकुंजमन्मथमहातीर्थे।मनोमथ्ना
तीतिमन्मथःतद्रूपोनिकुंजेःलतापिहितोदरःमन्मथःविलासःसाध्यतेयत्रेतिवा॥
तन्महातीर्थंझटितिसिद्धिकरंतस्मिन्वसन्सन्।महत्वंदर्शयति।पूर्वंपुरायत्रयस्मि

न्तीर्थेत्वयाप्राणकोटिवल्लभतयासहरतिपतेःकामस्यसिद्धयःआसादिताःप्राप्ता
ः।अत्रावलीपदोपादानान्मालामंत्रत्वमस्यप्रतिपादितंतेनसिद्धत्वात्तत्कालफलप्र
दानसामर्थ्यंचनिकुंजेत्यनेनापि।तदुक्तं।स्वप्नप्राप्तेस्त्रियादत्तेमालामंत्रेतथैवच।।वै
दिकेषुचसर्वेषुसिद्धादीन्नैवशोधयेत्।गृहगोष्टवनारामनदीनगसुरालये।समीपेवा
गुरोःसिद्धिःशीघ्रंस्यादुत्तरोत्तरेति।एवशब्देननिष्ठादर्शितावसन्नितियावत्सिद्धिस्ता
वत्स्थैर्यंच।एवंसद्देवतांध्यायन्सिद्धक्षेत्रेसिद्धसंत्रान्जपन्अनन्यःस्थिरःआशुसि
द्धिंप्राप्नोतीतिध्वनितं।इदंतुरसोद्बोधकंवर्णनचातुर्यंतयोस्तुसख्यशृंगारएवेरसः।३
५॥एवंस्वविषयकानुरागंश्रुत्वाप्रसन्नातामभिसारयतुमुद्दीपन्विभावंदर्शयं।

तीकृत्यस्यानिसारमाह।रतिसुखेत्यादि॥ ॥रतिसुखसारेगतमविसारेमदनमनोहर
वेशेानकुरुनितंबिनिगमनविलंबनमनुसरतंहृदयेशं॥१॥धीरसमीरेयमुनातीर
वेसतिवनेवनमाली॥ध्रुवपदं॥गीतस्यास्यगुर्ज्जरीरागःएकतालीतालश्चागीतार्थ
स्तु।हेनितंबिनिप्रशस्तनितंबवति।हृदयेशंप्राणकोटिप्रियंअनुसरानुगच्छ।यथाश्री
कृष्णेनत्वांविनाक्षणमपिस्थातुंनशक्यते।तथात्वमपितेनवशीकृतचित्तासि।हृदयेश
मित्यनेनध्वनितं।तवहृदयमीशोयस्येतिवा।तंतवहृदयानुवर्त्तिनमित्यर्थः।किंच॥ह
रन्नितंबवत्वान्मंदगामिन्यास्तेविलंबनमाकार्य्यमितिनितंबिनीतिसंबोधनं।अतोग
मनविलंबनंअनिसारायकालातिक्रमंनकुरुमाक्षथाः।कीदृशंतं।अनिसारेगतंअ १२४

निस्त्रियतेस्मिन्नितिअनिसारःसंकेतस्थानंतत्रगतंप्राप्तं।कीदृशेऽनिसारे।रतिसंभो
गसुखंसारमुत्कृष्टंयत्रतादृशे।अथवा।संभोगसुखायसारेयूनोःसुरतसंपत्तिसंपादने
।नसर्वस्वरूपेत्यर्थः।कथंभूतंतं।मदनःजगन्मोहनःकामःतस्यापिमनश्चित्तंहरतीति
तथाभूतोवेषोऽनिसारोचितमंडनप्रक्रियायस्यतं।किंवक्तव्यमंगसौष्ठवमितिभावः
अथवा।मदनंकामकदनंमंडनश्चहरतीतितथातं।अथवा।मदनंब्रजांगनानांगंमनो
हरवेषंशाकटनंजननमूर्त्तिं।अनेनवीर्यवानित्तिनायकगुणःउक्तः।मदनादपिमनोहा
रीवेषोयस्येतिवा।व्रजांगनानामंगत्वेनमहाचित्ताकर्षकत्वाच्छीघ्रमभिसरणीयमि
तिभावः॥१॥संकेतस्थलंदर्शयतियमुनायास्तीरेवनेगहनेवनमालीशतवनमालादि

वेषः वसति। अशेषाभिसारिकाः वंचयित्वा वनमाला द्वितीयः त्वत्प्राप्तिनिमित्तमात्मा
नं संगोप्य गहने तिष्ठतीत्यर्थः। वनमालीत्यनेनालिंगनौत्सुक्यं ध्वनितं। कीदृशे। धीरो मं
दः समीरो वायुर्यत्र तादृशे। यमुनातीरे वने इत्यनेन शैत्यं सौगंध्यं च कथितं। त्रैगुण्यवा
युना सविते इत्यर्थः। धीरः चतुरो वा भवतां सेवनाय स्वगुणैः सावधान इति। धीरः पंडि
तमंदयोरिति॥ ध्रुवपदं॥ ननु कथं मदर्थमेवाभिसारे तिष्ठति। मम्यनुरक्तश्चेत्यत आ
ह। नामसमेतमित्यादिना॥ ॥नामसमेतं कृतसंकेतं वादयते मृदुवेणुं। बहुमनुते त
नुते तनुसंगतपवनचलितमपि रेणुं॥२॥ ॥संप्रति तव वल्लभो मृदुन्या अमाजानान्वे
वं। त्वन्नामकीर्त्तनेनार्द्रचित्तया पूर्यमाणत्वाद्वा कोमलं यथा स्यात्तथा वंशं ध्वनयति॥ त

वानुरागानुभावोयं अभिसारसंकेतं दर्शयति। हे राधे प्राणेश्वरीति त्वन्नामसहितं
यथा स्यादेवं कृतः संकेतः संगोपनार्थसंज्ञा गीतादिना यत्र तादृशं। मया सह कृतः संके
तो यत्रेति वा। तादृशं तवाभिसारायानुनयपूर्वकं वादयत इति। अथवा नामसमेतमि
त्यादिना तव सौभाग्यख्यापनायैवं सा मम प्राणकोटिवल्लभा तदर्थमेवाभिसारेति
ष्ठामीति। अन्या माया तु साधमादन्यत्र माया त्विति वादयते। किंच। तन्विति संबोधने। तेत
नुसंगतस्त्वदंगसंबंधी यः स्वल्पमपि संबंधी यथा कथंचिद्वस्त्रादिसंसर्गवान् पवनो वा
पुस्तेन स्वभावादेव चलितं तनुतव प्रेरणात्तत्रापि तवाटव्या रेणुमपि बहुमनुते॥ य
दृच्छया प्राप्तमधिकं यथा स्यादेवमाद्रियते। धन्योहं तत्संसर्गिमरुतास्पृष्टेन रजसा यत्स्पृ

श्यते। मादृशोजन इति यद्येवं तदा किं वक्तव्यं। त्वदंगसंगमरसः। तन्विति पाठे। हे तनु
हे तन्वि तनुशब्दस्य संबोधने ह्रस्वः। अथवा पूर्वं बहुमनुते। ततश्च तनुते। तानप्रतापमु
द्रयाशीतः परमानंदप्रदश्चायं रेणुः इति गायति। अतनु। अनल्पं यथा भवेदेवमिति
क्रियाविशेषणं वा। २। किंच। तस्य सर्वेंद्रियाणां मनसश्च वृत्तिस्त्वय्यर्पितास्ते। पतती
ति॥ ॥पतति पतत्रे विचलति पत्रे शंकितभवदुपयानं। रचयति शयनं सचकितन
यनं पश्यति तव पंथानं॥३॥ समोहनः परमकोमलपल्लवैः पुष्पदलैश्च परमसुकुमा
राभ्यां स्वकरपल्लवाभ्यां त्वदर्थं शयनं कंदर्पलीलोचितां शय्यां विविधविचित्रसौगं
ध्यसंसिक्तोपधानादिभिः रचयति निर्माति। रत्यावेगेनार्त्या सचकितनयनं चंचलावलो

कसहितं यथा स्यादेवं तव पंथानं त्वदागमनवर्त्म पश्यति। एतेन चक्षुरादींद्रियाणां त
त्परत्वं कथितं। तदेवाभिनयेन दर्शयति। कथंभूतं पंथानं। शंकितभवदुपयानं। भवत्या
उपयानं समीपे गमनं यत्र। तादृशं सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति भवतीशब्दस्य पुंस्त्वं
कसति। पतत्रे पक्षिणि पतति वृक्षात् वृक्षांतरं गच्छति सति। पुनः कसति। पत्रे वृक्षपत्रे
विचलति सति। अनेन मनसस्तादात्म्यं दर्शितं॥३॥ यथा श्रीकृष्णोभिसृतस्तथा त्वम
प्यभिसारोचितव्यापारवती भवेत्याह॥ ॥मुखरमधीरं त्यज मंजीरं रिपुमिव केलिषु
लोलं। चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलं॥४॥ ॥हे सखि कुंजं चल गच्छ॥
नीलनिचोलं प्रच्छदपटं शीलय परिधेहि। सतिमिरपुंजं यथा स्यात्तथेति क्रियाविशेष

णं।उद्योतेहिअभिसारप्रतिबंधःस्यादिति।अथवा।कीदृशंकुंजं।तिमिरपुंजेनांधका
रंसमूहेनसहितं।तिमिरकुंजनीलनिचोलैरभिसारानुकूलरसपोषकसामग्रीकथि
ता।गौरांग्यात्वयानीलवस्त्रादिभिःशोभाविशेषतयामोहनत्वापिमोहनंभविष्यती
त्यपिध्वनितं।प्रतिकूलंवारयति।मंजीरंनूपुरंत्यज।किंलक्षणं।अधीरंअज्ञं।अमंदं
वाप्रगल्भमित्यर्थः।अतएवाभिसारेमुखंरंवाचालंसमयोचितंनजानातितथाभू
तं।नकेवलमेवंकिंतुकेलिषुलोलंचंचलं।केलिसुलोलमितिपाठे।केलौक्रीडाया
मतिचंचलमित्यर्थः।कमिवरिपुमिव।संभोगक्रीडासुनर्मगोष्ठीसुधास्वादप्रतिबं
धकत्वात्रिपुमिवत्याज्यमितिभावः।केचित्तुशृंगारोपयोगित्वान्मूकमंडनधारणे

तात्पर्यमिति॥४॥ननुमंडनत्यागेनशोभाहानिःस्यादिति।परस्परमिलितैर्भूषणभू
षणांगैरेवपरमशोभाभविष्यतीत्यत्फलंगंजनयंत्याह॥उरसीति॥ ॥उरसिमुरा
रेरुपहितराहेघनइवतरलबलाके।तडिदिवपीतेरतिविपरीतेराजसिसुकृतविपा
के॥५॥ ॥हेपीतेनवपुरटगौरांगि।मुरारेःमुरयतिवेष्टयतिस्व।भुजाभ्यांगाढालिंग
नतृष्णयेतिमुखेष्टने।ऊणादिकआरिप्रत्ययमुरारिःश्रीकृष्णस्तस्यउरसिवक्षसिरा
जसिराजिष्यसीत्यर्थः।वर्त्तमानसामीप्येवर्त्तमानवद्वेतिलृट्योगेलट्।कदारतिविप
रीते।पुरुषायितसुरतसमये।किंविशिष्टेउरसि।उपहितहारे।पुंभावमापन्नयात्व
यात्वदालिंगनव्यवधानकृद्भूषणरहितेस्वकीयकंठस्थितः।आलिंगनचातुर्येणैव

शोभनाविशेषदर्शनायउपहितोऽर्पितोहारोमुक्ताहारोयस्मिन्नतादृशोतत्रोत्प्रेक्षतेकी
दृशइव।घनइवतरलबलाकैःतरलाश्चंचलाबलाकापंक्तिर्यत्रतादृशी।घनइवमेघइ
वपुंनावचरितेनहारस्यापिचांचल्यंद्योतनंकेवातडिदिवविचित्रविविधचमत्का
रवतीविद्युदिवादृष्टांतेनानेनसौरतकौशलंद्योतनंअस्यनूतोपमाचेयंकथितेति॥
विविधमंडितसजलमेघोपरिचंचलाबकपंक्तिस्तडुपरिबद्धकांचलस्थैर्यवतीविविध
विचित्रचमत्कारवतीचविद्युद्यदिस्यात्तदाएवंभवति।तदनावात्।तत्रान्यदपिश्लो
भनीयंविशेषणमाहाकीदृशोऽरसिःसुकृतविपाकेःसुकृतस्यशोभनाचरितस्यविपा
कोयस्मिन्नइतिवा।तरलबलाकइत्यादिपदान्यपितद्विशेषणानीतिवा।तरलाश्चंच १२७

लाबलाकाकामुकीसंभोगरसाक्रांतावरस्त्रीयत्रतादृशोपुनःकीदृशोपीतेगिरिधा
तुनिःकुंकुमादिनामंडितत्वात्।तत्कांत्याक्रांतत्वाद्वारतिविपरीतेस्त्रियाःपुरुषायितं
यत्रतादृशोसुकृतविपाकेतस्यसुकृतस्यविपाकेश्रीराधायाःतादृशावेष्टितरूपफल
सिद्धिर्यस्मिन्निति।अथवानायिकायाःसंबोधनानि।उपहितहारेइत्यादि।उपहि
तःप्रथमसमागमेश्रीकृष्णेनोपहारीकृतःहारोयस्यास्तादृशि।अनेनदानादिकोपायो
दर्शितःतथाचतवकंठधृतःसुरसितस्मिन्समयेतादृशोशोभनोदोभविष्यतीति
भावः।तरलबलाके।अतपुरुषायितंयस्यास्तादृशीत्यर्थः।अतएवहेरतिविपरीते।
सुकृतविपाकेतस्यसुकृतस्यपरमफलरूपे।तेनाश्लिष्टत्वात्।विपरीतरतेरवचे

तानिविशेषणानिवा।तदाकीदृशेरतिविपरीते।सुकृतविपाके।उभयोःपुण्येपरिपाक
रूपेातत्रहेतुः।तरलबलाकोश्चतएवोपहितहारेइति।बलाकाबकपंक्तौस्याबलाकाबि
ञ्चकंटिका।बलाकाकामुकीप्रोक्ताबलाकश्चबकोमतः।इतिशाश्वतःविपाकःकीर्त्यते
स्वादोपरिणामेचदुर्गतौइतिविश्वः॥५॥पुरुषायितंनिरूप्येदानींनायककर्तृत्वंसूच
यति॥विगलितेत्यादि॥ ॥विगलितवसनंपरिहृतरसनंघटयजघनमधिसनं॥किं
शलयशयनेपंकजनयनेनिधिमिवंहर्षनिधानं॥६॥ ॥हेपद्मनयनेश्रीहल्लरचित
नवपल्लवशय्यायांजघनमारोपयाकीदृशंजघनं।विगलितवसनं।विशेषेणगलि
तंस्खलितंस्वयमेवकंदर्पकोटिरमणीयकांतस्यसंगमेपरमरसज्ञायाःशृंगाररस १२९

विक्रमेणावस्वंयस्मात्तं।अतोश्रपिधानंपिधानमावरणंतद्रहितं।पुनःकीदृशंपरि
हृतरसनं।पंकजरूपेणनयनेनमन्मथशरमथितचित्तेनप्रेष्ठेनहरीकृताह्युत्रघंटि
कायस्मात्तादृशं।तेनैववाविगलितवसनंमितिच।पुनःकीदृशं।हर्षनिधानंपरमा
नंदस्याव्यभिचारिगृहंकमिवनिधिमिव।नारायणशिरोमणेरभीष्टधनमिवाश्रथवा
।विपरीतरतमेववर्त्मयति।तदाहेसखिकिशलयशय्यायांपंकजनयनेश्रीहल्लप
रिहृतरसनादिलक्षणंस्वजघनंतस्मिन्योजयेत्यन्वयः।तादृशपवसरेज्ञाप्यमाना
यारसनायाश्चनुपयोगत्वात्विगलितवसनमित्यपियुक्तमेवाश्चन्यसमानं॥६॥
विलंबमानांदृष्ट्वानेदरूपमुपायांदर्शयति॥हरिरितिः॥ ॥हरिरभिमानीरसनिरिदा

नीमियमपियातिविरामं।कुरुममवचनंसत्वररचनंपूरयमधुरिपुकामं॥७॥ ॥हरि
ःसुंदरवरःअभिमानीअभितःसर्वतोभावेनत्वांप्रियांमानयतीत्यभिमानी।त्वय्यतिश
येनप्रेम्णाभिमानवानितिवा।अयमर्थः।यथात्वंअस्यातुलितवल्लभाहमितिमान
वतीतथासोपीयंममातिवल्लभाममाभिलखितंपूरयिष्यतीत्यभिमानवानिति॥
अतोमधुरिपुःमधुर्वसंतःक्षोभकत्वेनरिपुर्यस्यतादृशस्यकामंत्वद्रमणरूपाभिला
षंपूरयपरिपूर्णतांप्रापय।रिपुणाक्रांतःप्रियःसहायेना।नंदितस्त्वयावशीकृतो
भविष्यतीतिभावः।मधुव्रतइवमधुररसास्वादातुरस्यमधुरिपोरितिवा।अपिच।
इयंरजनिःरात्रिरपिइदानींसंप्रतिविरामंयाति।अवसानंगच्छति।ममवचनंमद्वा

क्यंकुरुकीदृशंसत्वररचनंत्वरासहितंगमनंरचयतीतितादृशं।सत्वररचनंयथा
स्यादेवं।चलसखिकुंजमित्यादिलक्षणंमदुक्तंकुर्वितिवा।एवंभूतप्रेष्ठाभिलाषापू
र्णेरजन्यवसानेचयदितवदुराग्रहेणऊर्दास्यमाचरेत्तदाहैतुकविरहदुःखज्वाला
लेपतनंभविष्यतीतिभेदोदर्शितः।केचिच्चाभिमानीदर्प्पवानितिराधायामनुकूलत्वा
द्धृष्टनायकत्वेनरसभंगस्यादितिनयुज्यते।कचिच्चहरिरभिमानीतिपाठस्तदानायि
काकर्तृसुरतनिपुणेनकिंमायेवंतस्यनैरपेक्ष्येणैवकर्त्तव्यमतआह।कामकदनं।
हरतीतिहरिः।रतिसंभोगस्तंबहुमानयतीत्यर्थः।रजनिश्चविरामंविशेषेणराममभि
रमणंयातिप्राप्नोति।एवंरसपोषकसामग्रीसमुदायेसपन्नेइदानीमेवमधुरिपोः

संभोगेच्छां पूर्णां कुर्विति भावः॥७॥ श्रीजयदेव इति॥ ॥श्रीजयदेवे कृतहरिसेवे भ
णति परमरमणीयं। प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयं॥८॥ ॥
हे वैष्णवा उक्तलक्षणं हरिं नमत। प्रणमत। एवंभूतचरितानुशीलनेन भजत इत्य
र्थः। कीदृशं। प्रमुदितमानंदयुक्तं हृदयं यस्य तादृशं प्रियासंगमौत्सुक्येनेति भावः
तत्रापि अतिदयासहितं। भक्तप्रियत्वात्। अथवा। ऽतिहरिं सर्वोत्तमं। सर्वोत्तमानायि
काप्रसंगेन परिपूर्णगुणप्रकटना। दतिशयेन सर्वेषां मनोहरणात्। सदयं सतां शुभा
वहो विधिर्यस्मात्तमिति स्वानुभूतं वर्णितं यथा लोके प्रसिद्धिरनया ष्टपद्या हरिः ज
यदेवस्य गृहे प्रकटी बभूवेति। क्व सति। श्रीजयदेवे परमरमणीयं परमः परमानंद

रूपत्वात्। रमणीयः रसवलितत्वात् परमश्चासौ रमणीयश्च परमरमणीयस्तं। श्री
राधामोहनयोश्चरितात्। भणति सति। कीदृशे जयदेवे कृतहरिसेवे। कृता उक्तलक्ष
णा हरेः सेवा येन तादृशे। कीदृशं। सुकृतकमनीयं। सुकृतैः शोभनचरितैः कमनीयं
कांक्षनीयं। कोटिसुकृतैः काम्यते तस्य दययैव महत्प्रसंगेन प्राप्यत इत्यर्थः। हरेरेव
विशेषणं वा परमरमणीयमिति सुकृतकमनीयं च सुकृतैः शोभनैश्चरितैः कमनीयं
सुंदरमित्यर्थः। अभिसारिका चात्र नायिका। तल्लक्षणं। मदनानलसंतप्ता याभिसार
यति प्रियं। ज्योत्स्नी तमस्विनी यानयोग्यांबरविभूषणा। स्वयं वाभिसरेद्या तु सा भवेद
भिसारिकेति॥८॥११॥ पुनरप्यभिसारगतस्यास्य चेष्टितं निरूपयति॥ विकिरतीति॥

विकिरतिमुञ्चःश्वासानाशाःपुरोमुञ्चरीक्षतेप्रविशतिमुञ्चःकुंजंगुंजन्मुञ्चर्बकुता
म्पति।रचयतिमुञ्चःशय्यांपर्य्यङ्किलंमुञ्चरीक्षतेमदनकदनक्रांतःकांतेप्रियस्तवव
र्त्तते॥इदा।हेकांतेस्वकांत्यावशीकृतवल्लभेतवप्रियःमदनस्यकामस्यत्वद्वियोगेन
कदनंपीडनंतेनम्लानोवर्त्तते।तथाविधंसनकिंकरोतीत्यतत्राह।मुञ्चःवारंवारंत्व
दागमनचिंतयाश्वासान्संतापनिश्वसितातिविकिरतिक्षिपति।पुरोऽग्रेमुञ्चःदिशा
र्ईक्षतेविलोकयतित्रस्ताकुलतयो।कस्यादिशाःकदावागमिष्यतीतियुगपत्सर्वाःदि
शाःपश्यतीत्यर्थः।ततत्रापश्यन्मुञ्चःसंकेतनिकुंजंप्रविशति।केनापिमार्गेणाकुंजप्रवि
ष्टान्नविष्यतीतिमार्गंनिरीक्ष्यनिकुंजेविशतीत्यकुंवातिशयंनिरूपितमितिनावःकी

दृशंकुंजं।गुंजत्त्रमरैःशब्दंकुर्वत्।अतोबकुत्रधिकंयथास्यात्तथाताम्यतिग्लानो।
भवति।एवंभूतोपित्वदनुरागेणमुञ्चःवारंवारंकेनाप्यद्भुतप्रक्रियाविशेषेणशय्या
रचनंकरोतीति।तत्रापिपरितःआकुलंयथास्यादेवंमुञ्चरीक्षते।कचिच्चविकिरतिमु
ञ्चःश्वासान्नासापुरोमुञ्चरीक्षतेप्रविशतिमुञ्चःकुंजंकूजन्मुञ्चर्बताम्यतीतिपाठस्त
दानासापुरोमुञ्चरीक्षतेत्वांध्यायति।कूजन्मुञ्चःहाप्रियेहाप्राणेश्वरीमुञ्चसर्त्तिनादं
कुर्वन्बकुताम्यतीत्यर्थः।हरिणीछंदः दीपकोयमलंकारश्च॥इदा।इदानींसांप्रतमेव
गंतुंसांप्रतमितिहेतुमाह।त्वदाम्नेनेति॥ ॥त्वदाम्नेनसमंसमयमधुनातिग्मांशुरस्तं
गतोगोविंदस्यमनोरथेनचसमंप्राप्तंतमःसांप्रतं।कोकानांकरुणास्वनेनसदृशीदी

र्घामदभ्यर्थनातन्मुग्धेविपलंविलंबनमसौरम्योभिसारःक्षणः॥३७॥ ॥हेमुग्धेस्वसौं
दर्येणवशीकृतवल्लभेसुंदरि।स्वकार्यसाधनाज्ञानान्मूढेवा।मुग्धइतिसंबुद्धिःतस्मा।
द्धेतोःविलंबनंकालापनयनंविफलंहस्तगतसौख्यप्रतिबंधकमित्यर्थः।असावभिसा
रक्षणःअभिसारयोग्यःसमयःरम्योऽतिमनोहरः।तद्दर्शयति।त्वद्वाम्येनसमंचक्रत
यासहितंतिग्मांशुःसूर्यःसमग्रंसामस्तेनयथास्यादेवमस्तंगतः।अथवासमग्रमधुना
रंभावसानमाधुर्ययुक्तानुनयवचसातिग्मांशुःतवचित्तकाठिन्यंवियोगापादनेनसं
तापकत्वात्।तमस्तिमिरंगोविंदस्यमनोरथेनसमंवांछयासहितंसांद्रतांनिविडतांप्रा
प्तंगोविंदस्यमनोरथोंधकारश्चनिविडोजातइत्यर्थः।अंधकारस्योद्दीपनविभावात्प्रियाग

मनहेतुत्वाच्चमनोरथस्यनिविडता।मदभ्यर्थनामञ्च्यादीर्घाबहुकालीना।कीदृशी
कोकानांचक्रवाकानाकरुणस्वनेनसदृशीतुल्या।विरहाधिक्येनकृपाविषयत्वप्राप
कस्वरात्।त्वदेकनिष्ठःसोत्कंठःकांतःनिविडांधकारःवक्रताच।गताहमप्यनुकंपनी
येतिविलंबनमयुक्तमितिभावः।सहोक्तिर्नामायमलंकारस्तदुक्तंदंडिना।सहोक्तिःस
हभावस्यकथनंगुणकर्मणोरिति।यथा।सहदीर्घाममश्वासैरिमाःसंप्रतिरात्रयः॥शा
र्दूलविक्रीडितंवृत्तं॥३७॥यदुक्तंरम्योभिसारक्षणस्तदेवांधकारस्यातिनिविडतयावि
विधरसचमत्कारत्वनिरूपणेनप्रलोभयंतीवर्णयति॥आश्लेषादिति॥ ॥आश्लेषाद
नुचुंबनादनुनखोल्लेखादनुस्वांतजप्रोद्बोधादनुसंभ्रमादनुरतारंभादनुप्रीतयोः॥

अन्यार्थंगतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दंपत्योरिहकोनकोनतमसिव्री
डाविमिश्रोरसः।३७।इहतमसिदंपत्योर्यायापत्योः।व्रीडामिविश्रोलज्जासमन्वितः कः
रसः रसराट्मधुराख्यः कः प्रकाशमानोनभवतीतिन।अपितुभवत्येवेत्यर्थः।किंभूतयो
ःदंपत्योः अन्यार्थंसुरंतादितरप्रयोजनमुद्दिश्यगतयोः।भ्रमान्मिलितयोः परिभ्रमणा
त्संगतयोः सांद्रेतमसिपरस्परालापैः जानतोः ज्ञानवतोः अहमस्याः पतिरयंममभ
र्त्तेति।स्वरभंगादिलक्षणैः सात्विकविकारैर्भावावगमाद्वासंभोगाभिप्रायमिति।तयो
श्चेष्टितमाह।आश्लेषादनुचुंबनंतदनुसुभटमन्मथक्षोभनार्थंनखोल्लेखः नखक्षत
स्तदनुपश्चात्तस्यस्वांतजस्यकामस्यप्रोद्बोधः उद्भटत्वं।तदनुसंभ्रमः कामोद्वेगान्नीव्या

दिस्पर्शव्यग्रतातदनुरतारंभः कामशास्त्रप्रणीतबंधादिनासंभोगारंभः तदनुप्रीत
योः समकालमेवलब्धानंदयोः।तदुक्तंभरतेन।आश्लेषचुंबननखक्षतकामबोधशी
घ्रत्वमैथुनमनतसुखप्रबोधं।प्रीतिस्ततोपिरसभावनमेवकार्य्यमेवंनितांतवतुरा
ःसुचिरंरमंते।अथवा।कः कः रसोनभवतीतिन अपितुसर्वएवरसोभवतीत्यर्थः।त
त्रगाढांधकारेभयव्यंजनादाश्लेषः ततोभयस्थायीभावोभयानकः।हठाच्चुंबनेनशो
कमिवानुकुर्वन्करणस्याविर्भावः नखक्षतादिनाउत्साहात्मावीरः एवपूर्वसुखानुभ
वनमितिसंभ्रमाद्विस्मेयसहचरोऽद्भुतः।कामोद्बोधेनहास्यः।रतारंभात्सकलरसच
क्रवर्त्तीरतिसखाशृंगारश्चसमुल्लसति।तथाचोक्तं।हरिर्हासश्चशोकश्चक्रोधोत्साहौ

भयंतथा।जुगुप्साविस्मयशमाःस्थायिभावाःप्रकीर्त्तिताः।तेषुजुगुप्साक्रोधशमाः
शृंगारविरोधान्ननिरूपिताः।उक्तलक्षणानामप्यत्रतत्पोषणत्वेनैवग्रहणंनतुस्वा
तंत्र्यं।तथाचदंपत्योरपिअन्यप्रयोजनमुद्दिश्यगतयोरपितमसःतादृशरसोत्पादक
त्वकथनेनरससर्वस्वरूपयोःभवतोःमिलनविलंबनमकार्य्यमितिध्वनितं।केचि
त्तुअन्यनायिकनिमित्तंगतयोः।भ्रमाद्भ्रांत्याइयंममाभिसारिकायंममाभिसारक
इतिमिलितयोः।परस्त्रीपरपुरुषत्वेनसंगतयोःसंभोगानंतरसंभाषणैर्जनितो
ःपश्चादुभयोःव्रीडाविमिश्रोरसोभवतीतिव्याकुर्वंतितन्नसमीचीनं।सख्याभगवत्प्रि
यायाःअग्रेग्राम्यरसकथनासंभवात्।शार्दूलविक्रीडितंवृत्तं॥३७॥इदानींत्वत्प्राप्ति

रेवतस्यसर्वस्वमित्याह॥ ॥सभयचकितंविनस्यंतींदृशौतिमिरेपथिप्रतितरुमुहु
ःस्थित्वामंदंपदानिवितन्वतीं॥कथमपिरहःप्राप्तामंगैरनंतरंगिभिःसुमुखिसुभग
ःपश्यन्सत्वामुपैतुकृतार्थतां॥३८॥ ॥हेसुमुखिसुंदरवदनेसुभगःश्रीकृष्णस्त्वांप
श्यन्कृतकृत्यतांप्राप्नोवतु।तवदर्शनादाविर्भूतसमस्तभगःस्यादितिभावः।उक्तं
च।ताभिर्विधूतशोकाभिःभगवानच्युतोवृतः।व्यरोचताधिकंतातपुरुषःशक्तिभि
र्यथेति।कथंभूतांत्वां।तिमिरेंधकारेपथिवर्त्मनिसभयचकितंयथाभिसारसंभ्रमेण
मृगशावसदृशौदृशौनेत्रेविन्यस्यंतींदिशिदिशिअर्प्पयंतींअनेनविलोकनसौंदर्यं
चध्वनितं।पुनःकिंलक्षणांप्रतितरुवृक्षंप्रतिमुहुर्वारंवारंस्थित्वासमेप्रियतमोऽत्रैवाग

मिष्यतीति।पुनःमंदंयथान्नंवेदंवपक्तिशोननगत्यापदानिवितत्वंतींचरणारविं
दंधारयंतीं।पुनःकीदृशीं।कथमपिनाग्नोदयेनरहःप्राप्तां।श्रनंगस्यतरंगोद्बोधेये
षु।कामोद्दासाःयेवरिंगैरवयवैरुपलक्षितां।श्रंगेरितिविशेषणेतृतीया।श्रंगैरनंग
तरंगिनिरितिसौंदर्याधिक्यान्निरवयवानामप्युद्दासमितिध्वनितं।सुभगःसुमुखी
तिचसमानरूपत्वात्प्रीतियोग्यत्वंचंद्राननत्वादंधकारेपित्रकाशासामर्थ्यमपि।इत्य
सगंतिकविराज्ञिषमाज्ञास्तेराधेति॥ ॥राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलि
स्थलीनेपथ्योचितनीलरत्नमवनीभारावतारांतकःस्वछंदंव्रजसुंदरीजनमनस्तो
षप्रदोषश्चिरंकंसध्वंसनधूमकेतुरवतुलांदेवकीनंदनः॥४०॥ ॥देवकीनंदनःश्रीक्ष १३६

क्षः स्वामवतुरक्षतुकिंभूतःश्रीराधायाःमुग्धंसुंदरंयन्मुखारविंदंतत्रमधुपःमुखा
रविंदेमाधुर्यंपातिरक्षतिनित्यानुकूलतयादृष्टिंप्रापयतीत्यर्थः।तन्माधुर्यमतितृष्णया
पिबतीति।त्रैलोक्याःयामौलिस्थलीवृंदाटवीतदलंकारायोचितनीलरत्नंरूपामसुंद
ररूपमित्यर्थः।त्रैलोक्यामेवाखिललोकानांमौलिस्थलीतिवा।उक्तंचाश्रहोमधुपुरी
धन्यावैकुंठाच्चगरीयसीति।पृथिव्याःभारूपोश्रवतारोयेषांमसुराणांतेषामंतको
नाशकःश्रतएवकंसस्यध्वंसनेधूमकेतुः।तद्विनाशपिशुनग्रहः।जातमात्रएवतस्य
नाशंसूचितवानित्यर्थः।श्रथवा।धूमकेतुरनलःस्वयमेवविनाशकःश्रनेनस्वाछंद्य
केलिप्रतिपादनायसामर्थ्यरूपनायकगुणःकथितः।स्वछंदंव्रजसुंदरीजनस्यमन

स्तोषायचित्ताभिलाषपूर्णायचिरमपारंप्रदोषोरजनीमुखमिव।चिरनित्यमेवावत्वि
तिवा।तथाचद्वेनाम्नीनंदभार्यायाःयशोदादेवकीत्यपि।अतःसख्यमभूत्तस्याःदेवक्या
सौरिजाययेतिकेचित्पुराणवचनंपठितं॥ ॥इतिश्रीगीतगोविंदेऽभिसारिकावर्ण
नेसाकांक्षपुंडरीकाक्षोनामपंचमःसर्गः॥ ॥५॥ ॥श्रीराधानुरागोजृंभितसंगमा
भिलाषेनमन्मथाक्रांतनयनःकृष्णोयत्रतादृशःपंचमःपंचमकामबाणतुल्यः॥५
एवंपंचमेश्रीकृष्णस्योत्कंठामभिसरणंचनिरूप्येदानींषष्ठेस्मिन्कंदर्प्पशरपीडि
तांगंतुमशक्तांराधांमनोरमसंकेतनिकुंजेसख्याप्यतच्चेष्टितंसखीकृष्णंप्रत्योहात
देवदर्शयति।अथेति॥ ॥अथतांगंतुमशक्तांचिरमनुरक्तांलतागृहेदृष्ट्वा।तच्चरितं

गोविंदेमनसिजमंदेसखीप्राह॥४१॥ ॥अथशब्दोमंगलार्थः।आनंतर्य्यार्थेवा।स
खीतच्चरितंतस्याचेष्टितंगोविंदेगोविंदंविषयीकृत्यप्राहोवाच।कीदृशे।मनसिजेन
कामेनमंदेव्यथिते।मंदोमंदस्तुच्छोयस्मात्कोटिकंदर्प्पस्वरूपइत्यर्थोवा।किंकृत्वा।
तांराधांलतागृहेक्वचिल्लतामंडपेचिरंबहुकालंव्याप्यानुरक्तांदृष्ट्वा।अस्मिन्नेवनि
कुंजेसमागत्यमामनुनेष्यतीत्येवंज्ञात्वेत्यर्थः।कीदृशी।अनंगविक्रियातःगंतुंमश
क्तांचलितुंमसमर्थां।अथवा।गोविंदेनुरक्तामिति।व्याख्येयंतेनैबहुकालार्त्त्याप्रिया
तुमसमर्थामित्यर्थः।४१॥सखीहतद्गीतेनकथयति।पश्यतीति॥ ॥पश्यतिदिशिदि
शिरहसिभवंतं।तदधरमधुरमधुनिपिबंतं॥१॥नाथहरेसीदतिराधावासगृहे॥ध्रु

वपदं॥गीतस्यास्यगुणकरीरागः॥रूपकतालः॥रागलक्षणं।रतोत्सुकांमकांतपथि
प्रतीक्षामापालयंतीमृदुपुष्पतुल्या।इतस्ततःप्रेरितदृष्टिरार्त्ताश्यामा तनुर्गुणकरीप्र
सिद्धेति।तालस्तुकथितःप्राक्।गीतार्थस्तु।हेनाथहेहरेराधावासगृहेसंकेतितनि
कुंजेमंदिरेसीदत्यवसन्नाभवति।विरहदुःखापहारायात्रहरइतिसंबोधन।नाथेति
।नाथनाधृयाच्चोपतापैश्वर्याशीष्विति हेस्वामिन्समर्थेनत्वयास्वीयानांदुःखाशांति
र्नोचितेतिदैन्योक्तिः।ध्रुवपदं।अथपदानि॥तदद्भुतानुरागेविवर्त्तंदर्शयति।रहसिए
कांतेभवंतंत्वामेवदिशिदिशिप्रतिदिशंपश्यति।कीदृशं।तत्तस्याःराधायाःयदधरं
तदेवमधुरमधुनिस्वाद्वमृतानितानिपिबंतंतदधरसंसर्गान्मधुराणिमधूनीवयात्य

क्षराणितानिशृण्वंतमितिवा।अत्यादरेणश्रवणंपानमुच्यते।इति।केचित्तुत्वदधरे
त्यादिपठंति।त्वच्छब्दस्यान्यपरत्वादन्यायाअधरमधूनिपिबंतमितिव्याकुर्वंति।चात
न्नसमीचीनं।वासकलक्षणविरोधात्।उक्तलक्षणंतुसंभवति।तदुक्तंत्रिभुवनमपि
यन्मयंविरहेति।१।नन्वेवंचेत्तर्हिकिमितिनागतेत्येतआह।त्वदिति॥ ॥त्वदभिसर
णरभसेनवलंतीपततिपदानिकियंतिचलंती॥२॥त्वदभिसरणेतवाभिसारेयोर
भसउत्साहस्तेनवलंतीअभिमुखीभवंतीकियंतिपदानिकतिपयानिपदानिचच
लंतीसतीपततित्वद्विरहेमूर्छयागंतुंमसमर्थेत्यर्थः।२।हाकष्टमेवंचेदशक्तातर्हिक
थंजीवतीत्यतआह।विहितेति॥ ॥विहितविशदबिशकिशलयवलया।जीवतिपरमि

दृतवरतिकलया॥३॥परंकेवलंमातवरतिकलयाशूर्वानुन्नृतवरतेराकलनेनसं
गमत्रतीक्षया।तवरतेःकलादृष्तिस्तयावाजीवतिजीवनंप्रवर्त्तयतीत्यर्थः।कीदृशी
विहिताःकृताःसखीजनैःतापापनोदनेविशेषेणहिताःपथ्याशतिवा।विशदाःशुभ्रा
ःबिशकिशलयामृणालांकुराएववलयाःकंकणानियस्याः।तादृशी।कलनाकालयो
दृशौकलेतिविश्वः॥३॥किंचमुकुरिति॥ ॥मुकुरवलोकितमंडनलीला।मधुरिपुरह
मितिभावनशीला॥४॥ ॥मुकुरवरिंवारंवीक्षितामंडनेबर्हमुकुटमकराकृतिकुंड
लादिभिःलीलातवानुकृतिर्यासात्रहंमधुरिपुरितिभावनशीलाचिंतनपराःरह
मितववेषंविधायाहमेवमधुरिपुरितिचिंतनस्वभावेत्यर्थः।लीलाचहावविशेषस्त १३९

दाहवाभ्यायनःप्रयोजनस्यचेष्टायाऽनुरागातिशयेनयाक्रियतेऽनुकृतिसेयंली
लोक्ता।मुनिसत्तमैरिति।तथाचोक्तं।गत्वानुरागस्मितविभ्रमेहितैर्मनोरमालापवि
हारविभ्रमैःआक्षिप्तचित्ताःप्रमदारमापतेस्तास्तावितेष्टाजगृहुस्तदात्मिकाः।गति
स्मितप्रेक्षणभाषणादिषुप्रियाप्रियस्यप्रतिरूढमूर्तयः।असावहंत्वित्यबलास्तदा
त्मिकान्यवेदिषुःक्षीणविहारविभ्रमाः।इति।अथवा।मृगमदनृतवस्त्रपीतकौशेय
वासारुचिरशिखिशिखंडबद्धधम्मिल्लपाशा।अनृजुनिहितमंशोर्वंशमुक्ताणयंती
नृतमधुरिपुवेषामालिनीपातुराधा।मधुरिपुरितिकविनचित्तस्यचिंतनेनदृढचि
त्ततयाकालाद्रूपंकरोतीतिसख्याःकटाक्षितं।मधोःवसंतस्यरिपुःतयासदृविला

संविनाव्यर्थकारीतिवा॥५४॥तद्भावापन्नायाअपितत्संगमार्त्तिमाह।त्वरितमिति॥ ॥
त्वरितमुपैतिनकथमभिसारं।हरिरितिवदतिसखीमनुवारं॥५॥हरिःमच्चित्तोपहा
रीविरहसंतापहर्त्तेतिवाभिसारंसंकेतस्थलंत्वरितंशीघ्रंकथंकस्माद्धेतोःनोपैतिना
गछतीत्यनुवारंवारंसखीवदति॥५॥अपिच।श्लिष्यतीति॥ ॥श्लिष्यतिचुंबतिजल
धरकल्पं।हरिरुपगतइतितिमिरमनल्पं॥६॥सामदनमदभ्रांतात्वय्याविष्टचित्ता
हरिरुपगतःप्राप्तइतिबुध्याऽनल्पमधिकंबहुमाननीयंवातिमिरमंधकारंश्लिष्य
तिआलिंगतिचुंबतिच।अनल्पंयथास्यात्तथेतिवा।कीदृशंसजलमेघसदृशं॥६॥भ
वतीति॥ ॥भवतिविलंबिनिविगलितलज्जा।विलपतिरोदितिवासकसज्जा॥७॥

भवतित्वयिविलंबिनिविलंबंकृतवतिसतिविगलितलज्जागतलज्जासतीविलप।
ति।हेनिष्कृपकथमेतावदौदास्यंमयित्वयाचरितमितिविलापंकरोतिरोदित्यश्रूणि
मुंचतिसावासकसज्जावासकेलीलागृहेकांतसंगमायसंभृतसकललीलोपकर
णा।भरताद्यैरभिदधेस्त्रीणांवासस्तुवासकः।स्ववासकवशात्कांतेसमेष्यतीगृहंप्र
ति।सज्जीकरोतिचात्मानंयासावासकसज्जकेति।वासकसज्जेयंनायिका।तथाचोक्तं
शृंगारतिलके।भवद्वासकसज्जासौसज्जितांगरतालया॥निश्चित्यागमनंभर्त्तुर्द्वारे
क्षणपरायथेति।७।श्रीजयदेवति॥ ॥श्रीजयदेवकवेरिदमुदितं।रसिकजनंतनुता
मतिमुदितं॥८॥श्रीजयदेवकवेःइदंउदितंकथितंगीतंरसिकजनशृंगाररसभाव

नाम्नाविनोतःकरणंअतिमुदितंअतिशयेनानंदितंतनुतांविस्तारयतुशृंगाररस
विशिष्टनक्तास्वादचतुरेणास्वादनीयमित्यर्थः॥१२॥इदानींतस्याःत्वदेकपरत्वमा
हाविपुलेति॥ ॥विपुलपुलकपालिःस्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलं
व्याहरंती।तवकितवविधायामंदकंदर्पचिंतारसजलनिधिमग्नाध्यानजग्नापराक्षी
॥ध२॥ ॥हेकितवधूर्तसामृगाक्षीमृगशावलोचनातवामंदकंदर्पस्यकंदर्पकोटिर
मणीयमूर्तैःत्वसंबंधनल्यकंदर्पस्यवाअनल्याकंदर्पचिंवाममपाणकोटिवच्चनः
कदावागमिष्यतीत्याद्याद्येवंरूपांतांविधायहृदिकृत्वाध्यानेनजग्नात्वयिसंगतास
तीरसजलधेःशृंगाररससमुद्रमग्नाबभूवेत्यर्थः।रसमागरमग्नायाश्चेष्टितंवर्णय १४१

ति।कीदृशी।विपुलाप्रचुरापुलकपालिःरोमांचपंक्तिर्यस्याःसा।मग्नस्योद्धरणार्थ
मिवगृहीतांकेवा।त्वदंगस्पर्शेद्भुतसात्विकविकारेत्यर्थः।किंकुर्वती।मन्मथोन्मिदम
दनोन्मथितचित्तस्यतवस्तनालंबननाधरपाननीवीबंधनोन्मोचनासक्तिमाकलय्य
काकुव्याकुलंकाक्वाध्वनिविकारविशेषेणाकुलंयथास्यादेवंव्याहरंती।कुहमितारव्य
हावमाश्रितामुंचमुंचननमांमामेत्यादिकुपितेवनिषेधकंवाक्यंकथयंतीत्यर्थः।उ
क्तंचाकुस्त्रियांविकारोयःशोकनीत्यादिनिध्वनेरितिकुहमितलक्षणं।केशाधरा
दिगृहणेमोदमानापिमानसे।ऊःखितेवबहिंरूपेद्यत्रकुहमितंहितदिति।पुनःक
थंयथास्यात्।स्फीतःपुष्टऊःसीत्कारोयत्रएवंयथास्यात्तथा।नखोल्लेखादिनेवोत्कट।

सीत्कारंकरोतीत्यर्थः।बाह्यविकाराननुवर्ण्येदानींमंतर्विकारमाह।पुनःकथंयथास्या
त्।अंतश्चित्तेजनितोजडिमजाड्यंस्तंभः आनंदविकारस्तद्यथास्यात्तथा।अनेनरता
ख्यःभावउक्तः।एभिर्भावैःरसजलधौमग्नत्वमुक्तं।स्तंभःचेष्टाप्रतीघातः।इदात्मानं
दावाप्तिलक्षणं।जडाताख्यानवम्यवस्थापीयंध्वनिता।यदिपरोक्षेप्येवंतर्हित्वत्संग
मेकीदृशःरसोदयोभविष्यतीतिकोवर्णयितुंसमर्थइतिभावः।अन्यस्यापिजलधिम
ग्नास्यांतर्जाड्यंरोमांचःसीत्कारःत्रुट्यद्वर्णभाषणंकाकुनिर्गमनचिंताचभवतीति॥
४२॥ननुमयासहरमणंजातमेवकिमर्थंममतत्रगमनंचेदेवंरममाणापिसाक्षा
त्त्वांविनावक्ष्यमाणव्यापारवृत्त्यापिनिशांनिनेतुंसमर्थानभविष्यतीत्याह॥ ॥अं

गेष्विति॥ ॥अंगेष्वाभरणंकरोतिबहुशःपत्रेपिसंचारिणिप्राप्तंत्वांपरिशंकतेवित
नुतेशय्यांचिरंध्यायती॥इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशतव्यासक्तापि
विनात्वयावरतनुर्नैषानिशानेष्यति॥४३॥हेकृष्णएषावरतनुःसुंदरांगीत्वयावि
नात्वामृतेनिशांरात्रिंननेष्यतिप्रभातप्रापयितुंसमर्थानभविष्यतीत्यर्थः।कीदृशीइ
तिअनेनप्रकारेणाकल्पोऽलंकारःविकल्पस्तदागमनशंकातल्पंशय्या।रचनादूती
प्रेषणादित्वदागमनोपायचिंतनंएभिःसंकल्पोमनसोवृत्तिरित्यादिलीलाशतव्या
सक्तापितत्तद्व्यासंगेपित्वत्संगमाभिलाषिण्यास्तस्याःनकुत्रापिमनसोविरामइति
भावः।अलंकारादिव्यासंगंदर्शयति।अंगेष्विति।अंगेष्वाभरणंमलंकारंतवसुखाय

मंगलायवाबहुशोऽनेकप्रकारेणकरोति।इत्याकल्पःकथितः।पत्रेपिसंचारिणिवृ
क्षपत्रेऽपिपक्ष्यादिनाचलतिसतित्वांप्राप्तमागतंपरिशंकतेसर्वतःवितर्कयतीत्यर्थ
ः।अनेनविकल्पः।अपिचतवकामकेलिनिमित्तंशय्यांवितनुतेविविधचित्रोपधानादि
भिर्नानाप्रकारेणविस्तारयति।एवंतल्पः।चिरंबहुकालंध्यायतित्वदागमनोपायंचिं
तयति।रचनेयंदर्शिता।एभिर्व्यापारैस्तवागमनाशयाकालंनयतीत्यर्थः।अयमल्प
ताख्योहावस्तदुक्तं।अल्पतासातुकथिताप्रियस्यागमनेसति।दिदृक्षयोभयोद्वस्ते
त्समंभ्रममलंकृतिरिति।आकल्पवेषौनेपथ्येइत्यमरः।तर्कोविकल्पःशंकाचेति॥
संकल्पःकर्ममानसमिति॥४३॥सर्गांतेकविराशिषंप्रयुंक्ते।किमिति॥ ॥किंविश्राम्य

सिकृष्णभोगिभवनेभांडीरभूमीरुहिभ्रातर्यासिनदृष्टगोचरमितःसानंदनंदास्पदं॥रा
धायावचनंतदध्वगमुखान्नंदांतिकेगोपतोगोविंदस्यजयंतिसायमतिथिप्राशस्त्यग
र्भागिरः॥४४॥श्रीगोविंदस्यगिरःवाण्योजयंतिसर्वोत्कर्षेणवर्त्तंते।भागवेर्भितयाव
क्तुर्वैदग्ध्याख्यापनेनतत्वेनचगुरुजनवंचनयासंभोगसंपत्तिसंपादनात्किंभूताःगि
रःसायमतिप्राशस्त्यगर्भाः।सायंकालेयेऽतिथियस्तेषांप्राशस्त्यंस्वागतादिप्रशंसा
ध्वन्योयमतिथिर्गृहिणांपुण्योत्पादकः।वस्तुतस्तुप्रियाभिसारसंकेतज्ञापनादयब
हुसुखदातेतिगर्भेऽभ्यंतरेयासांताःप्रशंशयाभ्यंतरेभिप्रायविशेषयुक्ताइत्यर्थः
व्याजोक्तिरलंकृतिरियं।कीदृशस्यगोविंदस्यानंदांतिकेपितुःसमीपेतत्तादृक्संकेत

सूचनारूपं अध्वगमुखान्निःसृतं श्रीराधायाः वचनं गोपतः संगोपनं कुर्वतः किं तदि
ति। हे भ्रातः पथिक। भ्रातः इति कोमलामंत्रणे। भांडीरभूमीरुहि वटवृक्षे किं विश्राम्य
सि विश्रामं मा तथाः। तत्र हेतुः। कृष्णभोगिभवने। कृष्णश्चासौ भोगी च तस्य भवने काल
सर्प्पावासे पक्षे शृंगारिणः श्यामसुंदरस्य विलासगृहे। पक्षद्वयेनेह स्थेयमिति भावृ
पदोपादानं। श्लेषालंकारश्चात्र। कृष्णः केशवनीलयोरिति धरणिः। भोगी कामुकस
र्पयोरिति विश्वः। तर्हि क्वयामीत्यत आह। इतो वटात्सानंदं सकलर्द्धिमंतं नंदस्यास्पदं
मंदिरं नयासि। अपि तु याहीति शून्यसर्प्पावासपरित्यागेन श्रीमद्गृहातिथ्येन च नि
र्वृता भविष्यतीत्यर्थः। दूरे भविष्यतीत्यत आह। दृष्टगोचरमिति। आसन्नमेव। पथिक

वंचनेन संकेतसूचना कृष्णस्य तादृग्वाग्वैभवप्रकटनेन च श्रीराधायाः वाचो जयंतीत्य
पि ध्वनितं। अत्र चातुर्य्यादिगुणविशिष्टो राधामोहनावालंबनौ स्वयं दूतीवनायका॥
निशामुखवटाद्युद्दीपनविभावाः। एवं रसराट् शृंगारो निरूपितः॥४४॥ ॥इति श्री
गीतगोविंदे वासकसज्जावर्णने धन्यवैकुंठो नाम षष्ठः सर्गः॥ ॥६॥ ॥राधानुरागास्प
दत्वेन धन्यः स चासौ विगतविरहमूर्छश्च वैकुंठो हरिर्यत्र तादृशः॥६॥ पूर्वतावदुभयो
रनुरागं निरूप्येदानीं रसांतरप्रवेशेन रसविशेषवैचित्र्याभावोद्रेकप्रकटयन् पुन
रपि हेतुपूर्वकं विप्रलंभाख्यशृंगारमवतारयति॥ अत्रांतर इति॥ ॥अत्रांतरे च कुल
टाकुलवर्त्ममातसंजातपातक इव स्फुटलांछनश्रीः॥ वृंदावनांतरमदीपयदंशुदी

पैर्दिक्सुंदरीवदनचंदनमिंदुरिंदुः॥४५॥अत्रांतरेऽस्मिन्नेवावसरेइंदुश्चंद्रोऽशुजा
लैःकिरणसमूहैर्वृंदावनांतरंवनमध्यमदीपयत।प्रकाशितवान्।अनेनालोकित
श्चंद्रोयंवृंदावनांतरंप्रकाशितवान्।नन्वन्यत्रेति।परमनिविडस्यांतरेव्यापकत्वे
नप्रकाशबाहुल्यमप्युक्तं।अथवावृंदावनांतरवर्त्तिनोर्नागरीकिशोरयोरनंगमुद्दी
पयदित्यर्थः।कामसहचरत्वात्।चंद्रस्योद्दीपनत्वमाह।कीदृशः।दिक्पूर्वादिक्सैव
सुंदरीतस्याःवदनेचंदनबिंदुःमंडलाकारसकुंकुमोद्घृष्टश्रीखंडतिलकः।श्रीराधा
वदनेतिलकादिनिर्माणस्पृहाकृष्णस्यास्यदर्शनभवतीतिभावः।विप्रलंभहेतुत्वंद
र्शयन्विशिनष्टि।कीदृशः।स्फुटाप्रकटीभूतालांछनश्रीःचिह्नविशेषशोभायस्मि

न्तादृशः।तत्प्रोक्षतै।कुलटाकुलस्यश्रीकृष्णेऽभिसारिकासमूहस्ययोवर्त्मपातः
संकेतआगमनमार्गप्रतिबंधस्तेनसंजातमुत्पन्नंपातकयस्य।तादृशइव।उक्तंच।
किमुत्तीर्णःपंथाःकुपितभुजगीभोगविषमोविषोढाभूयस्थःकिमितिकुलपालीक
टुगिरः।इतिस्मारस्मारंदरदलितशीतद्युतिरुचौसरोजाक्षीशोणंदिशिनयनको
णंविकिरतीति।अत्ररूपकोत्प्रेक्षेऽलंकृती।केचित्तुश्रीवृंदावनेश्वर्याःविप्रलंभम
सहमानाःपूर्वसर्गांतेसंयोगमनुवर्णयंत्यत्रसप्तमेचवैचित्र्यविप्रलंभाख्यमद्भुत
रसविवर्त्तंनिरूपयंति।तत्रैवंसंगतिः।पूर्वसर्गेस्वयंदौत्येनसंयोगःअग्रिमाष्टप
द्याप्रेमविलापःततअजानंत्याहृत्याविषादव्यंजनेनस्वीयमेवरमितमन्यामुद्दिश्य

प्रबंधद्वयेनश्रीराधयानिरूपितंसंगांतेप्रणयालापामृतंनिपीयतत्संगमचिह्नै
रेवनागरमौलेःतस्याअग्रेप्राक्द्यंनीलंनिचोलेत्यादिततोऽमेउद्दढभावमदविह्व
लयानागर्य्याकृतानुनयविनीतस्यापियाहियाहीतितिरस्कारःतदग्रेसुगमएवत
दीयानांपरितोषायैवेदंव्याकृतंतत्क्षंतव्यं।तदानेनश्लोकेनश्रीराधयाक्रीडतिगो
विंदेऽन्याभिसारिकानांरोधकत्वंवर्णितं।अतएवलांछनश्रीरितितासांवर्त्मपात
पातकेनजातकलंकस्यापितयोःप्रीत्यापादनेनशोभैवबभूवेत्यर्थः॥४५॥विप्रलंभ
स्यहेतुंप्रदर्श्येदानींतद्दर्शयति।प्रसरतीति॥ ॥प्रसरतिशशधरबिंबेविहितविलंबे
चमाधुरेविधुरा॥विरचितविविधविलापंसापरितापंचकारोच्चैः॥४६॥साराधाउ

च्चैरत्यर्थं।विरचितःकृतोनानाविधःक्वासिकांतकथंशठमामुपेक्ष्यसइत्यादिविलापो
यत्रएवंयथास्यात्तथापरितापंचकारकृतवती।किंभूताविधुराविरहदुःखिताकिंसति
।शशधरबिंबेचंद्रमंडलेप्रसरतिसति।पुनःकिंसति।माधवेनायकशिरोमणौविहित
विलंबेसंकेतागमनंप्रतिकालातिक्रमंकृतवतिसति।माधवपदेनचंचलइत्युपालंभो
वा।पक्षांतरेचसमीपेवर्त्तमानेपिकृष्णेतद्बोधायविहितविलंबेसति।प्रेमकौतुकदर्श
नायसखीभिःसहसंमतंविधायतत्रैवनिलीयस्थितेसतीत्यर्थः।उद्दीपनविभावश्चंद्र
ः॥४५॥यदुक्तंविलापंचकारतदष्टपद्यावर्णयति।कथितसमयेत्यादिना॥ ॥कथि
तसमयेपिहरिरहहनययौवनं।ममविफलमिदममलरूपमपियौवनं॥१॥यामिहे

कमिहशरणंसखीजनवचनवंचिता॥ध्रुवपदं॥गीतस्यास्यमालवरागः।प्रतिमठस्तु
तालः॥तल्लक्षणंकथितंप्राक्।विप्रलब्धाचात्रनायिका।प्रेक्ष्यदूतींस्वयंगत्वासंकेतंनाग
तःप्रियः।यस्यास्तेनविनादुःस्थाविप्रलब्धातुसामतेति।गीतार्थस्तु।हेसखि।इहास्मिन्
समयेस्वांतदुःखप्रतीकारायकंजनंशरणंयामि।अथवाकंजलंतापशांत्यैशरणंया
मि।तेनविनाजलादिषुप्रविशामीत्यर्थः।किंभूताहं।सखीजनवचनंवंचिता।सख्यए
वजनःइतरजनवत्उपेक्ष्यंत्यःतद्वंचनैर्वंचिताप्रतारिता।वारंवारंस्वाभिमतोद्यमेकृ
तेऽहंनानाप्रकारवाक्यैःवारितेत्यर्थः।कोब्रह्मात्मानिलार्केषुशमनेसर्वनाम्निच।पा
वकेचमयूरेचसुषशीर्षजलेषुकमितिविश्वः।शरणंगृहरक्षित्रोत्यमरः॥ध्रुवपदं॥

केवलंसखीजनैःवंचिताकिंअपितुकोटिप्राणाभीष्टेनापीत्याह।हरिःस्मरणमात्रेण
सकलदुःखहर्त्तापिकथितसमयेपिकथितोयःसमयःकालोस्मिन्नेवावसरेसर्वथै
वमयासंकेतस्थलमागंतव्यमिति।अहहखेदेतदापिवनंसंकेतनिकुंजेनययौनप्रा
प्तवान्अतोममेदंपौवनंनवीनाद्भुततारुण्यममलरूपमपिनिर्मलसौंदर्य्यमपिद्व
यंविफलंअकृतार्थमित्यर्थः।यौवनलक्षणं।नितंबोविपुलोमध्यंकृशमंगंवरद्युति
ःपीनौकुचावूरुयुगंरंभासंपूर्णयौवने।तन्माधुर्य्यं।नवित्रस्ताकांतेप्रतियुवतिरा
सीन्मुखरुचादधारस्तैमित्यंप्रणयघनवृष्ट्यातवनका।व्रजेशिष्याकाभून्नहितवक
लायामितिहरेर्निकुंजस्वाराज्येत्वमसिरसिकेपट्टमहिषीति।भूषणाभ्यांहिचमत्कारेण

नेत्रयोः।परस्परस्मृतिनुदममलंतंप्रकीर्त्तितमिति।१।अपिच।यदिति॥ ॥यदनु
गमनायनिशिगहनमपिशीलितंतेनममहृदयमिदमसमशरकीलितं॥२॥ ॥
यद्यस्यकृष्णस्यानुगमनायानुसरणायनिशिरात्रौगहनमपिवनमपिशीलितंअ
नुभूतंअथवागहनमपियत्कथमपिनक्रियतेतदपिकृतंतेनकृष्णेननिमित्तभू
तेनममेदंहृदयंअसमशरेणविषमबाणेनप्रणयकोटितुल्येनकीलितंविद्धं।अ
समशरेणकामेनवा॥ममेति॥ ॥मममरणमेववरमतिवितथकेतना।किमिहवि
षहामिविरहानलमचेतना॥३॥ ॥एवंवंचितायाःमममरणमेववरंश्रेष्ठंनतुदेहध्या
रणं।किंलक्षणाहं।अतिवितथकेतना।अतिशयेनवितथंमिथ्याभूतंकेतनंशरी

रंयस्यास्तादृशी।अकृतकार्यत्वात्।अथवा।अतिक्रांतवितथमवितथं।सत्यंकेत
नंलांछनंधिगियंमानवतीप्रेष्ठोपेक्षयापिजीवतीतियस्यास्तादृशी।अथवा।अति
वितथंनिःफलंकेतनंप्रेष्ठसंगमंभविष्यतीतिसखीनामुपनिमंत्रणंयस्यास्तादृशी
।अथवा।अतिविततंअतिशयेननिरर्थकंजातंकेतनंप्रेम्णाचिरकालमनोरथश
तैर्निर्मितशय्यादिभिःनिकुंजरूपंगृहंयस्यास्तादृशी।इतिहेतोःइहवनेअचेतना
ज्ञानशून्या।अथवा।अःश्रीकृष्णश्चेतनायस्यास्तादृशीअथवा।एवंविधायाअपिकृ
ष्णेचेतनाबुद्धिर्यस्यास्तादृशी।विरहानलंविरहाग्निंकिंकिमितिविषहामि।सहामि।
तस्मात्पूर्वंनिश्चितमेववरंमनागिष्टं।यदिदेहांतरेपितस्यप्राप्तिःस्यात्।न्यायांश्रेष्ठो

वरःप्रोक्तोमनागिष्टमतंवरमितिधरणिः।वितथंत्वनृतंवचइत्यमरः।केतनंलांछने
कायेगोत्रेचोपनिमंत्रणेइतिविश्वः।अतिवितथचेतनेतिकश्चित्पाठः।तत्रातिवित
थंअतिव्यर्थंचेतनंत्वत्याशायस्याःसेत्यर्थः।चेतनंतूपदेशेस्यात्त्वत्याशायांचचेतन
मितिविश्वः।शमामित्यादि॥ ॥मामहहविधुरयतिमधुरमधुयामिनी।कापिहरि
मनुभवतिकृतसुकृतकामिनी॥ध॥ ॥अहहेतिखेदेइयंमधुरासरसामधुयामिनी
वसंतरात्रिर्मंपरमसुखरूपापिविधुरयतिविकलयतिकापिकृतंसुकृतंपयाता
दृशीकामिनीसफलकामायोषाहरितस्याःपीडांहरनीतितथाभूतंअनुभवतिआलिं
गनादिनेतिशेषः।विधुरंविकलेविश्लेषेदूषणात्रातेइतिविश्वः।मधुरंसरसेज्ञेयेस्वाद १४९

न्यपिमनोहरेइतिधरणिः॥ध॥अहहेत्यादि॥ ॥अहहकलयामिवलयादिमणिभूष
णंहरिविरहेदहनवहनेनबकुरुषणं॥५॥कुसुमेत्यादि॥ ॥कुसुमकुसुमारतनुमत
नुशरलीलया।स्वगपिहृदिहंतिमामतिविषमशरलीलया॥६॥स्वगपिपुष्पमालापि
अतनुशरलीलयाकामबाणविलासेनमांहृदिमनसिहंति।ताडयति।कामबाणपुष्पा
न्पेवस्वंगपिपुष्पमयीअतोतच्छीलयेत्यर्थः।कीदृशयालीलया।अतिविषमशीलया।अ
तिशयेनविषमंशीलंस्वभावोयस्यास्तया।तदुक्तं।अपूर्वेयंधनुर्विद्यामन्मथस्यमहात्म
नःशरीरमक्षतंकृत्वानिनत्यंतर्गतंमनइति।बाणस्तावदन्यक्षितोऽन्यंहंतिअयंतुये
नधृतःतमेवविध्यतीतिविषमत्वंवा।अथवा।अतनुशरलीलयास्थूलबाणविष्टया॥

अतनुःशरीररहितःपविशतिपरंनतुदृश्यतेऽतोऽनिर्वारःइतिवा।कीदृशींमां।कु
सुमसुकुमारतनुंकुसुमादपिसुकुमारतनुर्यस्यास्तादृशीं।सजातीयेनसजातीय
स्यहननमपीतिविषमत्वमेवप्रतिपादितं।पीडासहनासामर्थ्यंचध्वनितं।सुकुमार
तनुरितिपाठेकिंभूतास्वकंकुसुममयीसुकुमारावतनुश्चेति।अत्रापिविष
मत्वेतात्पर्यंशीलंस्वभावेसतृत्वेऽत्यमरः।ह्याकिंचाअहमिहेत्यादि॥ ॥अहमिहनि
वसामिनगणितवनवेतसा।स्मरतिमधुसूदनोमामपिनचेतसा॥७॥अहंदुःखि
तापितदेकनिष्ठाइहनिकुंजेनिवसामि।तिष्ठामि।कीदृशी।नगणिताःनसंख्याविं
ताःवनवेत्रलताश्चययातादृशी।अनेनदुर्ल्लंघ्यमप्यलंघितमित्यर्थः।अथवा॥ १५०

शिरश्चालनेनगणितास्तमन्वेषयंत्यापरिसंख्यातावनवेतसदृशायया।गणि
तवनवेतसादृइहनिवसामि।अपितुनिवसाम्येवेत्यर्थः।मधुसूदःश्रीकृष्णोमांचे
तसानस्मरत्यपिना।मधुसूदनपदेनकठिनत्वंवाप्यल्पमपिसूचितं।मधुवसंतंमधु
रसंवानाश्रयतीतिवामधुसूदनः।स्वाधीनचेतोमात्रसाध्यंयत्रस्मरणमपिनक
रोति।तत्रस्निग्धेनमनसाकृतोनिरंतरामानुवृत्तिरितिचेतसेत्यनेनध्वनितं॥अ
न्यथास्मरणस्यचेतोजन्यत्वेनचेतसेत्यस्यवैयर्थ्यापत्तेः॥७॥हरिचरणेति॥ ॥हरि
चरणशरणजयदेव---भारती।वसतुहृदियुवतिरिवकोमलकलावती॥८॥ह
रिचरणौशरणीयस्याएतादृशोजयदेवकविस्तस्यभारतीवाणीहृदिहृदयेवसतु।

अर्थात्।कृष्णभक्तानां हरिचरणशरणेत्यनेनवाण्याअलौकिकत्वमुक्तं।कीदृशीकोमला
।अकठिनवर्णा।कोमलत्वंसुखोच्चारस्पष्टार्थपरिभूषितः।इति।कलावतीकवित्वकला
युक्ताकेवलयुवतिरिव।कीदृशी।कोमलामृद्वंगीकलावतुःषष्टिकलाकुशला।अथ
वाहेकोमलसरसश्रोतः।हेहरिचरणशरणेतिवा।कलावतीकलौअतिक्रांताईल
क्ष्मीर्मोक्षादिसंपत्तिर्ययासायांभारतींगायतांशृण्वतांमोक्षादिष्वप्यादरोनभवतीत्य
र्थः।युवतीरपि।कलौप्रणयकलहेमानादिभंग्यातिक्रांतालक्ष्मीयर्यासा।अथवा।
कलौप्रेष्टमाननात्अधिकालक्ष्मीशोभासौभाग्यसंपत्तिर्यस्याःसा।अथवा।हेकोम
लभक्तवात्सल्येनपरममृदुलश्रीकृष्णतवभक्तस्यभारतीश्रीराधाचरितवर्णनरू

पाणी।यथायुवति।पूर्वोक्तावल्लभाश्रीराधैवतवमनसि।तथैवेयमपिवसत्वित्यर्थः
॥८॥२३॥तदेवमनयाष्टपद्याविप्रलब्धायाश्चेष्टितमनुवर्ण्येदानींतस्याःकृष्णविषयका
तिप्रेमदर्शनायतदनंतरमप्यकंठंवर्णयति।तत्किमिति॥ ॥तत्किंकामपिकामिनी
मभिसृतःकिंवाकलाकेलिभिर्बद्धोबंधुभिरंधकारिणिवनाभर्णेकिमुद्भ्राम्यति।कांतः
क्लांतमनामनागपिपथिप्रस्थातुमेवाक्षमःसंकेतीकृतमंजुवंजुललताकुंजेपिय
न्नागतः॥४७॥कांतःकमनीयवल्लभःश्रीहरिःसंकेतीकृतोयोमंजुर्मनोहरोवंजुल
लताकुंजोवेत्रलतागृहंतत्रापियद्यतोहेतोर्नामितस्तत्कामपिकामिनीकामातुरां।
किअभिसृतःतदभिमुखंगतःकामिनीपदेनस्वसौभाग्याधिक्यंकटाक्षयतिसःस्वभाव

तस्तुमामेवाभिसरति।तयाबलात्किमाकृष्टइतिभावः।ननुमांविहायकथमन्यामभि
सरिष्यतीत्यन्यदाह।किंचेति।यद्वा।नित्यप्राप्तसंगमैर्बंधुभिर्मित्रैःकलाकेलिभिःक्री
डाकौशलैःबद्धोरुद्धः।इदमपिनघटते।मद्विलासाकृष्णस्तैरोद्धुमशक्यस्तत्राह॥कि
मुवितर्क्केमामभिसरनसंकेतस्थलमलभमानः।अंधकारिणीघनतरतरुछायया नि
विडांधकारवतीवनोपांतेसंकेतीकृतविपिनसमीपेभ्राम्यतिपरिभ्रमणकरोति
किं।ननुनागरशिरोमणे।सहस्रशोअनुभूतस्थलःभ्रमंकथंभविष्यतीतिनिश्चित्या।
ह।क्लांतमनाइति।क्लांतंमद्वेषदुःखेनोपतप्तंमनोयस्यतादृशः।मनागपिपथिमार्गे
प्रस्थातुमेवाक्षमस्तेनचलितुमेवासमर्थइत्यर्थः।उक्त्वावयंनायिका।उक्त्वाभवतिसा

यस्याःसंकेतंनागतःप्रियः।तस्यनागमनेहेतुंचिंतयंत्याकुलायथेतितल्लक्षणं।सं
शयाक्षेपालंकारोयं।तदुक्तंदंडिना।किमयंशरदंभोदःकिंवाहंसकदंबकं।रुतंनूपु
रसंवादिश्रूयतेतन्नतोदयः।इत्येषसंशयाक्षेपःसंशयोयन्निवर्त्तते।धर्मेणहंससुल
भेनाष्टद्यनजातिनेति।वितर्क्केकिमुवेत्यमरः।उपांतःसविधेचेतिविश्वः॥४७॥अथे
ति।अथागतांमाधवमंतरेणसखीमियंवीक्ष्यविषादमूकां।विशंकमानारमितकया
पिजनार्द्दनदृष्टवतेतदाह॥४८॥ ॥अथेति।अथानंतरंइयंराधाएतद्वक्ष्यमाणंदृ
ष्टवदाह।स्वयमवलोकितमिवकथितवती।किंकृत्वा।सखीमाधमंतरेणकृष्णंविना
आगतांवीक्ष्यदृष्ट्वाकिंभूतांसखींविखादमूकांदुःखातिशयेनवार्त्तांकर्त्तुमशक्तां।

त

कीदृशी।जनार्दनंश्लक्ष्णंकदाचितनायिकयारमितंविश्रांकमानातर्कयंती।जनस्या
र्दनस्वभावोयमतस्तस्यममसंतापकत्वंमुचितमित्यभिप्रायेणजनार्दनपदोपादा
नं।उपेंद्रवज्रावृत्तं।पक्षांतरेचश्रीकृष्णेसंकेतनिकुंजेजनमानात्रापिव्याकुलांश्री
राधांनिरीक्ष्यसखीविषादमूकातांवीक्ष्येत्यर्थः।४ठ।।यदाहृतजीतेदर्शयति।।स्म
रसमरेति।। ।।स्मरसमरोचितविरचितवेषा।गलितकुसुमदरविलुलितकेशा।
१।कापिमधुरिपुणा।विलसतियुवतिरधिकगुणा।।ध्रुवपदं।।गीतस्यास्यवसंत
रागः।एकतालीतालश्चगीतार्थस्तु।कापियुवतिःमधुरिपुणाकृष्णेनसहविलस
तिक्रीडति।किंभूता।अधिकगुणाअधिकौसौंदर्यादयोगुणाःयस्याःसाःयुवतिर्विज १५३
लसतीतिनायिकाकर्तृकंविपरीतरतमुक्तंतेनचान्यानिमुखस्यबलाक्रमणेनाधि
कगुणेतिस्त्रीगुणेसाकृतमपिव्यज्यते।मधुरिपुणेतिमधुरसानज्ञेनचपलेनवेति
कटाक्षितंचाध्रुवपदं।।तद्विपरीतरतचेतमाह।किंभूतेण।स्मरसमरःकामसंग्रा
मःसुरतमितियावत्।तत्रोचितोयोग्योविरचितःकृतवेषःप्रसाधनंययासा।पुनः
कीदृशी।गलितानिकुसुमानियेभ्यःतादृशाःईषद्विलुलिताःस्रस्ताःकृष्णेनसकचग्र
हचुंबनादानेनकेशाःयस्यासा।विपरीतरतेनायिकायाःकेशग्रहणपूर्वकमेवचुं
बनेकार्यमित्यक्तं।प्राकृ।कुसुमनरेतिपाठेगलितःस्खलितःकुसुमनरोयेभ्यस्ता
दृशाविलुलिताःकेशायस्याःसेत्यर्थः।१।हरीति।। ।।हरिपरिरंभणवलितविकारा।

कुचकलशोपरितरलितहारा॥२॥हरेःपरिरंभणेनालिंगनेन।वलितोजातोविकारो
ऽनंगविक्रियायस्याःसाकलशाविवकुचौतत्रतरलितश्चंचचलितहारोयस्याःसा
।कुचयोःकलशत्वेनतदुपरिहारस्यवर्णनेननिर्विघ्नसुरतोत्सवनिर्वाहायमंगलक
लशस्थापनमिवकृतमितिध्वनितं।कामक्लेशहरणाद्धरिरित्युक्तं।संभोगकौशलेन
तच्चित्तापहरणाद्वा॥२॥विचलेति॥ ॥विचलदलकललिताननचंद्रातदधरपानर
भसकृततंद्रा॥३॥क्रीडावशतोविचलद्भिश्चंचलैरलंकैश्चूर्णकुंतलैःललितोमनोह
रोआननचंद्रोमुशशीयस्याःसा।लालित्यंचालकानांमुखेचलत्कलंकवच्चंमसःप्रती
तेः।पुनःकीदृशी।तस्यश्रीकृष्णस्याधरपानरभसेनवेगेनकृतातंद्रातत्सुखानुभवे

नचक्षुर्मीलनंययासा।अतिमादकाधरपानेनमत्तटयाकृतघूर्णेत्यर्थः॥चंचलेति॥
चंचलकुंडलललितकपोला।मुखरितरशनजघनगतिलोला॥४॥त्वांविनाक्षणम
प्यहंस्थातुंनपारये।त्वमेवममप्राणवल्लभेत्येवतस्यानुनयंश्रुत्वाधूर्तज्ञातोस्येवं
कथयंत्याशिरश्चालनेनक्रीडावेगेनवाचंचलाभ्यांकुंडलाभ्यांललितौकपोलौय
स्याःसा।पाठांतरेदलितौमृदितावतिगतागतेनपरमसुकुमारत्वात्।किंचमुख
रिताशब्दायमानारसनाक्षुद्रघंटिकायत्रतादृशस्यजघनस्यगतागतेनलोलाचं
चला।यथासंग्रामेविविधवाद्यैःशूराणांचापलंभवतितथाऽस्याअपि।सुरतसंग्रा
मेऽतिचापलायरसनायाःमुखरत्वमितिभावः॥४॥दयितेति॥ ॥दयितविलोकि

तलक्षितहसिताबक्रविधकूजितरतिरसरसिता॥५॥ ॥दयितस्यश्रीकृष्णस्यवि
लोकितेनानिश्चायविशिष्टनिरीक्षणेनलक्षितालक्षावती।हास्ययुक्तोचेत्यर्थः।पुरुषा
यमानायास्तस्याश्चधःस्थितस्यांगतायमानस्यतस्यावलोकनादीषदुत्पन्नलक्षाया
ःसुरतेऽनुपयोगत्वाद्संभोगत्वावेगेनहास्यमेवाभूदित्यर्थः।उक्तंच।सुरतादन्यत्रल
क्षापरमभूषणमिति।बक्रविधंपिकशिखिकलहंसादीनामिवनानाप्रकारंकूजित
माश्लिष्टंयत्रतादृशोयोरतिरसःसंभोगानुरागस्तेनरसिताहृष्टा।बक्रविधंपारावता
दीनांयत्कूजितंतवत्।रतिरसेरसितंश्लिष्टंयस्याःसेविता।रसितंश्लिष्टेहृष्टेचेति।
॥५॥विपुलेति॥ ॥विपुलपुलकष्टथुवेपथुनंगाश्वसितनिमीलितविकसदनंगा। १५५

ह॥विपुलाःप्रचुराःयेपुलकारोमांचास्तेषां।ष्टथुर्महानयोवैपथुःकंपस्तस्यचनंगा
स्तरंगाःयस्यांसा।रोमांचकंपायारुत्तरोत्तरोत्पत्स्यांतरंगसाम्यं।नेंगस्तरंगउंगने
देनंगोजयविपर्ययेशतिविश्वः।अपिचाएवंभूतसुखानुभवेविच्छेदोमाभूदिति॥सु
रतायासेनवाश्वसितंनिःश्वासःपरमानंदावासिसान्निध्यसूचकानुभावः।आनं
दावास्याचनिमीलितंअक्षिमुखंणमिति।श्वसितनिमीलिताभ्यांविकसत्स्मकटीन
वदनंगःकामोरेतोलक्षणंयस्याःसा।तउक्तंमुखःस्वेदघनाश्लेषःसीत्कारोवीतल
क्षताःकारोच्छ्वसितंनार्य्याबीजसान्निध्यसूचकमिति।रतिरहस्येमूर्छानामीलनं
चाक्षणोश्चक्षतिकालस्यलक्षणमिति॥ह॥श्रमजलेति॥ ॥श्रमजलकणभरसुभग

शरीरापरिपतितोरसिरतिरणधीरा॥श॥कीदृशी।श्रमजलकणान्नरेणसुरता।
यासप्रस्वेदविंदुसमुद्देनसुभगंमनोहरंमुक्तास्तकश्रोनादधछरीरंयस्यासा।किं
वोरसिकृत्वद्वसिपरिपतिता।पुनःसुरतायकृत्वोद्यानशंकयास्वनुजाभ्यांतमा
दृत्यपतितेत्यर्थः।पतितेतिनिःसहत्वंकथितं।तेनचसुरतांतंसूचितं।तदुक्तं॥अं
गेस्वेदःश्रथत्वंचकेशावस्त्रादिसंपत्तिः।जातेच्युतिसुखेनार्याविरामेछांचजायत
ति।कीदृशीरतिरणेसुरतसंग्रामेधीरास्थिराचतुरावा।लवकेशकणाणवश्त्यमर
ःसुभगःसुंदरश्चेतिविश्वःतथाचसप्तनिःपदैःनायकस्यनैरपेक्षेणैवनायिकाया
ःक्रियाकथनात्पूर्वोक्तंन्यूनगुणत्वमेवसिद्धमितिभावः॥श॥श्रीजयदेवेति॥ ॥श्री १५६

जयदेवभणितहरिरमितं।कलिकलुषंजनयतुपरिशमितं॥ध॥ ॥श्रीजयदेव
कवेःभणितंयत्श्रीहरेःरमितंक्रीडितंतत्कलेःकलियुगस्यकलुषंपापंहरि
भजनवैमुख्यरूपंव्यथतिगायकानांश्रोतृणांचपरिशमितंजनयतुनिःशेषेण
शांतिंजनयतु॥ध॥ ॥संप्रतिचंद्रोदयमधिकतरंव्यथयतीत्याह॥ ॥विरहीपांडु
ति॥ ॥विरहपांडुमुरारिमुखांबुजद्युतिरयंतिरयन्नपिवेदनां।विधुरतीवतनो
तिमनोभुवःसुहृदयेहृदयेमदनव्यथां॥४७॥ ॥अयेशतिविषादे।अयंदृश्यमा
नश्चंद्रोममहृदयेमदनव्यथांकामपीडांअतीवाधिकांतनोतिविस्तारयति।की
दृशःविरहेणमद्विश्लेषेणपांडुधूसरंयन्मुरारेःकृष्णस्यमुखांबुजंवदनकमलंतस्य

द्धतिरिवद्धतिर्यस्यताहशाः।मदनव्यथाकथंचिन्मह्यतेपांडुतन्मुखस्मरणादुःसह
थाजायतइतिभावः।किंकुर्वत्वेदनांज्ञानमपितिरयन्नतिरोदितंकुर्वन्चंद्रस्तद
पराधमपिविस्मार्यचेतनोन्मूलनमपिकरोतीत्यर्थः।व्यथाजनकत्वेहेतुमाह।मनोभु
वःकामस्यसुहृन्मित्रंचंद्रस्येश्वरमनोजन्यत्वेनकामस्यचमनसिजत्वेनसोदरत्वेन
मयिह्लुब्धस्यकामस्यसाहाय्यंचिकीर्षताचंद्रेणव्यथाजन्यतइतिभावः।चंद्रमामन
सोजातइतिश्रुतिः।वेदनाज्ञानदुःखयोः।अयेक्रोधेविषादेचसंबुधौस्मरणेपीति
विश्वः।तिरोंतर्धौतिर्यगर्थइतिच।तिरयन्प्रकटीकुर्वन्मुदधेःसारंसमुद्धरन्नितिर
त्नकोशात्।वेदनांतिरयन्प्रकटीकुर्वन्इतिवा।यमकालंकारश्चात्र।तदुक्तंदंडिना १५७

।एकद्वित्रिचतुष्पादैर्यमकानांविकल्पना।आदिमध्यांतमद्याद्यंतसर्वतइति।पद्म
द्येप्येवंतथापिद्वितीयेव्याख्यानांतरंतदायेइतिस्मरणेयेरुस्मरामियत्कृत्तेनम
यैवक्रीडितमितिवेदनांदुःखंतिरोदितंकुर्वन्नपिकिंनुसंप्रतितंनपश्यामीतिमनो
भुवःसुहृत्मांव्यथयतीत्यर्थः।४९।पूर्वगीतेनकस्याश्चिन्मणंनिरूप्येदानींस्वाधी
नभर्तृकांतांस्वमनोरथेनैववर्णयति।।समुदितेति।। ।।समुदितमदनेरमणीवदने।
चुंबनवलितांधरेमृगमदतिलकंलिषतिसफुल्लकंमृमिवरजनीकरे।।१।।रमतेयमु
नापुलिनवने।विजयिमुरारिरधुना।।ध्रुवपदं।।गीतस्यास्यगुर्जरीरागः।एकतालो
तालः।गीतार्थस्तु।विजयीमंडनादिकोन्यजनसर्वातिशायी।निःशंकइतिवा।तद्गुणैर्न

पराभूतोवा।मुरारिरिति।तद्वधकाकार्कश्येनरत्यभावंसूचयति।पद्मांतरेमुरारिप
देनसामर्थ्येननिर्नयक्रीडनं।मुरप्रतिवेष्टयतिनारीस्वनुज्ञास्मामितिपुनरपिरतोऽमु
कत्वंवा।अधुनासांप्रतंयमुनापुलिनवनेयमुनायाःसैकतेयद्वनंतस्मिन्रमतेक्री
डति।अनेनसंभोगश्रमहरणभोगयोग्यदेशसंपत्तिर्दर्शिता।ध्रुवपदं।क्रीडामाह।
रमणीवदनेरम्यतेऽस्यामितिरमणीतस्याःमुखेसपुलकंरोमांचसहितंयथास्यादेव
मृगमदतिलकंकस्तूर्याःविशेषकंलिखति।नानावैचित्र्यानिर्मिति।कीदृशेवदने।स
मुदितःसम्पयुक्तोऽनुकूलनायककरस्पर्शेनिकामोयत्रतादृशे।अथवा।हृल्लस्प
समुदितोमदनोयस्मात्तादृशे।पुनःकीदृशे।चुंबनायाधरपानायवलितःसंमुखी १५८

हृत्संकोचितःहृल्लेनतयैववातन्मुखचुंबनायाधरोयत्रतादृशे।अथवा।चुंब
नायहृल्लेनवलितःसेवितःसिंदूररेषादिरचनव्याजेनचिरमुपासितोऽधरोय
त्रतादृशे।चुंबनायबज्जदैन्येनयाचितोवा।वलितंयाचितेस्याहलितंसेवितेऽपि
चेतिविश्वः।कस्मिन्नकमिवा।रजनीकरेमृगमिवा।शूर्म्मचंद्रेहरिणमिवा।कीदृशेचं
द्रे।समुदितोमदनोमनोयस्मात्तादृशे।अतःश्वंडदर्शनादमृतमिवाधरपानेप्रवृ
त्तिरपि।अत्राह्लादकारिमुखेस्यालंकसामीप्यंनजमानस्यनिशाकरसाम्यं।कस्तू
रीतिलकस्यचमृगसाम्यं।प्रथमपक्षेसमुदितमदनेचुंबनवलिताधरइत्यनेन
तस्याःभावोद्रेकःकथितः।नन्वनायिकस्येतिकटाक्षितं।रजनीकरसादृश्येनापिन्ना

नायाः नस्थैर्यमिति। नित्यमेव श्रीराधायामानुकूल्येन स्थिरानुरागत्वात्तस्या एव
प्रतिक्षणं सौभाग्यस्य शोभायाश्च वृद्धिः॥१॥ किंच॥ घनचयेति॥ ॥घनरुचिरे रचय
ति चिकुरे तरलिततरुणानने। कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने॥
२॥ तस्याः चिकुरे केशपाशे जातावेकवचनं॥ कुरुबककुसुमं पीतपुष्पविशेषं झिंटी
ति पर्यायं अम्लानशोणपुष्पं वा रचयति। यथा विन्यासमर्प्पयति। कीदृशे। चिकुरे। घ
नचयरुचिरे। मेघपटलवन्मनोहरे। पुनः कीदृशे। रतिपतिः कामः। स एव मृगः क
रीतस्य कानने निवासवने। अस्य काननस्योद्दीपनविभावत्वेन कामोपि कामभय
माशंसमानः स्त्रीसहित एव केशबंधनपाशे निबद्ध इवात्र तिष्ठतीति रतिपतिपदो

पादानं। पुनः कीदृशे। तरलितं चंचलीकृतं तरुणाननं तरुणश्रेष्ठः श्रीकृष्णो येन का
मोद्बोधेनेत्यर्थः। तादृशे। तरलितं विविधोपमोत्प्रेक्षाभिस्तद्गुणवर्णनेन मुखरीकृतं
तरुणस्य नित्यकिशोरस्याननं मुखं येनेति वा। काननस्य विशेषणे वा योज्यं। तदात
रलितान्युद्भूतानि तरुणानां बालवृक्षाणां पुष्पादिरूपाण्याननानि यस्मिन् तादृशे॥
कामोद्बोधकत्वात्। पुष्पविकाशाच्च ग्रथितं कुसुमैः केशैः साम्यं च युक्तं। कीदृशं कु
सुमं। चपलाया विद्युत इव शोभातिशायिता यस्य तत्रूपकालंकारश्चात्र। अन्यना
यिकारमणपक्षे रचयतीत्यनेन तत्केशादिगुंफने करकंपाद्यनुत्पत्त्या नायकस्य
तस्यामनासक्तिरिति ध्वनितं। तद्यथा। मा गर्वमुद्वह कपोलतले च कास्ति कृष्णस्वहस्त

लिखितानवमंजरीति।अन्यापिकिंनसखिभाजनमीदृशीनां।वैरीनचेद्भवतिवेप
थुरंतरायः।इति।मृगःपशौकुरंगेचकरिनक्षत्रभेदयोरितिविश्वः।काननंविपिने
गेहेपरमेष्टिमुखेपिचेति।चिकुरंचंचलेकेशेगृहेवभ्रुभुजंगयोरिति।कुसुमंफल
पुष्पयोरिति।सुषमापरमाद्युताविति।चिकुरःकुतलेवालःकचःकेशःशिरोरुहइ
त्यमरः॥२॥अपिच।घटयतीति॥ ॥घटयतिसुघनेकुचयुगगगनेमृगमदरुचि
रूषिते॥मणिसरममलंतारकपटलंनखपदशशिभूषिते॥३॥ ॥कुचयुगमेव
गगनंतस्मिन्नमलंनिर्मलंमणिसरंमुक्ताहारं।तदेवतारकपटलंनक्षत्रसमूहंघट
यति।योजयति।आकाशस्थितशोभामत्रनिर्माति।कीदृशे।सुघनेसुतरांपीनेअति

कठिनइत्यर्थः।पुनःकीदृशे।मृगमदस्यकस्तूर्य्याःरुचिःदीप्तिस्तयारूषितेव्याप्ते
पुनःकीदृशे।नखपदंनखांकःसएवशशीतेनभूषितेऽलंकृते।नखक्षतंचेदमर्द्धे
दुसंज्ञंबोध्यं।तदुक्तंपंचसायके।अर्द्धेंदुसंकाशमिदंनखज्ञैरर्द्धेंदुसंज्ञंकथितंसमा
सात्।कक्षानितंबस्तनपानपार्श्वकंठेदातव्यमेतत्करजंसदैवेति।अतोत्रशशिप
दनप्यर्द्धचंद्रपरं।गगनपक्षेपि।कीदृशेगगने।सुघने।अतिविस्तारवति।अभूतोप
मार्थंशोभनाघनामेघायस्मिन्नितिवा।पुनःकीदृशे।मृगमदकांतिशोभिते।चंद्रार्द्धैश्चा
लंकृते।विमलतारकपटलंचयत्रैवंकविसंप्रदायेआकाशस्यश्यामत्वेनैवनिरूप
णात्संगरूपकालंकारत्वमत्रज्ञेयं।घनःसांद्रेदृढेदार्ढ्येविस्तरेलोहमुद्गरे।इतिविश्वः।

गुणितरूषितेइत्यमरः।कुचयुगयोर्गगनमिवगगनमितिकेचित्।तदासुघनेशो
भनविस्तारवतिअन्यत्समानं।३।जितविशेति॥ ॥जितबिशशकलेमृदुभुजयुगले
।करतरनलिनीदले।मरकतवलयंमधुकरनिचयंवितरतिहिमशीतले॥४॥मृदु
भुजयुगलेतस्याःकोमलेबाहुयुगलेमरकतवलयइंद्रनीलमणिकंकणंतदेवम
धुकरनिचयंभ्रमरसमूहंवितरतिअप्यायतिकीदृशे।भुजयुगलेनिजमार्द्दवेन
गौरतयाचजितमभिभूतंबिशशकलंमृणालखंडंयेनतादृशेकरतलमेवनलि
नीदलंपद्मिनीपत्रंयत्रतादृशे।पुनःकीदृशे।हिमशीतले।संतापहरत्वात्।यद्यपि
कविसंप्रदायेक्वापिकरतलस्यपद्मिनीपत्रत्वेनवर्णनं।नास्ति।तथाप्यत्रभुजस्य

विशरूपत्वात्।नविरुद्धमिति।किंचामकरंदाधिक्यादिवमृणालदंडेएवभ्रमरंमं
डलीस्थितेतिभावः।नलिनीपद्मिनीपद्मव्योमसिंधुसरोवरेइतिविश्वः।मरकतोनी
लमणिरिति।कंकणेवलयोमतइतिधरणिः।विश्राणनंवितरणंदानंचप्रतिपादन
मित्यमरः।रूपकालंकारोयं॥४॥रतिगृहेति॥ ॥रतिगृहंजघनेविपुलायघनेमनसि
जकनकासने।मणिमयरसनंतोरणहसनंविकिरतिकृतवासने॥५॥रतेशृंगाररस
स्यगृहेआश्रयेजघनेमणिमयरसनंमुक्तामयींमेखलां॥विकिरतिक्षिपति।अत्रवि
कीरतीत्यनेनकांचीबंधनसमयेश्रोणीस्पर्शजनितसाध्वसवकात्कंपमानकरःक्षि
पतिनतुबध्नातीतिध्वनितं।कीदृशेजघनेविपुलापघने।विपुलोविस्तीर्णोऽपघनोऽव

यवोयस्यतादृशो।अतिमांसलइत्यर्थः।अथवा।विपुलंमद्दलयुक्तंअपगतोघनःकावि
न्यंयत्रतदपघनंकोमलंतच्चतच्चतत्रथातस्मिन्मद्दलसौकुमार्ययुक्तेइत्यर्थः।विशि
ष्टंपुलंपुलकोयस्मिन्सविपुलस्तादृशोऽपघनःशरीरंयस्येति।उद्दितसात्विकविका
रेइति।वा।पुनःकीदृशे।मनसिजकेनकासने।कामस्यसुवर्णमहाराज्यपीठे।कीदृशं
मणिमयरसनंतोरणास्यमांगल्यस्रजःदसनमुपदासोयस्मात्तादृशं।अन्योपियदा
सिंहासनउपविशति।तदातत्रपरिजनैर्वंदनमालिकाबध्यते।तोमनसिजसिंहासनी
भूतेतस्याजघनेक्षुद्रघंटिकारूपमांगल्यस्रजमयंनिबध्नातीतिन्यायः।पुनःकीदृशेजघ
ने।ह्रतंवासनंतदनुरूपसाटिकादिवस्त्रंयत्रतादृशे।ह्रतंवासनंश्रीकृष्णवशीकरणा। १६२

यश्रृंगारशास्त्रोक्तधूपविशेषोयत्रेतिवा।अथवाह्रतातत्कांतिदर्शनात्श्रीकृष्णेनवा
सनानोगेछायस्यतादृशे।अथवाह्रतंवासनंकामेनस्थानंयत्रतादृशे।यद्यपिमनसि
जकासनेनैवकामस्थानत्वंप्राप्तंतथापितित्यंतत्सान्निध्यसूचनायैतदुक्तं।अंगप्रती
कोऽवयवोऽपघनोथकलेवरइत्यमरः।वासनंवस्त्रनेयाथस्थानेज्ञानेवधूपनेइति।
विश्वः।विपुलंस्यात्पुलकेचेति।रतिःकामस्यभार्यायांस्यात्रागेसुरतेपिचेतिरूपका
लंकारः॥५॥चरणेति॥ ॥चरणकिशलयेकमलानिलयेनखमणिगणद्युजितेाब
हिरपवरणंयावकनरणंजनयतिहृदयोजिते॥६॥ ॥चरणकिशलयेचरणएव
किशलयंताम्रत्वात्कोमलत्वाच्चातत्रपदपद्मवेयावकनरणंअलक्तकद्वरणंक

रोति।कीदृशे।कमलायाःश्रियोनिलयेआश्रयेकांत्याःनिवासेइत्यर्थः।पुनःकीदृशे।
नखाएवयेमणिगणामणिसमूहास्तैःपूजिते।श्रीनंदनस्यकुःप्राप्यतयाश्रीःस्वि
हृषिरूपानिर्मणिनिस्तस्त्रियाचरणंसंपूज्यात्मानंनवत्समर्पणायतच्चरणासौंदर्य्ये
लीनाबभूवेतिभावः।कीदृशंयावकभरणं।बहिर्भूतमपवरणंसंवरणंयस्यताद
शंस्पष्टमित्यर्थः।चरणस्यस्वभावरक्तत्वान्नावरकमितिवा।पुनःकीदृशेचरणकि
शलयेहृदियोजिते।स्ववक्ष्यमानुरागातिशयेनयोगंप्रापिते।स्वहृदयेतच्चरणप
द्मवंनिधाययावकंरचयतीत्यर्थः।अथवा।किंभूतेहृदिकमलायाःनिलये।गृहे।
पुनःकीदृशे।नखानखक्षतानितान्येवमणिगणास्तैःपूजितेभूषिते।श्रियायुक्तेपिच्च १६३

दितदीयचरणंधारयतीतितस्याःसौंदर्याधिक्यंसौभाग्यातिशयंचकथितमिति
भावःपक्षांतरेकमलायाःवरस्त्रियाःश्रीराधायाःनिलयेनिवासेतथाचतन्नखक्ष
तयुक्तेवक्षसिस्वयमेवालक्तकरचनायायोजिते।दाक्षिण्येनयावकरागंजनयति
सामान्यतःकरोतिनतुचित्रादिरचनेनातोबहिर्भूतमपवरणमितस्ततःस्खलित
मित्यर्थः।चरणकिशलयेनखमणिगणपूजितइत्यत्रकिशलयमणिगणयोःपर
स्परयोगादयुक्तंनामरूपकमिति।नखःकररुहेसौंडेगंधद्रव्येनखंमतश्चतिवि
श्वः।हारमयतीति॥ ॥रमयतिसुभ्रूरंकामपिसुदृशंखलदलधरसोदरेकिमफिल
मवसंचिरमिहविरमंवदसखिविटपोदरे॥७॥ ॥एवंकामपिसुदृशंशोभनेदृशौनेत्रे

यस्यास्तां।खलोदुर्जयोनोहलधरसोदरोबलभद्रस्यभ्रातातस्मिन्सुभृशमतिशये
नरमयतिसति।हेसखिवदकथयइहविटपोदरेकुंजमध्येविरसंरससहितंयथास्या
त्तथाऽतएवाफलंचयथास्यादेवंचिरंबहुकालंव्याप्यकिंकिमित्यवसंस्थितास्मीत्यर्थ
ःहलसोदरइतितंग्राम्यत्वेनोपालभते।विटोद्रौलवणेधूर्त्तेमूर्खकेखदिरेपिचेतिविश्वः
अथवा।इहविटपोदरेविटपोतिधूर्त्तस्तादृशस्यैवोदरमभ्यंतरंयस्यतस्मिन्नेवंविधधू
र्त्तनिमित्तसप्तमीयमिहस्थलेविरसमफलंचचिरंकिमित्यवसमित्यर्थः।पक्षांतरेसप्त
भिःपदैःसख्योक्तमिदमित्यपिव्याकुर्वंति।तदाकामपिसुदृशंराधाभिधां।खलहल
धरसोदरेखलानांनिग्रहायहलरूपमायुधंधारयतीतिखलहलधरोबलभद्रस्तस्यभ्रा

तरिदुष्टदमनसमर्थबलवतीत्यर्थः।विटपादरचतुरचूडामणौरसयतिसति।इहव
नेकिमफलंविरसंवावसमपितुसफलंसरसमेवेत्यर्थः।निर्भयकलिसंपादनायहल
धरसाहचर्यमितिध्वनितं॥७॥इहेति॥ ॥इहरसभरणनेकृतहरिगुणनेमधुरिपुप
दसेवके।कलियुगचरितंनविशतुदुरितंकविनृपजयदेवके॥८॥इहएतत्काव्यकर्त्त
रिकवीनांनृपेजयदेवेकलियुगेचरितमाचरितंकलियुगेनचरितंकृतंवानवसतुन
तिष्ठतुकीदृशे।रसस्यशृंगाररसस्यभणनंकथनंयस्यतादृशे।पुनकीदृशे।कृतंहरे
र्गुणनंचिंतनंयेनतादृशे।मधुरिपोःकृष्णस्यपदसेवकेदुरितध्वंसनसामर्थ्यद्योतना
यमधुरिपुपदोपादानं॥८॥नायातइति॥ ॥नायातःसखिनिर्दयोयदिशवस्त्वंइतिकिं

दूयसे स्वछंदं बहुवल्लभः सरमते किं तत्र ते दूषणं॥ पश्याद्य प्रियसंगमाय दयितस्या
कृष्यमाणं गुणैरुत्कंठार्त्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति॥५०॥ ॥हे दूति दौत्य
कर्मकुशले निर्दयोदयारहितोऽत एव शठः कृतगूढमपराधो यदि नायातः तर्हि त्वं
किं दूयसे किमिति दुःखिता भवसि। केवलं शठो न भवति किं धृष्टोपीत्याह। स्वछंदमि
ति। स बहुवल्लभोऽनेकनारीप्रियोऽत एव स्वछंदं निःशंकं रमते। यया कयाचिद्गोपिक
या सह केलिं करोतीत्यर्थः। तत्र तस्मिन्नर्थे ते तव किं दूषणं न किमपीत्यर्थः। न तु क्षणं
समास्वसि हि यावत्पुनरपि तदंतिकं गत्वा तमानयामीत्यत आह। पश्याद्येति। अद्येदा
नीमेवाश्चर्यं पश्य प्रियस्य कृष्णस्य आद्य प्रियस्येति वा। संगमाय मिलनायेदं मम चे। १६५

तोंतःकरणं स्वयं स्वयमेव न तु यत्नेन यास्यति। गमिष्यति। कीदृशं। यदि तस्य प्राण
कोटिवल्लभस्य गुणैः सौंदर्यादिभिराकृष्यमाणं बलान्नीयमानं। अपरमपि गुणैर
ज्जुभिराकृष्यमाणं बलादन्यत्र नयन इति भावः। कीदृशं उत्कंठार्त्तिभरादिव स्फुटत्।
उत्कंठा अत्सुक्यं आर्त्तिः पीडा तयोर्भरातिशयस्तस्मादिव स्फुटत् प्रकटीभवत् बहि
र्भवदित्यर्थः। अपरमपि वस्त्वंतरसंकुले स्थाने स्थितं वस्तु सांप्रतिकार्यात् बहिर्भव
तीति स्फुटत् विदलदिति वा। अन्योपि भाराक्रांतः विदीर्य्यत एव। अतः परदुःखं सोढुं
मसक्ततया तद्गुणानेव स्मरंत्या प्राणा एव त्याज्यास्ततोंतेयामतिः सा गतिरिति। स्व
यमेव चेतस्तत्र यास्यतीति किमतः परं तव तत्र गत्या यासेनेति भावः। अत्र प्रथमप

देशठोनायकः।स्वछंदइत्यादिनाधृष्टस्तदुभयलक्षणं।शठोगूढापराधकृतधृष्टोव्यदृ
ष्टोव्यक्तान्ययुवतीभोगलक्ष्मापिनिर्भयइतिइयंतुणप्रेयसंरंभोक्तिः।सतुश्रीवृंदाव
नेश्वर्यामेनुकूलएवनित्यंतदग्रेप्रकटयिष्यति।क्रीतेदासइवोपसेवितपदांभोजइ
ति।अत्रोत्प्रेक्षानामालंकारश्च।५०।संप्रतिकृष्णेनसहरममाणायाःसौभाग्यसुखेत
द्विरहितायाश्चसंतापमष्टपद्याकथयति।अनिलेत्यादिना॥ ॥अनिलतरलकुवलय
नयनेनपततिनसाकिशलयशयनेन।१।सखियारमितावनमालिना॥ध्रुवपदं॥गी
तस्यास्यदेशाखरागोरूपकतालः॥गीतार्थस्तु॥हेसखियावनमालिनाश्रीकृष्णेनरमि
ताक्रीडता।साकिशलयशयनेननवपल्लवश्ययानपतिनोपतप्ताभवति।कृष्णांग

संगेतत्सुखप्रदमेवभवतीतिभावः।अथवा।यावनमालिनारमितासाकिशलय
शयनेनतर्पतीतिनापितुतपत्येवेतिकाक्वाशिरश्चालनेन।अननुभूतविषयत्वा
न्न।तपतीतिवायाचरमितासाद्भुततत्प्रणयोत्कठयापुनःपुनःसंगमतृष्णयाकि
शयलेनेननतपतीतिनापिरूपतप्ताभवतीत्यर्थः।उक्तंच।चलसियद्व्रजाच्चारय
न्पशून्नलिनसुंदरंनाथतेपदं।शिलतृणांकुरैःसीदतीतिनःकलिलतांमनःकांतग
छति।१।दिनपरिक्षयेनीलकुंतलैर्वनरुहाननंबिभ्रदावृतं।घनरजस्वलंदर्शयन्मुहु
र्मनसिनःस्मरंवीरयछसीति॥२॥कीदृशोनवनमालिना।अनिलेनवायुनातरलंचं
चलंयत्कुवलयंतद्वन्नयनेयस्यसतथातेन।अनिलवत्तरलेकुवलयवच्चसुंदरेनयने।

यस्मेतिवा।वनमालित्वपदेनशृंगारित्वमुपपादितं।अथवावनमायाःवृंदावनलक्ष्मा
ऽऽलिनाश्रीराधायाःतद्वनस्यवरमास्वादलंपटेनभ्रमरेणेत्यर्थः।अनेनयाकाचित्
कदाचितरमिताऽरमिताचसातपत्येवतस्यामेवानुकूलत्वान्नित्यमितिध्वनितं॥१
अपिचाविकसितेति॥ ॥विकसितसरसिजललितमुखेनास्फुटतिनसामनसिज
विशिषेन॥२॥यावनमालिनारमितेतिसर्वत्रयोज्यं।सामनसिजविशिषेनकाम
बाणेननस्फुटति।विद्धानभवतिअन्यदपिपतिपदंद्रष्टव्यंतज्ज्ञेयं।कीदृशेनविक
सितंप्रफुल्लंयत्सरसिजंपद्मंतद्वल्लितंमनोहरंमुखंयस्यातेना।मनसिजविशिषेन
तन्मुखपद्मेनकामबाणपीडानिवृत्तिरितिसाश्चर्यंनिरूपयतीतिभावः।अन्यद्व १६७

र्थेषूचितमेवा३।किंचाअमृतेति॥ ॥अमृतमधुरमृदुतरवचनेनज्वलतिनसामज
यज्ञपवनेना३॥ ॥यारमिता।सामलयज्ञपवनेनमलयाजातेनवायुनाज्वालति
नदीप्यते।कीदृशेनअमृतादपिमधुरंमृदुतरमतिशयेनकोमलंवचनंभाषणंय
स्यतेनातदुक्तंमधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयाशुष्करेक्षणविधिकरीरिमा
वीरमुद्यतीरधरसीधुनाप्यायय्यस्वनःइतियथावा।पर्याचितामृतरसानिपदार्थे
संगीतादिकर्मामृतौचंदनतरुसर्पसंपर्कसविषपवनज्वालादहणायवचनस्यामृ
तत्वेननिरूपणंतथाचानेनप्रियंवदत्वंनायकगुणःकथितः३।स्थलेति॥ ॥स्थल
जलरुहरुचिकरचरणेन।जुगतिनसादिमकरकिरणेन॥४॥ ॥यारमिता।सादिम

करस्यचंद्रस्यकिरणेननलुठति॥तप्तांगीभूमौपरिवर्त्तनंनकरोति।कीदृशेनस्थलो
द्भवं।जलरुहंकमलंतद्वद्रुचिर्ययोस्तादृशौकरौचरणौचयस्यतेन।स्थलरुहजल
रुहयोस्तादृशाविति वा॥सजलेति॥ ॥सकलजलदसमुदयरुचिरेण॥दलतिनसा
हृदिविरहभरेण॥५॥यारमितासाहृदिहृदयेविरहभरेणवियोगाधिक्येननदल
ति।कीदृशेन।सजलोजल।सहितोयोमेघस्तस्यसमुदयःसम्यगुदयस्तद्वत्रुचिरेण
मनोहरेण।अनेननित्यनवीनत्वंस्पृहणीयत्वंसंतापहारित्वंस्निग्धत्वमाप्यायनक
रत्वंरसमयत्वंचभगवद्रूपस्यकथितमितिभावः॥५॥कनकेति॥ ॥कनकनिक
षरुचिशुचिवसनेनश्वसतिनसापरिजनहसनेन॥६॥यारमितासापरिजनानां।

हसनेनोपहासेनपरितःसर्वतोजनानांहास्येनवानश्वसति।संतापनिश्वासनंमुं
चति।कीदृशेन।कनकनिकषःसुवर्णकषपट्टिकातत्रगतलेखायाइवरुचिःकाति
र्यस्यतत्तादृशंशुच्यनुपहतंचवसनंवस्त्रंयस्यतेन।अत्रकनकपदेनैवपीतत्वेप्रा
प्तेजलादिसंपर्केपिचाकवक्यमानन्वाम्लानत्वप्रदर्शनायनिकपदोपादानं।नकंकषः
कनकाश्मातद्वद्रुचिर्यस्य।शुचीनिशृंगारमयेवसनेयस्य।कनकनिकषरुचिश्वासौ
शुचिवसनश्चतेनेतिवा।शृंगारःशुचिरुज्वलःइत्यमरः।शृंगारमयत्वेनप्रियारूपसा
दृश्यात्शामशरीरशोभोचितपीतांबरेणेत्यर्थः।निकषःकषपट्टिकेतिहारावली
।शुचिःशुद्धेऽनुपहतेचेतिविश्वः॥६॥सकलेति॥ ॥सकलभुवनजनवरतरुणेन।वहति

नि

नसारुजमतिकरुणेना॥७॥यारमितातिकरुणेनातिशायितकरुणारसेनोपलक्षि
तासतीरुजंतद्विश्लेषजन्यांव्याध्यवस्थांनवहतिनधारयति।कीदृशेना।सकलभु
वनेषुसर्वलोकेभ्येजनायुवनास्तेभ्योवरतरुणेनांशुतलावण्यवत्निस्वकिशोरे
णेत्यर्थः।अथवा।कलयाकांत्यासदृवर्त्ततेतिसकलाभुवनजनायस्मात्तेनवरतरु
णेना।तउक्तं।स्वमूर्त्यालोकलावण्यनिर्मुक्तेति।यन्मूर्त्तिसौंदर्यजेशातोऽन्येपिसुंदरा
इत्यर्थः।अथवा।सकलंशोनंचतद्भुवनंवैऊंगारंयंतत्रजनस्तदीश्वररुस्तेणवयसा
प्रसिद्धस्तस्मादपिसौंदर्यादिनावरतरुणेना।तउक्तं।स्वस्यापिविस्मापनमिति॥ता
रुणंचात्रमध्यमंकैशोरमेवउरुवयस्यबधोश्चकापिश्रीरुरसस्तथा।मूर्त्तिर्मधुरिमा १६ए

द्यंचकैशोरेसतिमध्यमे।तन्माधुर्य्ययथा।वनंधनुरिवातनोर्नटद्घधिषोऽन्त्रयुगं
शराजिरिवशोणितानखराजिरग्रेखरा।विराजितशरीरिणीरुडिवदंतजेखारुणा
नकात्रसखिसमीक्षणाद्भवतिरस्यवित्रस्यतीति।गोलोकत्वेनप्रसिद्धत्वाद्व्रजरूपे
भुवनेरामश्रीदामसुबलादिन्योपिवरतरुणीतिवा।अतिकरुणेनेतिश्लक्ष्णस्यविशे
षणंवा।तदाप्रथमपक्षेऽतिकरुणेनातिस्निग्धेनपरमरसावहनेत्यर्थः।द्विती
येत्वतिक्रांताकरुणादयायस्यतादृशेननिर्दयेनेत्यर्थः।सर्गारंभोयत्सद्दयंप्रतिज्ञा
तंतयोप्रथमेचतुर्विधमपिधोरंक्तिः।द्वितीयेतद्बोधायकस्याश्चित्रख्याउक्तिरपिसं
भवति।सप्तभिःपदैरिति।हेसखित्वमेवस्वाधीनपतिकातेनरमितावतवप्रियःपा

र्थएववर्त्ततेकिमितिविरहार्त्तेवविलपसि।यात्वरमितासाएवंकरोतु।रमितायाएवं
प्रेमपराक्रमउचितइतिवा।यात्वरमिता।तस्यास्तदास्वादरहितायाएवंनघटतएव
।७।श्रीजयदेवेति॥ ॥श्रीजयदेवभणितवचनेनप्रविशतुहरिरपिहृदयमनेन॥८
अनेनश्रीजयदेवभणितेनश्रीराधायाःवचनेनतत्सख्याऽवा।तद्वचनमेवजयदे
वभणितेमित्यर्थः।तेनहरिरपिहृदयापहार्य्यपिहृदयंप्रविशतु।प्रियजनानांम
नसि।श्रीराधावक्षसीतिवा।हरिरद्भुतविक्रमोवाऽवश्यपिरुद्धोभवन्वित्यर्थः।संकटे
प्रविष्टस्यनिर्गमाभावात्॥८॥१६॥संप्रतिपुनःस्मरशरहतामलयानिलमुपालभ
ते।मनोभवेति॥ ॥मनोभवानंदनचंदनानिलप्रसीदरेदक्षिणमुचवामतां।क्षणंज

गत्प्राणनिधायमाधवंपुरोममप्राणहरोभविष्यसि॥५१॥हेचंदनानिलचंदनसं
बंधीवायोप्रसीदप्रसादंकुरु।हेदक्षिणसर्वेषांविलासिनीमनुकूलश्चभाववामतांप्र
तिकूलतांमुंचत्यज।चंदनसंसर्गिणस्तेसत्संगरतस्यदक्षिणस्वभावत्वान्नवक्रत्वमुचित
मितिभावः।अथवारेदक्षिणप्रसीद।नचेत्प्रसीदसितर्हिवामतांमुंच।ननुमयिवामत्वं
नास्तीत्यतआह।हेमनोभवानंदन।मनोभवंकाममानंदयतीति।तदुद्बोधेनैवमत्प्रा
तिकूल्यमाचरसीत्यर्थः।यदिचवामतामपिनमुंचसि।तदाहेजगत्प्राणजगतांजीवा
तोक्षणमात्रंमाधवंपुरोग्रेनिधायकृत्वापश्चान्ममप्राणहरोभविष्यसि।जगत्प्राणे।
तितस्यानयनेस्वस्यचप्राणहरणेसामर्थ्यद्योतित।माधवंपुरोनिधायेतिदुस्त्यजश्री

कृष्णप्रणयाज्जीवनमेवप्रार्थना॥तत्प्राप्त्याजीवनमेवभविष्यतीतिभावः।अन्योपभु
क्तस्याग्रेप्राप्तेक्षणमपिप्राणानस्थास्यंतीतिवा।कमनीयत्वेनचांचल्येनचमाधवमित्यु
क्तं।दक्षिणस्यवामत्वंजगत्प्राणस्यप्राणहरत्वमिति।विरोधनामालंकारश्च।वामंप्रती
पेसुंदरेच।दक्षिणःशरलावामपरछंदानुवर्त्तिष्विति।५१।रिपुरिति॥ ॥रिपुरिवसखी
सवासोयशिखीचहिमानिलोविषमिवसुधारश्मिर्यस्मिन्दुनोतिमनोगते।हृ
दयमदयेतस्मिन्नेवंपुनर्वलतेबलात्कुवलयदृशांवामःकामोनिकामनिरंकुशः॥
५२।अधुनाममैवायमपराधोतान्यस्येत्याह॥यस्मिन्कृष्णेमनोगतेचित्तारूढे
यंसखीसंवासः।सखीभिःसहावस्थानंशत्रुरिवदुनोत्युपतापयति।पुनःपुनःत

स्मिन्नेवयोजनात्।अयंचहिमानिलःशीतलवायुरपिशिखीवाग्निरिवदुनोति॥
सुधारश्मिश्चंद्रोविषमिवकालकूटमिवदुनोतिएवमनेनप्रकारेणस्वयंपरेभ्यश्च
व्यथाप्रथयित्वात्।अदयेदयारहितेतस्मिन्तादृशेनिर्दयत्वान्नामग्रहणायोग्येऽ
तएवयत्तत्पदेनसूचितपतिभावाद्वा।हृदयमंतःकरणचतुष्टयंपुनर्भूयोपिब
लाद्वलतेनिवार्यमाणमपिहठात्तत्रैवगछतीत्यर्थः।अतःकुवलयदृशांकमलन
यनाकामःकंदर्पोनिकामनिरंकुशोऽतिशयेनत्यक्तमर्यादोऽतएववामःप्रतिकू
लः।अन्योन्यापुरागेहिकामोमनोहरोभवत्यत्रतुसमयिसानुरागःकेवलंममैव
चेतस्तत्रधावतीति।वामता।कामस्येतिभावः।अथवायस्मिन्गतेऽन्यत्रस्थितेसति

सखीनांसंवासोरिपुरिवमनोदुनोतीत्यादियोजना।सखीनांरिपुवत्हिमालस्यव
ह्नित्सुधारश्मेर्विषवदितिविरुद्धमितिविरोधालंकारः।यमकालंकारश्चात्रशिखि
नौवह्निबर्हिणावित्यमरः॥५२॥बाधामित्यादि॥ ॥बाधाविधेहिमलयानिलपंचबा
णप्राणान्गृहाणनगृहान्पुनराश्रयिष्ये।किंतेकृतांतभगिनीक्षमयातरंगैरंगा
निसिंचममशाम्यतुदेहदाहः॥५३॥ ॥हेमलयानिलमलयशैलसंबंधिवायोबा
धांपीडांविधेहिकुरु।अत्रमलयानिलपदेनउत्तमाश्रित्यस्यतेयाचकप्रत्याख्या
नंनोचितमितिध्वनितं।हेपंचबाणकाममममप्राणान्गृहाणपंचभिर्बाणैःपंचानाम
पिप्राणानांग्रहणंकामस्यसुकरमितिसूचनयापंचबाणेतिसंबोधनं।ननुग्रहमे

वकिमितिनगच्छसीत्यतआह।गृहंपुनःभूयोनाश्रयिष्येनयास्यामि।तेनविनागृ
हमपिमेसंतापंकमेवभविष्यतीतिभावः।हेकृतांतभगिनियमस्वसस्तेक्षमयाशां
त्याकिंप्रयोजनमित्यर्थः।तरंगैःकल्लोलैःसमांगान्यवयवान्सिंवाज्ञावयविरहा
नलजन्यदेहदाहःशाम्यतुनिवर्त्तमां।मत्प्राणैर्भ्रातुर्यमस्यहितमाचरेति।भावःकिं
चनिर्दयस्यस्वसस्तेदयानयुक्तेतिख्यापनायकृतांतभगिनीतिपदोपादानं॥भ
गिनीस्वसेत्यमरः।सम्मोहनःक्षोभणश्चदहनःशोषणस्तथा।उच्चाटनश्चकामस्य
बाणाःपंचप्रकीर्त्तिताइति॥५३॥सर्गांतेकविराशिषमाशास्ते।प्रातरित्यादि।पक्षां
तरेचसख्याबोध्यमानामप्यार्त्तांदृष्ट्वाकृष्णइतिचिह्नैरेवतदग्रेप्रकटीबभूवेतिकविः

जन

त्मारख्यानुनूतमिववर्णयति॥ ॥प्रातर्नीलनिचोलमच्युतमुरःसंवीतपीतांशुकं
राधयाश्चकितंविलोक्यहसतिस्वैरंसखीमंडलेव्रीडाचंचलमंचलंनयनयोराधा
यराधाननेस्मेरेस्मेरमुखोयमस्तुजगदानंदायनंदात्मजः॥५४॥ ॥त्रयंनदात्मज
ःजगदानंदायास्तु।कीदृशःत्रतिज्ञायेनसदासंमुखंयस्य।तादृशः।किंकृत्वा।राधा
ननेनयनयोरंचलंप्रांतमाधायारोप्य।कथंभूतंलज्जयातरलं।कटाक्षविक्षितंरु
क्षेत्यर्थः।उत्कंचायजत्वागतविश्रांतवैचित्त्येणविवर्त्तनं।तारकायाःकलानिज्ञास्तं
कटाक्षप्रचक्षतेइति।कसति।सखीमंडलेसद्चरीवृंदेचकितंविस्मितंयथास्यात्त
थास्वैरंस्वेछयाहसतिहास्यंकुर्वाणेसति।किंदृष्ट्वा।प्रातःप्रभातेत्रच्युतंश्रीराधानु

रागेच्युतिरहितंतयासदानित्यविलासिनमित्यर्थः।त्रथवा।त्रच्युतानामापितस्या
ःसंभोगरसावेशेनक्रीडासंगोपनेनशक्तोबभूवेत्यच्युतपदेनव्यंग्यं।नीलनिचोलं
श्यामंवस्त्रंयस्यतं।चपुनःराधायाःउरःवक्षस्थलंवीतपीतांशुकंपरिहितंपीतवर्ण
मंबरंयत्रतादृशं।विलोक्य।एवंवस्त्रविनिमयःसखीनांहास्यकारणमित्यर्थः।नंदात्म
जइतिधीरललितानूकूलोयंनायकःतऽक्तं।गद्गदानुरागतःपित्रन्यायापनीतव
क्षारक्तत्वनारः।विहरन्सहराधयामुरारिर्यमुनाकूलवनान्युज्जेचकारइतिश्रा
ईलविक्रीडितंहृत्तं॥४४॥ ॥इतिश्रीगीतगोविंदेविज्ञावर्त्मनिनागरनारायणो
नामसप्तमःसर्गः॥ ॥७॥ ॥तासुवर्त्तमानोपित्रयानलक्षितइतिनागरोनारायणः

॥७॥अथकथमपीति॥ ॥अथकथमपियामिनींविनीयस्मरज्ञारजर्जरितापिसाध्व
नाते।अनुनयविनयंवदंतमग्रेप्रणतमपिप्रियमाहसाभ्यसूयः॥५५॥अथज्ञो
मंगलार्थः।अथानंतरंवा।सासौभाग्यातिशयेनविख्याताराधाध्वनातेप्रातःकालेपि
यंकांतंसाभ्यसूयंसेर्ष्ययथास्यादेवमाह।उक्तवती।किंकृत्वा।कथमपिकष्टेनापिया
मिनींरात्रिंविनीयनीत्वासमाप्तिंप्रापितेत्यर्थः।अत्रयामिनीपदेनप्रियविश्लेषेनिशा
यादीर्घत्वंध्वनितं॥उद्धवतीकन्येतिवत्॥किंभूतासा।स्मरज्ञारजर्जरितापिकाम
बाणपीडितापिप्रतिरोमविद्धापीत्यर्थः।दुःसहान्यकामिनीनखांकादिचिह्नदर्शन
जनितमहादुःखादिरहदुःखाप्यवाचेत्यर्थः।कीदृशंप्रियं।अनुनयायस्वापराधज १७४

नितकोपशांतयेविनयंनपुनरीदृशमाचरामीत्यादिविनयवाक्यंवदंतः।पुनःकी
दृशं।अग्रेप्रणतमपिपादाग्रेनम्रमपि।पश्चांतरेसाभ्यसूयमाह।गुणेषुदोषाविःक
रणमसूया।स्वरमितमपिचिह्नैरन्योपन्नुक्तंपरिकल्प्यतिरस्कारंचकारेत्यर्थः।रज
नीयामिनीतमीत्वरःस्मरज्ञारजर्जरितापिप्रणतमपिसेर्ष्यमाहेतिरसाधिकं
सूचितं।यदत्रवामतयेवचारुरसोदयोभवति।रसज्ञानांसरसतयारसाभासए
वातःपरमोचितमेवचेष्टितं।श्रीवृंदावनचंद्रप्रियायाःयेत्वन्यथाकल्पयंतितेरस
परिपाटीपराङ्मुखाज्ञेया॥५५॥श्रीराधायदाहतदेवगीतेनकथयति।रजनीत्या
दि॥ ॥रजनिजनितगुरुजागररागकषायितमंजसनिमेषं।वहतिनयनमनुरा

गमिवस्फुटमुदितरसाभिनिवेशं॥१॥हरिश्याहिमाधवयाहिकेशवमावदकैतव
वादं।तामनुसरसरसीरुहलोचनयातवहरतिविषादं॥ध्रुवपदं॥ ॥गीतस्यास्य
भैरवरागः।तक्षेल्लेणं।सरोवरस्तेस्फुटिकस्यमंडपेसरोरुहैःशंकरमर्च्चयंती।ता
लप्रयोगेप्रतिबद्धगीतागौरीतनुर्नारदभैरवीयमिति।यतितालश्च।गीतार्थस्तु॥
हरिहरीतिखेदे।हेमाधवहेकेशवयाहियाहिइतोगच्छगच्छ।कोपावेगेनयाहीत्यस्य
द्विरुक्तिः।माधवेतिचंचलायाभर्त्तुस्तेईदृशंचापल्यंयुक्तमेतिभावः।समानलेशी।
त्वात्।एवमधिक्षेपे।कृतेऽप्यसंतुष्टाकेशवेतिकेशाद्वोऽन्यतरस्यां।केशाःविद्यंते
यस्ययस्मिन्वेतिप्रशस्ताःकामिन्याकर्षणेनविकीर्णादृश्यंतइति।त्वदेकपरायणो

हमितिकथयंतमाह।कैतववादंमिथ्यावादं।मावदमाथयकैतवंतुछलेद्यूतेइति
विश्वः।ननुत्वदर्थमेवखिन्नोस्मिसूक्ते।नसुखयेत्यतआह।तामिति।हेसरसीरुहलो
चन।कमलनयन।तांनायिकामनुरानुगच्छ।यातवविखाददुःखंहरतिदूरीकरो
तियदर्थविखिन्नोसितयैवतेदुःखमपनेतुंयुक्तमहंतुस्वयमेवदुःखितेतिविषा
दंकथंहरिष्यामीतिभावः।तथाचरात्रिजागरेणार्द्धमुकुलितरक्तवर्णंचनयनयो
ःतत्कालीनसरसीरुहवल्लोचनत्वेनध्वनितं।प्रियाध्यानेनमुद्रणंतद्रत्यानुरक्तमि
तिवाकटाक्षितं।ध्रुवपदं॥नन्वहंत्वय्यनुरक्तःकथममानुरागस्त्वयान्यत्रज्ञात
अतआह।रजनीति।हेकृष्ण।तवनयनंनेत्रंतदनुरागमिववहति।धारयति॥व

हसीतिपाठेत्वंनयनमनुरागमिववहसीत्यर्थः।कीदृशंनयनंरञ्जनिजनितोरात्रिजा
तोगुरुर्महान्पोजागरस्तज्जनितोयोरागोरक्तातेनकषायितमीषत्तोहितंअतए
वालसनिमेषंअलसोमंथरोनिमेषोपक्ष्मविन्यासोयस्यतादृशं।अन्योपियःकिंचि
दस्तुवदतिसोप्यलसोनवतीतिध्वनितं।स्फुटंप्रकटमेवउदितःकथितोऽस्यकामिनी
विषयकशृंगाररसस्यानिनिवेशस्तत्परतायनतादृशं।उदितरसस्यउद्रिक्तशृंगा
ररसस्यानिनिवेशः।अयंदोयस्मिन्निति वा।तथाचान्यनायिकाकेलिव्यासंगेनद्व
याजागरकारितश्रुतिरोगेणक्रोधेनममस्नेहाकषायितस्यनयनस्यसूचनंममाग्रे
युक्तमेवेतिव्यंग्यंध्वनितमेतत्।अथवास्फुटमित्यादिअनुरागविशेषणं।कीदृशंरागं। १७६

स्फुटमितिबाकुल्येनश्रेतव्याप्यबहिर्निर्यातंउदितरसानिनिवेशमितिचादृश्या
दोऽयंखेदवाची।कषायोलोहितेचेति॥१॥ननुत्वदन्वेषणार्थंजागरान्मेनेत्रयोर्लोहि
त्यंकुतःशंकयेसतआह।कज्जलेत्यादि॥ ॥कज्जलमलिनविलोचनचुंबनविरचि
तनीलिमरूपं।दशनवसनमरुणंतवकृत्वतनोतितनोरनुरूपं॥२॥ ॥हेकृत्वाअ
रुणमपितवदशनवसनमधरस्तवतनोस्तवशरीरस्यानुरूपंयोग्यंतनोतिविस्ता
रयति।ननुस्तेत्रयामाधरोप्यधुनात्रयामशतिनावःकीदृशं।कज्जलेनांजनीभूतेनम
लिनेयेविलोचनेनेत्रेतयोश्चुंबनेनविरचितोनीलिमायत्रतादृशंरूपंयत्रतत्रादृशं।
चुंबनेलग्नंतन्नेत्रांजनेनश्यामीभूतस्त्वदधरएवस्फुटंतेधृर्त्तांप्रकटयतीतिनावः॥

तदुक्तं।गंडेनेत्रेललाटेचचुंबनंतत्प्रकीर्त्तितमिति।कज्जलमलिनेत्यादिना।तस्याअवै
दग्धीध्वनिता।ओष्ठाधरौतुरदनछादोदशनवाससीत्यमरः॥२॥किंच॥ ॥वपुरन्विति
॥वपुरनुहरतितवस्मरसंगरखरनखरक्षतरेखं।मरकतशकलकलितकलधौ
तलिपेरिवरतिजयलेषं॥३॥तववपुःशरीरंरतिजयलेषंइदंवपुर्मयाजितमिति
।सुरतविजयपत्रमनुहरति।सदृशींवपुःस्मरसंगरेऽनंगरणेखराणांतीक्ष्णानां
नखानांक्षतैराघातैःरेखायत्रतत्तादृशं।कन्याइवलेषं।मरकतशकलेनीलमणिखंडे
कलितानिर्मितायाकलधौतलिपिःसुवर्णद्रावाक्षरविन्यासस्तस्यइव।अत्रकृष्णवपु
षश्यामत्वान्मरकतशकलसाम्यंसुवर्णस्यचकविसंप्रदायेरुणत्वेननिरूपितत्वान्न

खक्षतस्यतल्लिपिसाम्यं।कलधौतरूप्यहेम्नोःकलधौतंकलध्वनाविति विश्वः।शक
लंखंडेचेति।पुनर्भवःकररुहोनखोस्त्रीनखोस्त्रियामित्यमरः।संगरोंगीकृतौयुधी
तिविश्वः।वर्णदूतःस्वस्तिमुखोवाचिकहारकइतिहारावली॥३॥ननुमार्गविस्मृत्या
गछतोमेवपुषिवनेकंटकादिस्पर्शादेवंदृश्यतेनतुनखांकमित्यतआह।चरणेति।
॥ ॥चरणकमलगलदलक्तकसिक्तमिदंतवहृदयमुदारं।दर्शयतीवबहिर्मदन
द्रुमनवकिशलयपरिवारं॥४॥ ॥इदंतवहृदयंमदनद्रुमंस्यकामवृक्षस्यहृदयां
तर्गतस्यनवकिशलयपरिवारंनूतनपल्लवसमूहं।अथवा।पल्लत्वेनैवनूतनत्वं
सिद्धं।तदानवंनव्येस्तवेदुरितिविश्वकोशात्।श्लाघनीयपल्लवसमूहमित्यर्थः॥बहि

र्बाह्यदर्शयतीवप्रकटयतीव।कीदृशंहृदयं।चरणकमलादन्यकामिनीपदपद्माज
लतास्खलताऽलक्तेनसिक्तमुक्षितं।अपरोपिवृक्षऽसिक्तमूलःसनपल्लवानदर्शय
तीतिध्वनितं।रूपकालंकारश्चात्र।अतएवउदारंमनोहरंदर्शनीयमित्यर्थः।महदि
तिवा।महतांकिमपिगोपनीयंनास्तीतिभावः।चरणकमलेतिसौरभप्रदत्वंमदन
द्रुमेत्यनुरागमूलत्वमलक्तकसिक्तमितिशीतलछायत्वंचवृक्षस्यध्वनितं।क्रौंचा
ख्यःबंधश्च।तदुक्तं।योषित्पादौहृदिविन्यस्यकराभ्यांधारयेत्कचानित्यादिपरिवारः
परिकरेसमूहेवेष्टनेपिचेतिधरणिः॥४॥ननुतवखेदेनत्वयाऐक्यान्मृद्धयेव्याधि
विक्रियाजाताकथमन्यथाकल्प्यते।सत्यंयदितवमयाऐक्यनस्यात्तदात्तदातव

रीरगतक्षतेनममवेदनानस्यादित्याह।दशनेति॥ ॥दशनपदंभवदधरगतंमम
जनयतिचेतसिखेदं।कथयतिकथमधुनापिमयासहतववपुरेतदभेदं॥५॥ ॥
भवदधरगतंभवतस्तवाधरस्थितंकस्याश्चिद्दंतक्षतचिह्नंममचेतसिखेदंदुःखंज
नत्फत्पादयति।एतत्तववपुरधुनापियामेसहकथमभेदमैक्यंकथयतीत्यर्थः।
अन्यशरीरक्षतस्यान्यत्रव्यथाजनकत्वासंभवाद्वपुषोरभेदोजायतेऽन्योपभोग
लक्ष्मदर्शनादतिदुःखेनात्यंतहृदयभेदेनकुतोवपुषोरैक्यमिति।व्यंग्येनभेदए
वप्रतिपादितइत्यर्थः।प्रसिद्धाभेदकारणनिखेधेऽभेदकारणस्यविभाव्यमानत्वा
द्विभावनालंकारस्तदुक्तंदंडिना।प्रसिद्धहेतुव्यावृत्त्यायत्किंचित्कारणांतरंयत्रस्वा

भावाविकत्वंवाविभाव्यंसाविभावनेति॥५॥ननुतवोपायनार्थंकमलत्रोटनंकृतव
तिमयिपद्मकोशादापतताभ्रमरेणममाधरोदष्टोनतुदंतक्षतमित्यतआह।बहि
रिवेति॥ ॥बहिरिवमलिनतरंतवकृष्णमनोपिभविष्यतिनूनं।कथमथवंचयसेज
नमनुगतमसमशरज्वरनूनं॥६॥हेकृष्ण।नूनंनिश्चयेनमनोपिचित्तमपिबहिरिव
बाह्यमिवमलिनतरमतिशयेनमलिनंभविष्यति।यथातववपुःश्यामंतद्वत्तव
मनोभविष्यतीत्यर्थः।ननुममनालिन्यंत्वयाकथंज्ञातमितत्यआह।कथमिति।अ
थेतिप्रश्नेत्वमेवपृच्छसेयदिनतवांतर्मलिनंतदाऽसमशरज्वरनूनंकामसंतापेनदुः
खितमतएवानुगतंत्वामनुसृतंमादृशंजनंकथंवंचयसेप्रतारयसि।शरणागत

जनवंचनमंतरमालिन्यमंतरेणनसंभवतीतिभावः।व्याजेनदंतक्षतादिसंगोपना
दतिमलिनोसीत्यपिध्वनितं।अथोअथचसंप्रश्नेमंगलारंभयोरपीतिविश्वः।नूनमि
तिशब्दोपादानादुत्प्रेक्षानामायलंकारस्तदुक्तंदंडिना।मन्येशंकेध्रुवंप्रायोनूनमित्ये
वमादिभिः।उत्प्रेक्षाव्यज्यतेशब्दैरिवशब्दोपितादृशइति॥६॥पूर्वोक्तमेवक्रूरकार्ये
नापिस्पष्टयति॥भ्रमतीति॥ ॥भ्रमतिभवानबलाकबलायवनेषुकिमत्रविचित्रं
प्रथयतिपूतनिकैवचधूवधनिर्दयबालचरित्रं॥७॥भवान्वनेषुविपिनेष्वबला
कवलायस्त्रीजनग्रासायभ्रमणंकरोति।अत्रास्मिन्नर्थेकिंचित्रनकिमपीत्यर्थःतत्र
हेतुमाह।प्रथयतीति।पूतनिकैवकंसप्रहितापूतनैववधूवधेस्त्रीमारणेतवनिर्द

यंदयारहितंबालचरित्रंशिशुचेष्टितंप्रथयतिख्यापयतिशिशुत्वेयेनस्तनदानप्रवृ
त्ताराक्षसीहतातस्येदानींकैशोरेमादृशीनांकोमलांगीनामबलानांहननेकिंचित्र
मितिभावः।अथवाहेवधूवधनिर्दयतवबालचरित्रंबाल्येपितादृश्याःकंसभगि
न्यामारणरूपचेष्टितं॥बालचरित्रंकोमलचेष्टांवा।पूतनिकैवप्रथयतिविस्तार
यतीत्यर्थः।स्वार्थेकः।खंडितावेयनायिका।तदुक्तंभरतेन।निद्राकषायकलुषीकृ
तताम्रनेत्रोनारीनखव्रणविशेषविचित्रितांगः।यस्याकुतोपिगृहमेतिपतिःप्र
भातेसाखंडितेतिकथिताकविभिःपुराणैरिति॥ ॥श्रीजयदेवेति॥ ॥श्रीजयदे
वभणितरतिवंचितयुवतिविलापं।शृणुतसुधामधुरंविबुधाविबुधालयतोपि

याश्रीललनाचरत्तपइत्यादि।विबुधःपंडितेदेवे।इतिविश्वः।पक्षांतरे।रतिरनुरा
गवैचित्यविप्रलंभाख्यो।भावविशेषस्तेनवंचिताछलितायाखंडितानतुवस्तुतस्त
स्याःविलापमित्यर्थः।अथवा।रतौवंचिताचासौअधरादौखंडिताचयुवतिस्तस्या
ःविलापंसंभोगादिषुछलेनाधरादिखंडनेनशुष्कक्रंदनंयाहियाहीति।तत्तुकीदृ
शं।सुधातोपिमधुरंअमृतादपिस्वादुअतएवविबुधालयतोपिदुरापमिति॥त
दा।नतुकामेनखिन्नोस्मियाहियाहीतिमावद।संभोगार्थमनुसरामीतितत्राह॥
मावदकैतववादमिति।ममेछानास्ति।तामनुसरेत्यादिवराधोक्तिः।नतुतववपु
ःप्रचुरकाममयंश्यामत्वात्यत्स्तवदशनवसनंअरुणमपितनोरनुरूपंतनोति

दुरापं॥ ८॥ हे विबुधाः कृष्णमाधुर्यरसास्वादपंडिताः इदं श्रीजयदेवभणितं वर्णितं
रतिवंचितासंभोगरहितायाखंडिताउक्तलक्षणायुवतिः कांता तस्याः विलापः
परिदेवनं शृणुत आकर्णय। कीदृशं सुधातोपि मधुरं। तत्र हेतुमाह। विबुधालय
तोपि स्वर्गादपि दुःप्रापं। तत्रापि दुर्लभमित्यर्थः। उक्तं च। तस्यैव हेतोः प्रयतेत को
विदो न लभ्यते यद्भ्रमतामुपर्यधः। इति। तव कथामृतमित्यादिना च श्रीभागवते।
अथवा। सर्वशास्त्रप्रसिद्धमिदं। निसीमप्रेमरसालंबनः श्रीव्रजराजनंदनः प्रिय
जनसमुदायेषु श्रीगोपिका एव तेन विबुधश्रेष्ठाः वैकुंठवासिनः तेषामालयं वैकुं
ठाख्यं तत्रापि दुःप्रापमित्यर्थः। तदुक्तं श्रीभागवते॥ नायं श्रियोंग इत्यादि। यद्वांछ

तत्त्वं सर्वकाममयं पश्यसीति कज्जलमलिनेत्यादि। अत एव तव वपुरित्यादि नव
किशयपरिवारमिति पर्य्यंतं पुनः राधायाः। अथ कृष्णस्य एवमेव भवतु नाम प्रिया
यमह्यं दीयतां रतोत्सवं ऐक्यत्वादिति कृष्णे कथयति न हि मया सह तव ऐक्यमत आ
ह। दशनपदमिति। त्वया मे ऐक्यं यदि न स्यात्तदा वपुरभेदं कथं कथतीत्यर्थः। धूर्त्त
पुनरपि तदेव कामयसे। अनुगतं जनं अस्मत्शरज्वरनूनं न खल्वतताप पीडितं अ
थानंतरं कथं वंचयसे छलयसीत्यर्थः। अतो नूनं बहिरित्यादि निर्दयबालचरित्रमि
ति पर्यंतं श्रीराधाया उक्तिः। एवमन्योन्यं विविधहावभावादिभिः नागरमौल्योरिति
रसेनाक्रांतयोः संभोगे एव नर्म्मादिगोष्ठी अनया अष्टपद्या महाकविना निरूपिता वक्ष्य

तिचाऽधरसुधापानेकथानर्मनिरित्यादि।एवंतवेदमग्रिमंपद्यंसंगछतइतिज्ञेयं।
तत्रप्रणयन्नरुनंगेनतरंगेणोद्भासेनेत्यर्थः॥७॥ ॥१०॥तवेदमिति॥ ॥तवेदंपश्यंत्या
:प्रसरदनुरागंबहिरिवछियापादालक्तछुरितमरुणछायहृदयं।ममाद्यप्रख्या
तप्रणयन्नरुनंगेनकितवत्वदालोकःशोकादपिकिमपिलज्जांजनयति॥५॥हे
कितवधूर्त्तत्वदालोकस्तवदृशिंप्रख्यातःप्रसिद्धोयःप्रणयन्नरोऽनुरागातिशय
स्तस्यनंगेननाशेनहेतुनाशोकादपिकिमप्यनिर्वचनीयांलज्जांजनयति।शोकं
तुजनयत्येवपरंतुशोकादपिलज्जांगुर्वीमुत्पादयतीत्यर्थः।तच्चेष्टा॥प्रीतोसत्यां
परमानंदजनकत्वमिदानींतदभावाच्छोकजनकत्वमेवत्वदालोकस्येतिभावः॥ १७२

कीदृशपाःप्रे।तवइदंप्रत्यक्षंहृदयंपश्यंत्याःकीदृशंछियापादालक्तेनछियायाश्च
रणसंबंधियावकेनव्याप्तं।अतएवारुणछायादीप्तिर्यस्यतादृशं।अरुणद्योति
इतिपाठेअरुणःसंध्यारागस्तवद्द्योतिउंशीलमस्यास्तीत्यरुणद्योतिएतादृशं।क
मिवबहिःप्रसरदनुरागमिवाहृदयंपरिपूर्य्याधिक्याबहिर्निसृतप्रेमेवविपक्षायु
वतीपरिहासशंकयाशोकादपिमेऽधिकालज्जाभवतीतिभावः।प्रसरदनुरागमि
वेत्फल्वेक्षालंकारः।छायासूर्यछियाकांतिरिति।अरुणःसंध्यारागेस्यादर्कसार
थौलोहितेपिच॥५॥ ॥इदानींसर्गांतेकविर्मंगलमाचरति।अंतर्मोहनमौलिघूर्ण
नमिलन्मंदारविस्रंसनस्रङ्माकर्षणदृष्टिहर्षणमहामंत्रःकरंगीदृशां।दप्यहानव

दूयमानदिविषदुर्वारदुःखापदांभ्रंशः कंसरिपोर्व्यपोहयतुवः श्रेयांसिवंशीरवः
॥५७॥ कंसरिपोः श्रीकृष्णस्यवंशीरवः मुरलिकानादः वोयुष्माकंश्रेयांसिकल्या
णानिव्यपोहयतुददातु। कल्याणदातृत्वसामर्थ्यकथनायात्रकंसरिपुपदोपादा
नं। किंलक्षणः। कुरंगीदृशांहरिणतरुणीनेत्राणांअंतर्मोहनंमनोमोहः मौलिघू
र्णनंतन्नादप्रशंसार्थंशिरश्चालनंमिलन्मंदारस्यविस्रंसनमधःपातनंस्तब्धाक
र्षणंस्तब्धानांमानिनीनामपिवशीकरणंदृष्टिहर्षणंनेत्रोत्साहः श्रवणनिर्वृत्या
नेत्रविकाशोभवति। इत्यादिकर्मसाधनेमहामंत्रः पुनः किंलक्षणः। दृप्यद्भिः दर्प्य
युक्तैर्दानवैर्दैत्यैर्द्वयमानानामुपतप्यमानानांदिविषदांदेवानांदुर्वाराअनिर्वा

र्य्याद्दुःखापदोदुःखसाध्वनीभूताः विपत्तयस्तासांभ्रंशोनाशकः। यच्छ्रवणेनदेवा
ःदैत्यपीडाभयान्मुक्ताभवंतीतिभावः। अनेनापिसामर्थ्यलक्षणोनायकगुणउ
क्तः। तथाचदेवादीनांविलाससाधकोयस्यवेणुध्वनिः किंवक्तव्यं। तस्यपुरुषोत्त
मस्यविलासित्वमितिभावः॥५७॥ ॥इतिश्रीगीतगोविंदेखंडितावर्णनेविलासल
क्ष्मीपतिर्नामाष्टमः सर्गः॥ ॥८॥ ॥प्रणयकोपात्हरिमधिक्षिप्येदानींकृतंपश्चा
त्तापांसखीआह। तामिति॥ ॥तामथमन्मथखिन्नांरतिरसभिन्नांविषादसंपन्नां
अनुचिंतितहरिचरितांकलहांतरितामुवाचरहःसखी॥५८॥ अथशब्दोमंगला
र्थः॥ आनंतर्य्येवा। तांकलहांतरितां। परुषवचनकथनानंतरंकृतपश्चात्तापांश्री

राधांरहएकांतेसखीउवाचाकथितवती।कीदृशीं।मन्मथखिन्नांदुःखितां।अतए
वरतिरसेनशृंगाररसेननिन्नांसंगतांरतिरसेनसंभोगरागेणनिन्नांविदारितां
तःकरणांवा।अतएवंविषादसंपन्नांउद्वेगसहितांअतएवानुवारंवारंचितितंस्म
तंहरेश्चरितंपुराविलसितंतत्कालीनविनयंवायया तां।कलहांतरिताचेयंना
यिका।तउक्तंनरतेनाप्राणेश्वरंप्रणयकोपनरेणानीतंयाचाटुकारमचिरादव
धीर्यपश्चात्संतप्यतेमदनवह्निशिखासहस्रैर्बाष्पाकुलाउकलहांतरितानुसा
स्यादिति।निन्नमन्यार्थवचनेसंगतेविदारितेस्फुटेशतिविश्वः।५०।तदेवगीतेन
कथयति।हरिरिति॥ ॥हरिरभिसरतिवहतिमधुपवने।किमपरमधिकसुखं १८४

सखिसुवने॥१॥माधवेमाकुरुमानिनिमानमये॥ध्रुवपदं॥ ॥गीतस्यास्यगुर्ज्ज
रीरागः॥यतितालस्तु।गीतार्थस्तु।अयेइतिसंबोधनं।हेमानिनिमानवति।माधवे
श्रीकृष्णेमानंमाकुरुअथवा।अयेइतिश्रुत्यावहविधौप्रियसंगमलक्षणे।इतिया
वत्निमित्तसप्तमीयं।संभोगार्थविलंबकरंमानंमाक्षथाइत्यर्थः।माधवपदेनापि
माधवोपित्वामेवंप्रसादयत्यतोमानंमाकुर्वितिध्वनितं॥ध्रुवपदं॥मधुपवनेवसं
तवायोवहतिसतिहरिःकृष्णोभिसरति।स्वयमायातिहेसखिसुवनेत्रैलोक्येअप
रंकृष्णाभिसरणानन्यत्किंचिदुत्कृष्टंसुखंअपितुनकिंचिदित्यर्थः।अथवासुवने
वैकुंठलोकेलक्ष्म्यादिभिःकिमतःपरंउत्कृष्टंसुखमनुभूयसे।नकिंचिदपित्यर्थः।

तवार्त्तिनाज्ञायप्रवणश्चतिहरिपदेनकथितं॥१॥अपिचातालेति॥ ॥तालफलाद
पिगुरुमतिसरसं।किमुविफलीकुरुषेकुचकलशौ॥२॥कुचकलशौस्तनघटंकिम
र्थं।विफलीकुरुषेनिःप्रलंकरोषि।हस्तकरार्पणादेवकुचकलशयोःसाफल्यात
दन्यावेवैफल्यमितिभावः।कीदृशौ।तालफलादपितालफलापेक्षयापिगुरुंकावि
न्यस्तोल्याभ्यांश्रेष्ठमित्यर्थः।अतिसरसंअतिशयेनशृंगाररसमर्द्रितं।यथाचाति
विमर्देनैवतालफलस्यरसप्रदत्वंभवति।तथैवात्रापतिविमर्देनशृंगाररसोद्भवो।
भवतीतिध्वनितं।तथाचात्रपरोपिकलशोरसोज्ज्वलंतद्भावितःमंगलायप्रियजना
गमेतत्करेऽर्प्यतेऽतोस्मिन्नवसरेत्वयाप्येवंकर्त्तव्यमितिभावः॥३॥ननुयदादरिश १०५

गतस्तदात्वयानकथितमित्यतआहाकतिनेति॥ ॥कतिनकथितमिदमनुपद
मचिरंमापरिहरहरिमतिशायरुचिरं॥३॥ ॥इदमचिरंसांप्रतमेवअनुपदंस्थानं
स्थानंप्रतिमयाकतिनकथितंकियन्नकथितंअपितुबकुकथितमित्यर्थः।किंइदं।
हरिंअतिशायेनमनोहरंचित्तचौरंमापरिहरउपेक्षस्व।३।एवंश्रुत्वाश्रुमुखीप्र
त्याह।किमितीति॥ ॥किमितिविषीदसिरोदिषिविकला।विहसतियुवतिसमातव
सकलाधात्वंकिमितिकिमर्थंविषीदसिविखिन्नाभवसि।नन्वनास्मिविखिन्नेत्यत
आहारोदिषीति।विकलाविकलासतीरोदिषि।अतएवतवसकलासमस्तायुवति
समातरुणीष्टषविहसतिहास्यंकरोति।तवचेष्टितंविहसतीतिवा।अथवा।सकला

चतुःषष्टिकलायुक्तारसपाटीक्रशजेत्यर्थः।ध।तर्हिकिंकरोमित्यतआह।सजले।
ति॥ ॥सजलनलिनीदलशीतलशयने।हरिमवलोकयसफलयनयने॥५॥हे
सजलनलिनीदलशीतलशयनेसजलानिजलसहितानियानिनलिनीदलानि
कमलिनीपत्राणितेषाशीतलंनिर्मितंशयनंशय्यायस्यास्तादृशे।हरिंसकलसौं
दर्यादिगुणविशिष्टनायकरत्नंअवलोकयपश्यअतएवनयनेनेत्रेसफलयतार्थ
यातवकांताएवतांफलमित्यादि।तथाचयद्विरहतप्तात्वंनिर्मितसजलानलिनीद
लशयनाभितमनुगतंसस्नेहावलोकनेनसत्कृत्यकृतकार्यान्नवेतिभावःअथवा
।तवविरहतापेनसजलानलिनीदलशीतलशय्यांहरिमवलोकयेति।कतिनक १७६

थितमित्यर्थःसजलेत्यादौसप्तमी।अस्मिंछयनेतवानुनयार्थमुपविष्टंहरिमवलो
कयेतिवा॥५॥विचारयंतीमाह।जनयसीति।जनयसिमनसिकिमितिगुरुखेदं।
शृणुममवचनमनीहितनेदं॥हामनसिचिन्तेगुरुखेदंमदुःखंकिमितिजनय
सि।वक्ष्यमाणंमवचनंशृणु।कीदृशंअनीहितोनाकांक्षितोनेदोवैरस्यंयत्रतादृशं
।युवयोर्हितकारिणमित्यर्थः।अथवा।मयासहअनाकलितंनेदंयथास्यादेवम
मवचनंशृणु।इयंममसखीमन्तोन्नामदनिष्टंनविष्यतीतिबुध्यामवचनंशृणिवं
तिनावः।हातदेवाह।गिरिरिति॥ ॥हरिरुपयातुवदतुबकुमधुरंकिमितिकरो
षिहृदयमतिविधुरंशहरिःश्रीकृष्णःउपयातुत्वदंतिकंगछतुबकुमधुरंअतिस

रसंयथास्यादेवंवदतुअधिकंचातुवदत्वितिवा।एवंसतिस्वकीयंहृदयंअतिवि
धुरंकिमितिकरोषि॥७॥श्रीजयदेवभणितमतिललितं।सुखयतुरसिकजनंह
रिचरितं॥८॥श्रीजयदेवभणितंहरिचरितंश्रीकृष्णस्यचरितंरसिकजनंभक्तिवि
शेषस्सास्वादचतुरंभक्तजनंसुखयतु।आनंदयतु।किंभूतं।अतिललितंशृंगार
रसंगीतविशिष्टत्वेनातिमनोहरमित्यर्थः।उक्तंच।शृंगारप्रचुराचेष्टायत्रतल्ललि
तंविदुरिति॥८॥ ॥१८॥स्निग्धेइति॥ ॥स्निग्धेयत्परुषासियत्प्रणमतिस्तब्धासिय
द्रागिणिद्वेषंयासियदुन्मुखेविमुखतांयातासितस्मिन्प्रिये।तद्युक्तंविपरीत
कारिणितवश्रीखंडचर्वाविषंशीतांशुस्तपनोहिमंहुतवहःक्रीडोमुदोयातना।

५९॥हेविपरीतकारिणि।विपर्ययविधायिनीसंबोधनं।तत्ततोहेतोःत्वयिएतत्स
र्वंयुक्तमेव।तथाचयःपरस्मिन्विपरीतमाचरति।तस्यसर्वंविपरीतमेवभवति
किंतत्।तवश्रीखंडवर्चाविषंचंदनानुलेपौविषमिव।संतापजनकोभवति।अथ
च।शीतांशुश्चंद्रस्तपनःचंद्रःशीतलस्वभावोपितापमाचरति।हिमंतुषारोपिहुत
वहोग्निरिवदाहकोभवतिक्रीडामुदःकेलिप्रमोदोःयातनास्तीव्रवेदनाइदभवंति
।यद्यतःस्निग्धेतस्मिन्प्रियेमधुरवचनैःस्नेहंप्रकाशयतिसतिपरुषासिनिष्ठुर
भाषिण्यसि।यच्चप्रणमतितस्मिंस्त्वंस्तब्धासि।यच्चरागिणिअनुरागावतितस्मिंस्त्वं
द्वेषस्थासिद्वेषमवलंब्यस्थितासि।यच्चउन्मुखेआलिंगनायसन्मुखेतस्मिंस्त्वंविमुख

तांयातासि।पराङ्मुखतांगतासि।यातनातीव्रवेदनेत्यमरः।विरोधालंकारशार्दूल
विक्रीडितंवृत्तं।५९।सर्गांतेकविर्मंगलमाचरति॥ ॥सांद्रेति॥ ॥सांद्रानंदपुरंदरा
दिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटैंद्रनीलमणिभिःसंदर्शितंदिंदिरं।स्वछंदंमक
रंदसुंदरगलन्मंदाकिनीमेदुरंश्रीगोविंदपदारविंदमशुभस्कंदायवंदामहे॥६०
वयंश्रीगोविंदस्यपदारविंदंचरणकमलंवंदामहे।नमस्कुर्महे।किमर्थं।अशुभ
स्कंदायभक्तिप्रतिबंधकदुरितस्यनाशाय।तादर्थेचतुर्थी।बहुवचनंशिष्याद्यभि
प्रायेण।दुरितनाशनसामर्थ्यंद्योतयति।स्वछंदमिति।स्वछंदयथास्यादेवंमक
रंदवत्सुंदरंचयथास्यादेवंगलंत्याप्रस्रवंत्यामंदाकिन्यागंगयामेदुरंस्निग्धं।तत्त

था।तथाचयस्मान्निःसृतागंगाजगत्पुनाति।इतिकिंवक्तव्यं।तस्यसाम्यमितिभा
वः।अरविंदेहिमकरंदोभवति।तेनमंदाकिनीउपमीयतेइत्युपमालंकारः।पुन
ःकिंभूतंसांद्रोनिविडःआनंदोहर्षोयेषांतेपुरंदरादयःइंद्रादयोदिविसीदंतीति
दिविषदोदेवाश्चतेषांवृंदैःसमूहैरमंदादरादधिकादरादानम्रैःसमंतात्कायादि
नानतियुक्तैर्मुकुटैंद्रनीलमणिभिःसंदर्शिताःइंदिदिराभ्रमरायस्मिंस्तादृशंअ
नेननमस्करणीयत्वंकथितं।अत्रचरणस्यकमलोपमा।मंदाकिन्याःमकरंदोपमा
।सुंरवृंदमौलिनीलमणीनांभ्रंगोपमा।एवंपद्मकरूपकताचरणस्य।तथाचमं
दाकिनीपदेनव्यापकतयाऽविरतप्रवाहरूपकत्वाच्चभगवतःयशोंवर्ण्यंते॥६०॥

इतिश्रीगीतगोविंदेकलहांतरितावर्णनेमंदमुकुंदोनामववमःसर्गः॥ ॥९॥
मंदोलसोमंदोयन्नवात्वा॥९इदानीस्वयमनुनयतिअत्रांतरइत्यादिना॥ ॥अ
त्रांतरेमसृणरोषवशामसीमनिःश्वासनिःसहमुखींसुमुखीमुपेत्य।सव्रीडमीक्षि
तसखीवदनांप्रदोषेसानंदगद्गदपदंहरिरित्युवाच॥६१॥ ॥अत्रांतरेस्मिन्नेवाव
सरेनिशामुखेहरिःकृष्णःसुमुखींसुंदराननांकिंचित्कोपोपशमेनप्रसन्नवदना
मित्यर्थःश्रीराधामुपेत्यसमीपंगत्वासानंदगद्गदयंदआनंदेनगलदक्षरवाक्य
सहितंयथास्यात्तथाइतिवक्ष्यमाणंउवाच।कीदृशीं।मसृणरोषवशांस्निग्धकोप
युक्तां।सखीवचनैक्किंचिन्नमितरोषामित्यर्थः।पुनःकिंभूतां।असीमभिरपारैर्निः

हरंशीलंयस्यास्तादृशे।त्वंमयिमद्विषयेअनिदानंअकारणंअन्यनायिकासं
भोगकारणरहितंमानंमुंचत्यज।ननुमन्मानकृतेतवकाहानिर्जाताऽतआह।
सपदीति।सपदित्वन्मानसमकालंएवमदनानलःकामाग्निःममममानसंदहति
।तापयति।अतोमानत्यागस्यकावार्त्ताकिंतुमुखकमलमधुपानंदेहि।मुखमे
वयत्कमलंतत्संबंधियन्मधुस्वोत्पादिताग्निशमनायतत्पानंदेहि।अनेनमाने
संमुखेऽपश्यंत्याःमुखावलोकंयाचितं।अथवा।चारुशीलेमयित्वदेकनिष्ठस्व
भावेइतिअतएवअकारणंमानंमुचेत्यर्थः।अन्यार्थोयाचत।सयदिशीघ्रंमुख
कमलमधुपानंमधरामृतपानंवा।ध्रुवपदं।अपिच।हेप्रियेत्वंयदिकिंचिदपि

श्वासैनिःसहंविरहदुःखसहनाक्षमंमुखंयस्यास्ता।सव्रीडंसलज्जंयथास्यादेवं
ईक्षितंसख्यावदनंमुखंययातां॥६१॥तदेवगीतेनाह।वहसीत्यादि॥ ॥वदसियदि
किंचिदपिदंतरुचिकौमुदीहरतिदरतिमिरमतिघोरं।स्फुरदधरसीधवेतववद
नचंद्रमारोचयतिलोचनचकोरं॥१॥प्रियेचारुशीलेमुंचमयिमानमतिदानं।सप
दिमदनानलोदहतिममममानसंदेहिमुखकमलमधुपानं।ध्रुवपदं॥गीतस्यास्य
देशवराडीरागःअष्टतालीताल।रागलक्षणंतु।आरब्धगमनमुद्रानिद्राघूर्ण्ण
यमाननयनयुग्माद्यासुखशायिनिजदयितेदेशवराडीभवेद्गौरीति।लघुर्द्रुतौ
लघुश्चेत्यष्टतालीप्रकीर्त्तितेति।गीतार्थस्तु।हेप्रियेप्राणवल्लभेश्रीराधेचारुमनो

प्रियाप्रियनिपेरक्षंस्वल्पमपिवदसि।वक्षितदादंतरुचिकौमुदीतवदशनानां
यादीप्तिःसैवकौमुदीचंद्रयोत्स्नासाअतिघोरंअतिभीमंदरतिमिरंदरःसाध्वसः
सएवांधकारंतत्हरतिदूरीकरोति।अपिच।तववदनचंद्रमाइवसःस्फुरदध
रसीधवेप्रकाशमानाधरामृतार्थंममलोचनचकोरंचक्षुःपक्षिविशेषंरोचयति
।साभिलाषंकरोति।सीधवइतितादर्थेचतुर्थी।अनेनवदनचंद्रमसःनतृप्तिजन
कत्वमितिकथितं।लोचनयोश्चकोरत्वेनतदेकजीवनतयातदधीनत्वंवेतिध्वनि
तं।अपिचनयनयोरधरपानेक्षयातर्द्धविपर्ययेनाधरसुधायाअद्भुतमाधुर्यभ
रोनिरूपितः॥१॥मृषारोषंप्रकटयंतीमाह।सत्यमिति॥ ॥सत्यमेवासियदिसुदति

मयिकोपिनीदेहिखरनखरशरघातांघटयनुजबंधनंजनयरदखंडनंयेनवानव
तिसुखजातंश॥ ॥हेसुदतिशोभनदशनेत्वंसत्यमेवयथार्थमेवयदिमयिकोपिस्म
सिकोपवत्यसितदाखरास्तीक्ष्णायेनखरास्तएवशराबाणास्तेघतिंप्रहारंदेहिते
नापिचेन्नतुष्यतितदानुजबंधनंघटयातस्माप्यसंतोषोरदखंडनंरदैर्दशनैश्च्यध
रेक्षतंजनयेनवासुखजातंसुखसमूहोभवति।तदेवकुरुतथाचमय्यपराधानुरू
पंदंडंविधायकोपंमुंचेतिभावः॥ननूणांहिसापराधेषुताडनबंधनखंडनादयोदंडा
ःसमुचिताःअत्रैवतथाजैननखक्षतालिंगनचुंबनादीनप्रार्थ्यतेश॥ननुयातव
प्रियासादंडंविदधातुकिंमयाऽतआह॥श॥त्वमसीति॥ ॥त्वमसिममजीवनंत्वमसि १९१

ममभूषणंत्वमसिममभवजलधिरत्नंभवतुभवतीहमयिसततमनुरोधनीत
त्वममहृदयमतियत्नं॥श॥त्वंममजीवनमसि।त्वयिविषाण्णायाममविषादोभव
ति।प्रसन्नायांप्रसादश्चति।त्वमेवमेजीवनमतोजीवादन्यत्किंप्रियोभवत्यतस्त्वमे
वममभवंछनेतिभावः।त्वंममभूषणमलंकरणमसिगौरांगीत्वांविनाश्रीरा
रस्यमेकेनापिभूषणेनशोभानभवतीत्यर्थः।अनेनपिव्याजेनालिंगतंयाच
ते।भवजलधौगोपजन्मजलधौव्रजरूपेव्रजरत्नाकरेत्वमेवरत्नमसि।यथाल्पो
रत्नाकरेप्रविश्यपरिश्रांतःकश्चिद्भग्नंलब्ध्वापूर्णोभवति।तथाहमप्यस्मिन्व्रजेत्वं
स्त्रीरत्नंप्राप्यकृतार्थास्मीतिभावः।अनेनस्वस्यगोपकुलोद्भवंबकुमानयति॥ज

न्मसाफल्यमप्येतावदेवेतिध्वनितं।तथाच।समुद्रस्थानीयव्रजंव्रजांगनाःरत्नानि॥
महारत्नंश्रीराधिकैवेतिच।जातौजातौयदुत्कृष्टंतद्धिरत्नंप्रचक्षते।इत्युक्तेः।उपसं
हरति।भवत्विति।इहप्रवणेमयिभवतीसततंसर्वदानुरोधिनीअनुकूलाभवतु।
तत्रत्वदनुकूलतायांममहृदयंअंतःकरणसमुदायोऽतियत्नंअतिशयितप्रयत्न
वत्।त्वदाराधनप्रयत्नयुक्तमस्तीत्यर्थः।अनुरोधो।नुवर्त्तनमित्यर्थः।३।नीलनलि
नेत्यादि॥ ॥नीलनलिनाभमपितन्वितवलोचनंधारयतिकोकनदरूपं।कुसुम
शरबाणभावेनयदिरंजयसिकृष्णमिदमेतदनुरूपं॥४॥ ॥हेतन्विकृशांगि।नी
लनलिनस्यनीलोत्पलस्येवाभाकांतिर्यस्यएतादृशंतवलोचनंकोकनदरूपंरक्तो

त्पलसौंदर्यंधारयतिबिभर्त्तियदिचकुसुमशरःकामस्तस्यबाणभावेनबाणत्वे
नतद्बाणाभिप्रायेणवाइदंकृष्णंचक्षुरनुरंजयसिरक्तंकरोषि।एतस्यचक्षुषोऽनु
रूपंयोग्यंभवति।मन्मथशरमथितमानसानांरमणीनांनेत्राणिलोहितानिभ
वंतिबाणत्वेनवशराहिसततंपरमर्मभेदिनोरुधिराक्तत्वेनरक्ताभवंति।रोषंत्य
क्त्वासंभोगाभिप्रायेणलोचनमनुरंजयेतिउचितमितिभावः।तन्वंगीतिसंबोध
नेनापिकृशांग्यास्तवरोषोनोचितइतिध्वनितं।अथवा।कुसुमशरबाणःकटाक्ष
स्तेनयोभावः।शृंगाररसस्यानुभावस्तेनसस्नेहकटाक्षावलोकनेनेत्यर्थः।कटा
क्षावलोकलालसंकृष्णंमांयदिरंजयसी।ममानुरंजनंकरोषि।एतत्तवबाणस्यवा

इदंअनुरंजनंअनुरूपंयुक्तमित्यर्थः।अथामेलौलौदित्यापादनसमर्थायास्तेममरं
जनंयुक्तमेवेतिभावः॥ध॥किंचित्रसन्नांवीक्ष्याह॥स्फुरत्विति॥ ॥स्फुरत्तुकुचकुं
भयोरुपरिमणिमंजरीरंजयतुतवहृदयदेशं॥रसतुरसनापितवघनजघनमं
डलेघोषयतुमन्मथनिदेशं॥५॥ ॥मणिमंजरीहारलताकुचकुंभयोस्तनकलश
योरुपरिस्फुरत्वंचलानवतुतवहृदयदेशंवल्लःप्रदेशंरंजयतुस्वरश्मिभिःशो
भयतुत्वन्नयननलिनंरक्ततांधत्तेत्वंचञ्चलंमांरंजयसिअतोमणिमंजर्यर्पिते
वल्लोयदिरंजयतितदानुरूपंभवतीतिभावःअत्रस्मरकेलिकर्मारंभेमंजरीयु
क्तपूर्वंकलशस्थापनंमंगलायेवेतिसूचनायकुचयोःकलशत्वेनमणिहारस्य १९३

चमंजरीत्वेननिरूपणंयुक्तमेवकृतं।अपिचातवघनजघनमंडलेमांसजलजघ
नप्रदेशेरसनापिक्षुद्रघंटिकापिरसतुशोभयमानानवतुमन्मथनिदेशंकामाज्ञां
घोषयतु।संभोगरणेमदाज्ञयाविलासिजनंयोजयत्वितिभावःवचनचातुर्येण
स्फुरतु।मणिमंजरीरसतुरसनापिश्त्यादिनाविपरीतरतंयाचने॥५॥अपिच।
स्खलेति॥ ॥स्खलकमलगंजनंममहृदयरंजनंजनितरतिरंगपरागं।नणम
स्मरणवाणिकरवाणिचरणद्वयंसरसलसदलक्तकरागं॥घ॥ ॥हेमस्मरणवाणिस्नि
ग्धवचनेनणआज्ञापयातवचरणद्वयंसरभःसांद्रःसहरसेनशृंगारेणसहवर्त
तइतिवासरसंयथास्यादेवंलसत्शोभमानोऽलक्तकरागोयत्रतादृशंकरवाणिकु

र्यो।कीदृशंचरणद्वयं।स्थलकमलगंजनं।स्थलोत्पन्नंयत्कमलंस्वकांत्यातस्यतिरस्का
रकं।अरुणतयासौगंध्यसौकुमार्येणचतिरस्कृतस्थलकमलसौंदर्यमित्यर्थः।अनेन
चरणस्यपद्मादपिशीतलत्वंकथितं।तन्नहृदयानुरंजकत्वात्।पुनःकीदृशं।ममहृद
यरंजनं।मद्हृदयानुरागंजनकं।अथवा।ममहृदयमपिक्रींचबंधादौरंजयतिसंभोगे
स्मरवलितअलक्तकरागयुक्तंकरोतीतितथाभूतंअतोमयाऽस्यरंजनमितिभावः।
पुनःकीदृशं।जनितउत्पादितोरतिरंगेसुरतकौशलेसंभोगरागस्यवापरभागःप
रस्परशोन्नायेनताहशं।कामोद्रेककारीत्यर्थः।तच्चेथाक्रौंचबंधादौममहृदयलग्न
सत्परशोन्नादास्यतीतिभावः।परस्परंतुयाकांतिःपरःभागःसकथ्यतइति।रंगःकी

शलरागयोरितिधरणिः॥ह।स्मरेत्यादि॥ ॥स्मरगरलखंडनंममशिरसिमंडनं
धेहिपदपल्लवमुदारं।ज्वलतिमयिदारुणोमदनकदनारुणोदरतुतडपविकारं॥
७॥ ॥हेप्रियेउदारंसुंदरंपदपल्लवंचरणंकिशलयंममशिरसिधेहिमस्तकेस्थाप
य।अनेनप्रियजनचरणनगवक्रतगौरवातिशयेनोपास्यत्वमुच्यते।पल्लवपदेन
सौकुमार्य्यसौगंध्यंचतापहारित्वंमांगल्यंसौंदर्यंचेति।उदारंमहत्अनीष्टप्रदंवा
तेनचसेव्यत्वयोग्यत्वमिति।कीदृशं।मममंडनमलंकरणं।अनेनभगवतःप्रियज
नानुवर्त्तनमेवभूषणमितिकथितं।पुनःकीदृशं।स्मरस्ययत्गरलंविषंतस्यखंडनं
नाशनंविरहिणिमूर्छादिप्रदत्वेनमलयनिलादेःस्मरगरलत्वनिरूपणात्स्मरस्य

सर्पत्वमाक्षिप्यते चरणपल्लवधेहीत्यनेन नायिकायां गारुडिकत्वे चेत्याक्षेपे रूपक
मिदं। अपरमपि सर्पादिविषं गारुडिकचरणाद्यभिघातेनाभिमंत्रितपल्लवाद्यारोप
णेन च शाम्यतीति ध्वनितं। किंच। मयि दारुणे दुःसहो मदनः कामस्तज्जनितं यत्कद
नं तापः स एवारुणः सूर्यज्वलति। अतस्तेन उपाहितविकारं ग्लान्यादिरूपं हरतु दूरीक
रोतु। अन्योपि सूर्यसंतापः शिरसि पल्लवादिस्थानशाम्यतीति ध्वनितं। अरुणः स्फुटरा
रागेस्यात्सूर्ये सूर्यस्य सारथाविति। कदनं कलुषे तापे च॥७॥ इतीत्यादि॥ ॥इति चटु
लचाटुपटुचारुमुरवैरिणो राधिकामधिवचनजातं। जयति जयदेवकविभारतीभू
षितं मानिनीजनजनितशातं॥८॥ इत्यनेन प्रकारेण मुरवैरिणः कृष्णस्य राधिकामधि

राधां लक्षीकृत्य प्रोक्तं। वचनजातं वाक्यसमूहो जयति। सर्वोत्कर्षेण वर्त्ततां। कीदृशं।
चटुलं मनोहरं। चाटुप्रीतियुक्तं। पटुचतुरं। चारुसुकुमारं। पुनः कीदृशं। जयदेवना
म्नः कवेः भारती भारतीसंज्ञा यस्या एवंभूता वाणी भूषिताऽलंकृता येन वत्तथा। मानि
नीजनेति। मानिनीजनस्य मानवतीलोकस्य जनितं शातं सुखं येन तत्तथा। जयति प
द्मावती रमण जयदेवकविभारती भणितमतिशातमिति पाठांतरे। पद्मावती जय
देवस्य पत्नी तस्याः रमणो वल्लभो यो जयदेवस्तेन भारती भारतीसंज्ञया कवित्वं वर्णि
तं। पुनः कीदृशं। अतिशातं। अतिशयितं सुखं यस्मात्तादृशं। भारत्या वाण्या भणितमि
ति तु व्याख्यानं मंदं। तथा सति पौनरुक्त्यापत्तेः प्रथमपाठस्तु समीचीन एव। तदुक्तर

सार्णवसुधाकरेशृंगारादिषुसर्वेषिष्टाहिनारतीतिशृंगारतिजकोपधानपुरुषप्रायंव स
क्रोक्तिनिरंतरानारतीवनवेष्टतिवीरहास्याद्भुताश्रयेति।चटुलःसुंदरेचलेइतिधरणिः।
चटुलचाटुप्रियवाक्यमितिहृद्दचंद्रः।पटुस्तीक्ष्णोनिरोगेवचतुरेम्पवदितिविश्वःशर्म
शातसुखानिचेत्यमरः॥८॥ ॥१९॥इदानीमात्मानंनिरपराधंज्ञापयन्संभोगार्थं
त्रोत्साहयन्नाह॥ ॥परिहरेति॥ ॥परिहरकृतातंकेशंकांत्वयासततंघनस्तनजघन
याक्रांतेपरानवकाशिनि।विशतिवितनोरन्योधन्योनकोपिमतांतरंत्रणायिनीपरी
रंभारंभेविधेहिविधेयतां॥९॥हेकृतातंकेविहितकोपेश्रीराधेत्वंशंकांममान्यका
मिनीसंभोगोजातइतिसंशयंपरिहरत्यजायतोममस्वांतेचित्तेश्वेतरमन्यंतरंवितनो १९६

स्तनुश्चेन्मात्कामादन्योधन्योजनःतादृशसोनाग्ययुक्तःस्त्रीलक्षणःकोपिनविशंति
नप्रविशतिकुतोनविशतीत्यतआहापरेति।परानवकाशिनिइतरावकाशशून्ये॥
तत्रहेतुमाहत्वयेति।घनेनिविडेस्तनजघनेयस्यास्तादृशत्वयासततंनित्यमेवांक्रां
तेव्याप्तेतथाच।सदात्वयापूरितेमदीयेहृदयेऽन्यस्यप्रवेशस्थलमेवनास्ति।सांग
स्यप्रवेशानावात्।अनंगएवपरंप्रविशतितस्यांगानावादित्यर्थः।देपणायिनि॥त।
स्मात्परीरंभारंभेआलिंगनोरंभेविधेयतांविधेहिकुरुत्यर्थः।आतंकःक्रोधशंकयो
रितिधरणि॥९॥यद्येवंनप्रत्येषितदामय्यपराधस्तुकृतंदंडमाचरेत्याहामुग्धेइ
ति॥ ॥मुग्धेविधेहिमयिनिर्दयदंतदंशादीर्घत्रिबंधनिविडस्तनपीडनानि।चंडित्वमे

वमुदमंचनपंचबाणचंडालकांडदलनादसवःप्रयांतु॥६३॥हेमुग्धेसुंदरिमूढेवा॥नि
र्दयंदयारहितंदंतदंशंदशनक्षतं॥अथच॥दोर्वल्लिबंधंभुजलताबंधनंनिविडंगाढंस्त
नाभ्यामापीडनंचविधेहिकुरु॥हेचंडि॥अतिकोपनेत्वमेवमुदमपराधिनोममदंडाच
रणेनानंद॥मंचप्राप्नुहि॥नपुनःपंचबाणःकामःसएवनिरपराधिजनहिंसकत्वेनचां
डालस्तस्यकांडदलनान्नाराचप्रहरणादसवःप्राणाःप्रयांतुनिर्गछंतु॥चांडालप्रहारेण
नसमीचीनागतिरतस्त्वयासाक्षादेवयथोचितदंडाचरणंविधेयमितिभावः॥तथाच
कामपीडयाप्राप्तदशम्यवस्थयातिकातरःसंभोगरूपंप्रसादंमानवत्याःसकाशाद्या
वतइतिध्वनिनितं॥चंडीस्यादतिकोपनेइत्यमरः॥६३॥ननुकोपोनास्त्येवेत्यतआह॥श

शिमुखीत्यादि॥ ॥शशिमुखितवभातिभंगुरभ्रूर्युवजनमोहकरालकालसर्पी॥
तदुदितभयभंजनाययूनांत्वदधरसीधुसुधैवसिद्धमंत्रः॥६४॥ ॥हेशशिमुखिचं
द्रानने॥तवभंगुरभ्रूःकुटिलाभ्रूर्भाति॥शोभते॥कीदृशी॥युवजनानांतरुणजनानां
मोहायसन्मोहनायकरालाभीषणाकालसर्पीकृष्णाहिवधूः॥अन्याभुजगीदृष्टामो
हयत्यसौदृष्टमात्रएवेत्यंतस्याःकरालत्व॥तदुदितभयभंजनायतस्याःसकाशादुदि
तंयद्भयंतस्यनाशाययूनांतरुणानांमल्लक्षणस्ययूतइत्यर्थः॥त्वदधरसीधुसुधैवत्व
दीयाधरसीधुर्मदिरविशेषःसएवसुधाअमृतं॥सएवसिद्धःसाधितोमंत्रः॥त्वमेवचे
दधरामृतंपाययसितदापरंतद्विषापहरणंभवेदन्यथानस्यादेव॥अतोऽधरपांनंद

त्वातवकोपसर्पदृष्टस्यममजीवनंसंपादयेतिभावः।ह्ये।एवमप्युत्तरमप्रलपंतीप्रत्या
ह।ह्येव्येयतीत्यादि॥ ॥व्यथयतिवृथामौनंतन्विप्रपंचयपंचमंतरुणिमधुरालापै
स्तापंविनोदयदृष्टिनिःसुमुखिविमुखीभावंतावद्विमुंचनमुंचमांस्वयमतिशयस्नि
ग्धेमुग्धेप्रियोयमुपस्थितः॥ह्ये।हेतन्विकृशांगितववृथामौनंनिःप्रयोजनवचन
संकोचोमांव्यथयति।पीडयति।कृशांग्याःतवएतावंतंकोपधारणमनुचितमिति
सूचनायतन्विपदोपादानं।तस्माद्वैपंचमंरागविशेषंप्रपंचयविस्तारय।हेतरुणि
मधुरालापैःमाधुर्यवर्षिस्वरालापैःमधुरवचनैर्वातापंममसंतापंविनोदयापसारय
।हेसुमुखिश्रीमन्नवदने।दृष्टिनिःकटाक्षावलोकैःविमुखीभावंभेदाख्यंविमुंच॥सु १९८

मुख्यास्तु।वैमुख्यमनुचितमितिभावः।हेमुग्धेःअयंप्रियःस्वयमेवआगतएवो
पस्थितः।आगतःकीदृशः।अतिशयस्निग्धः।अतिशयेनस्नेहवान्।अतोमांनमुंच।
स्वयमागतःहातुंनोचितमितिभावः।ह्ये।संप्रतिमानापनोदनायतदंगस्फुरतिंक
रोति॥ ॥बंधूकद्युतिबांधवोयमधरःस्निग्धोमधूकच्छविर्गंडश्चंडिवकास्तिनीलन
लिनश्रीमोचनंलोचनं।नासान्वेतितिलप्रसूनपदवीकुंदांनदंतिप्रियेकायस्त्वन्मुख
सेवयाविजयतेविश्वमपुष्पायुधः।ह्ह॥ ॥हेचंडिप्रियेअयंतवाधरोबंधूकद्युतिः
बांधवः।बंधुकस्यारुणपुष्पविशेषस्ययाद्युतिर्दीप्तिस्तस्याबांधवःसदृत्योषकइत्यर्थ
ः।अनेनबंधूकादपिश्रैष्ठ्यमुच्यते।अयंचस्निग्धोगंडःकपोलंमधूकच्छविर्मधिरद्युति

तपांडिम्नामधुकपुष्पस्येवछविःकांतिर्यस्यएतादृशश्चकास्तिशोभते।तेलोचनंनील
नलिनश्रीमोचनस्वकांत्यानीलोत्पलस्यकांतिमोचयतित्याजयतीतितादृशं।स्वभाव
एवनीलतारकत्वान्नीलंचक्षुरंजनेनविनापिसुतरांनीलोत्पलमप्यतिशेतइतिभाव
ःहेकुंदाभदंतिकुंदपुष्पस्येवाभायेषांतादृशादंतायस्यास्तादृशि।तवनासातिलप्र
सूनस्यपदवींतिलपुष्पप्रसिद्धिअभ्येति।प्राप्नोति।अत्येतिपाठेअतिक्रामतीत्यर्थः।प्रा
यइतितर्कयामिसप्रसिद्धःपुष्पायुधःपुष्पमेवायुधंशस्त्रंयस्यतादृशः।कामस्त्वन्मु
खसेवयाविश्वंजगतसेवते।कामःपंचभिरेवशरैर्विश्वंविजयते।त्वन्मुखेबंधूकमधूक
नीलोत्पलतिलकुंदपुष्पानिसंतीतित्वन्मुखादेवप्राप्तायुधः।कामोविश्वंविजयेतेइ

तिभावः।तथाच।रक्तपीतनीलकषायोज्वलेति।आकर्षणंवशीकरणोन्मादनद्राव
णशोषणेतिकामस्यशराःकथिताः।त्वन्मुखसेनयेतिपाठेत्वन्मुखमेवयासेनाकट
कंतेन।बंधूकोबंधुजीवेस्यादितिविश्वः।मधुपुष्पोमधुकश्चगुडपुष्पोमधुद्रुमइतिहा
रावली।६६।।दृशौतवेति।। ।।दृशौतवमदालसेवदनमिंदुमत्यास्पदंगतिर्जनमनो
रमाविधुतरंभमूरुद्वयं।।रतिस्तवकलावतीरचितचित्रलेखेभ्रुवावहोविबुधयौ।
वनंवहसितन्विपृथ्वीगता।।६७।। ।।हेतन्वित्वंपृथिवीगतापृथिव्यांप्राप्तासतीविबु
धयौवनंदेवयुवतीनांसमूहंअहोआश्चर्यंवहसिधारयसि।एकैकत्वेनैवांगेनदैवां
गनानांसौंदर्यतिरस्करोषीत्यर्थः।तदेवाह।दृशाविति।तवदृशौनेत्रेमदालसेमदेन

हर्षेणालसेमंथरे।तथाच।स्वर्गेएकैवमदालसाम्नीदेवांगनात्वंभुवनेएवद्वेमदाल
सेदधासीत्याश्चर्यमितिभावः।तववदनंइंदुमत्यास्पदः इंदुविषयिणीयामतिस्त
स्याआस्पदंविषयइत्यर्थः।तवमुखेऽयमिदुरितिमतिर्भवतितथाचेदुमतीदेवांगना
तस्याःसौंदर्यादप्यधिकशोभांमुखेनैववहसीतिश्लेषेणलभ्यते।तवगतिःगमनंज
नमनोरमालोकानांमनोहारिणी।अथवा।जनस्यमल्लक्षणभृत्यजनस्येति।तथाच
मनोरमानाम्नीदेवांगनातदात्मिका।अथवारमालक्ष्मीस्तदात्मिका।लक्ष्म्याःसौंदर्या
धिकंतवगत्यंतर्भूतंवर्त्ततइत्यर्थः।तवोरुद्वयंउरुयुग्मविधुतरंभंविधुतास्वशोभ
यातिरस्कृतारंभाकदलीयेन।तादृशं।तथाच।उरुसौंदर्येणतिरस्कृतारंभानाम्नीदेवां

गनापि।अथचातवरितःसुरतक्रीडाकलावतीकामकलाकौशलशालिनी।हाव
भावकिंलकिंचितमोदायितविघोकादिमतीत्यर्थः।तथाच।संभोगकौशलेनाल्पी
कृताकलावतीनाम्नीदेवांगनेतिभावः।भ्रुवौरचितचित्रलेखेनिर्मितविचित्रलेखे
चित्रितचित्रलेखेवा।रुचिरपाठेमनोहरेइत्यर्थः।तथाच।स्वर्गेएकाचित्रलेषा।अत्र
तुत्वद्भ्रूभ्यांचित्रलेखाद्वयंरचितमित्याश्चर्यमितिभावः।प्रेयोनामायमलंकारस्तदुक्तं
दंडिना।प्रेयःप्रियतराख्यानंरसवद्रसपेशलमिति।पृथ्वीकंचेदंछंदइत्यपिध्वनितं।
तथाश्लोकद्वयेनगुणकीर्त्तनमानवत्याःप्रसादनंकथितं।६७।कविःसर्गांतेआशिषं
प्रयुक्ते।प्रीतमिति॥ ॥प्रीतिंवस्तनुतांहरिःकुवलयापीडेनसार्द्धंरणेराधापीनपयोध

रस्मरणकृत्कुंभेनसंभेदवान्।यत्रस्विद्यतिमीलतिक्षणमथक्षिप्तद्विपेतत्क्षणात्कंस
स्यालमभूकितंजितमितिव्यामोहकोलाहलः॥६०॥हरिश्रीकृष्णःवोयुष्माकंगायतांशृ
ण्वतांप्रीतिमानंदतनुतांविस्तारयतु।भक्तानांक्लेशहारीतिहरिः।किंलक्षणं।रणेसंग्रा
मेराधायाःपीनौयौपयोधरौतयोःस्मरणाकृतं।संस्कारबोधौयाभ्यांतादृशौकुंभौय
स्यतथाविधेनकुवलयापीडेनहस्तिनासार्द्धंसंभेदवान्संसर्गवान्।अत्रप्रचुरशृंगा
रित्वंतथाचश्रीराधायांसर्वाधिकोभावस्तथाचश्रीकृष्णस्याद्भुतवीर्यंशृंगारविरोधिभ
यानकहेतुमहासत्वहस्तिसंग्रामेशृंगाररसाविर्भावेनवर्णितमितिज्ञेयं।तदेवाह॥
यत्रयस्मिन्रणेतत्कुंभदर्शनोद्बुद्धसात्विकविकारेणस्विद्यतिस्वेदंकृत्वति।पुनःके

नापिसुखोदयेनक्षणंमीलतिईक्षणंनिमीलतिसति।अथअथानंतरंतत्क्षणमेवक्षि
प्तद्विप।द्विपेक्षिप्तेहतेसति।कंसस्यालंअतिशयेनजितंजितंआवेगेनद्विरुक्तिःइति
व्यामोहकोलाहलोऽभूत।अयमर्थः।प्रथमंतावत्स्वेदमीलताभ्यांकंससभायांआ
नंदोजातःपश्चात्तत्क्षणमेवहतेगजेआवेगात्शत्रुणाजितंजितइति।अमुनाप्रका
रेणव्यामोहःमूर्छाकोलाहलःहाहाशब्दश्चाभवदित्यर्थः।यद्वा।उदितसात्विकविकारे
तादृशस्यदर्शनात्व्यामोहात्भ्रांत्याजितंजितमितिकोलाहलोऽभवदित्यर्थः॥६०॥
इतिश्रीगीतगोविंदेमानिनीवर्णनेमुग्धमाधवोनामदशमःसर्गः॥ ॥१०॥ ॥दश
मोनामप्रकारमनुवर्ण्येदानीमेकादशेसम्मानितायामानिन्याअभिसारमाह।सुचि

रेत्यादि॥ ॥सुचिरमनुनयेनप्रीणयित्वामृगाक्षींगतिवतिकृतवेशेकेशवेकुंजशय्यां
रचितरुचिरभूषांदृष्टिमोषेप्रदोषेस्फुरतिनिरवसादांकापिराधांजगाद॥६॥का
पित्रनिर्दिष्टानिधासखीराधांजगादबलाधे।कस्मति।प्रदोषेस्फुरतिसति।कीदृशे॥द
ष्टिमोषेदृशोमुष्णातिस्वविषयग्रहणासमर्थंकरोतीतितादृशे।रसोद्बोधकगाढांधका
रइत्यर्थः।पुनःकस्मति।केशवेमृगाक्षींहरिणनयनांश्रीराधांसुचिरंबकुकालंव्याप्यत्र
नुनयेनप्रीणयित्वाप्रसादयित्वाकुंजशय्यांलतागृहावेष्टितकुटीराभ्यंतरस्थशयनीयं
गतवतिगतेसति।सुचिरमित्यादिनातस्यांस्नेहाधिक्येनतद्वशतोकथितेतिध्वनितं॥
राधानुनयएवममपुरुषार्थइतिज्ञापनायसुचिरपदोपादानं।कीदृशेकेशवेकृतवे २०२

शेकृतानिसारेचितालंकारणे।अथवानिर्मितंश्रीराधामंडनार्थंविविधपुष्पादिलं
करणादिकंयेनतादृशे।कीदृशींराधां।रचितारुचिरामनोहरांभूषालंकृतिर्यया
तां।पुनःकीदृशींनिरवसादांनिर्गतोऽवसादःकृत्वागमनजन्यंश्रमःखंयस्यास्तां।कृत्वा
नुनयाविगतखेदामित्यर्थः।६॥तदेवगीतेनकथयति।विरचितेति॥ ॥विरचितं
चाटुवचनरचनंचरणेरचितप्रणिपातं।संप्रतिमंजुलवंजुलसीमनिकेलिशयन
मनुयातं॥१॥मुग्धेमधुमथनमनुगतमनुसरराधिकेतवविषादं॥गीतस्यास्यवसंत
रागःयतितालःतद्व्याख्यानंकथितंप्राक्।गीतार्थस्तु।हेमुग्धेसुंदरि।अनुगतमधुम
थनानुसरणंकृतविलंबादननिज्ञेवा।हेराधिकेरूपेणाधिकेसकलव्रजांगनातिश

यितसौंदर्येणमोहितंव्रजेंद्रनंदने।अथवा।स्वमाधुर्यवर्षिण्यावाण्यापंचमादिस्वरे
णवावशीकृतकृष्णे।वर्णितंचभगवत्प्रियैः।कृष्णसारहरपंचमस्वरे।मुंचगीतकौतुका
निराधिके।प्रेक्ष्यतेऽत्रहरिणानुधावतांत्वांनयावदतिभीषणोजनइतिरस्तुशब्देरूपेचे
त्येकाक्षरः।मधुमथनंमधुराक्षरसस्तंमथ्नातिविलोडयतीतितत्तथातंशृंगाररसा
स्वादचतुरमित्यर्थः।अथवा।मधुमथनंभ्रमरवत्त्वद्रसास्वादलंपटस्वं।अथवा॥
मधुवसंतंतंमथ्नातिक्षोभयतिसस्मरस्तंकंदर्पकोटिसुंदरमनुसरानुगच्छ।कीदृशं।
अनुगतं।तवःसौंदर्यलावण्यादिनाकृष्णःआनुकूल्येनत्वामनुसृतस्तं।अथवा।का
मेनाधिकइतिराधिकेशृंगारस्वभावइत्यर्थः।रस्तुकामइत्यप्येकाक्षरः।मधुवसंतं।अ

थकार्त्स्न्येनसर्वतोभावेननमतद्वशाभूत्वानुगतंसंकेतप्राप्तंप्रियंअनुसरः।क्रीडा
परामवेत्यर्थः।वसंतस्योद्दीपनविभावात्।अथवा।हेराधिकेअनुसर।नन्वनाहू
ताकथंव्रजामीतिचेदतआह।मधुनामाविदूषकोयंसमानस्तंमधुंनमस्कृत्यानुस
रेत्यर्थः।ध्रुवपदं॥अनुगतत्वमेवाह।विरचिताविहिताचाटुप्रियोक्तिःसमकोटि
प्राणवल्लभात्वमेवासित्वत्पादनखशोभयापिव्रजसुंदरीकदंबमपिनतुलयामि
तयास्वासाधारणगुणैर्वशीकृतोस्मित्वांविनाक्षणमपिस्थातुंनशक्तोहमित्यादिव
चनकदंबस्यरचनासंदर्भोयेनतादृशं।पुनःकीदृशं।तवचरणेंघ्रौरचितःप्रणिपातो
ऽवनतिर्येनतादृशं।अथवा।तवानयनायमच्चरणेरचितःप्रणिपातोयेनतादृशं।च

रणेसंकेताभिमुखगमनार्थमितिवा।विविधानुनयपूर्वकनमस्क्रियाकथनाया
त्ररचितपदोपादानं।तर्हिसंप्रतिकुत्रास्तीत्यतआह।संप्रतीत्यादि।संप्रत्यधुनामं
जुलोमनोहरोयोवंजुलोवेतसस्तस्यसीमनिपर्यंते।अशोकलतिकातटेइतियाव
त्।यत्केलिशयनंक्रीडाशय्यातामनुलक्षीकृत्ययातंगतं।तत्रस्थःत्वांप्रतीक्षतइ
त्यर्थः।वंजुलादीनामुद्दीपनविभावत्वेनपरिगणनादुपादानं॥१॥तांप्रोत्साहयं
तीत्वरयति॥घनेति॥ ॥घनजघनस्तनभारभरेदरमंथरचरणविहारं।मुखरित
मणिमंजीरमुपैहिविधेहिमरालनिकारं॥२॥ ॥हेसखि।उपैहिकृष्णमुपगच्छ।क
थंयथास्यात्दरेणसाध्वसेनमंथरश्चरणविहारःपदविन्यासोयत्रएवंयथास्या

त्।तत्रहेतुगर्भविशेषणेनसंबोधयति।घनयोनिर्विडयोर्जघनस्तनयोर्भारस्यभ
रोऽतिशयोयस्यास्तादृशि।मरालानांहंसानांस्वकीयमंथरगमनेनमंजीरशब्दे
नचनिकारंतिरस्कारंविधेहिकुरु।संप्रतिमरालेषुशब्दायमानेषुसत्सु।मंजीरादि
ध्वनिरपिमरालशब्दत्वेनैवलोकैर्ग्राह्यइतिसंप्रतियोग्योभिसारक्षणइतिध्वनितं
।अथच।हंसशब्दोयात्रायांशुभंसूचयतीतिगमनंप्रतिविलंबोनकार्यइतिभावः॥
तदुक्तंवसंतराजे।काष्ठासुसर्वास्वपिदर्शनेहंसस्यशब्देनचसर्वसिद्धिरिति।मरालो
राजहंसेस्यान्मरालोहंसमात्रकइतिधरणिः।निःकारस्यात्परिभवेधान्यस्योत्करणे
पिचेतिविश्वप्रकाशः॥२॥अन्यमप्युद्दीपनविभावंवर्णयति॥शृण्वित्यादि॥ ॥शृणु

रमणीयतरंतरुणीजनमोहनमधुरिपुरावंकुसुमशरासनशासनबंदिनिपिकनि
करेनजनावं॥३॥तरुणीजनानांमोहनंमाधुर्यातिशयेनमोहजनकंमधुरिपोःकृ
ष्णस्यरावंशब्दंकरकमलेनकरोमिचरणमहमागमितासिविडूरमित्यादीनिमधु
राणिसंनाषणानिमहाधुरमोहनात्पञ्चतस्वरग्राममूर्छनातानतालरागैरालापि
तंत्वरुणसंकेतितवेणुनादंवाशब्दंवाकर्ण्यवाकीदृशं।रमणीयतरमतिशयेनरमणी
यं।अतस्तरुणीजनानांमोहनं।मधुपविरावमितिपाठेमधुपानांभ्रमराणांविविध।
प्रकारेणरसोबोधकंशब्दं।अथवा।मधुःमधुररसःतंपिबतिअत्यासक्त्यास्वादयतीति
मधुपःश्रीकृष्णस्तस्यविविधप्रनयालापमितिमधुरिपुशब्देनापिभ्रमरश्लेषेणतस्य २०५

लापद्यंतरुणीगानपरत्वंचकथितंतथाचश्रीभागवते॥मधुरयागिरेति।कास्त्रीतिच।
पिकनिकरेकोकिलसमूहेकुसुमशरासनशासनबंदिनिसतिकुसुमान्येवशरास
नंधनुर्यस्यातादृशःकामस्तस्यशासनंतदाज्ञातया।बंदिनिस्तावकेसति।अथवाकुसु
मशरासनबंदितुंनमस्कर्तुंशीलमस्यतादृशो।कामाज्ञाकारिणिसतीत्यर्थः।नावंक
लेनुरागंनजात्राप्नुयात्।अथवा।कामाज्ञयाशब्दायमानेपिकनिकरेनावमनिप्रायंन
जापिकनिनदंश्रुत्वाउद्विक्तरमाप्रियतमसंभोगावसरेपिकादीनांरुतमिवकूजि।
तंप्रकटीकुर्वित्यर्थः।बंदिनस्तावकाइत्यमरः।अत्रापिपिकनिकरशंकारेणकृष्णस्य
मधुरस्वरोयात्रायांगीतवाद्यवत्शकुनमित्यपिध्वनितं॥३॥अपिच।अनिलेत्यादि।

अनिलतरलकिञ्जल्कनिकरेणकरेणलतानिकुरंबंप्रेरणामिवकरोरुकरोति
गतिंप्रतिमुंचविलंबं॥ध॥हेकरोरुकरःकनिष्ठातोमणिबंधपर्यंतंकरस्यबहि
र्भागस्तद्वन्निम्नोन्नतेऽरूप्यस्यास्तादृशि।गतिंगमनं।प्रतिविलंबंकालाद्धेपंमुत्सृज॥
अनिलेनवायुनातरलश्चलोयःकिञ्जल्कनिकरःनवपल्लवसमूहस्तत्स्वरूपेणक
रेणलतानिकुरंबंलतासमूहस्तवप्रेरणामिवकरोति।किञ्जल्कंपद्मलेनासमं
जसमसहमानोलतासमूहोपिलांप्रेरयतीतिविलंबोनकार्यइतिध्वनितं।शाकुन
शास्त्रेचवामेमधुरवाक्यहीरवृक्षःपल्लवितोऽग्रतःअनुकूलोवहन्वायुःप्रया
णेशुभसूचकइति॥समूहेनिकुरंबमस्त्रियामित्यमरः।मणिबंधादाकनिष्ठंकर २०६

रस्यकरोबहिरित्यमरःप्रेयोनामालंकारः॥ध॥अपिच।स्फुरितमित्यादि॥ ॥
स्फुरितमनंगतरंगवशादिवसूचितहरियरिरंभंष्टछमनोहरहारविमलजलधा
रमसुंकुचकुंभं॥य॥असुंकुचकुंभंस्तनकलशंष्टछसखीसमीचीनमसमीचींवा
वदतीतिप्रश्नेऊरुःकीदृशं।स्फुरितंसकंपं।कस्मादिव·अनंगतरंगवशादिवअनं
गस्यकामस्ययस्तरंगःऊर्मिस्तद्वशादिवअत्रानंगतरंगेत्सनेनतस्यारसनतरंगि
णीत्वमाक्षिप्यते।अन्योपिकुंभोनद्यांतरंगैःप्रेर्यमाणःसकंपोभवतीत्ययमपितेऊ
चुंभस्त्वियमतरंगिण्यामनंगतरंगैःप्रेरणादिवसकंपइतिभावःइवशब्दोऽत्रो
त्प्रेक्षाद्योतकः।पुनःकीदृशंमनोहरोयोमुक्ताहारःसएवविमलानिर्मलाजलधारा।

यत्रतादृशं।अत्रस्तनोपरिस्थितस्यहारस्यजलधारत्वरूपणात्स्तनस्यपूर्णकलशत्वे
नरूपणमाक्षिप्यते।पूर्णदेवकलशात्तरंगैरांदोलनेसतिबहिर्जलधारानिःसरण
संभवात्पुनःकीदृशं।सूचितोहरेःकृष्णस्यविरहतापहरणार्घरिरिति।परिरंभआ
लिंगनंयेनतादृशं।नारीणांस्तनकंपःप्रियसंगमंसूचयतीतिकुशाग्रनिकातउक्तं।।
नित्यंनार्याःस्तनेकंपःप्रियसंगमसूचकइति।पूर्णकलशत्वेनस्तनरूपणमपिया
त्रायांपूर्णकलशादर्शनंश्रुतसूचनायाथासख्याःसकाशाद्व्रजंतींवत्साद्वाअधिगत
मित्यादि।। ।।अधिगतमखिलसखीभिरिदंतववपुरतिरतिरणासङ्गंचंडिरसित
रसनाश्वडिंडिममभिसरसरसमलक्तं।।इदंतववपुःसखीभिःअभिशायेनरति २०७

रणायसुरतसंग्रामायसङ्गं।कृतालंकारणादिसंविधानमधिगतंज्ञातं।अथवासखी
भिरिदंतववपुर्बकुधारतिरणेसङ्गमधिगतंइदानींतासांकालक्रेतिभावः।अतोद्
चंडिरतिरणरंगकर्कशा।अलक्तंनिःशंकंसरसंसोत्साहं।अथवारसःशृंगाररसस्त
त्सहितंसरागंवा।रसितःशब्दायमानंकृतोरसनायाःकांच्यारवोध्वनिर्डिंडिमोवाद्यवि
शेषोयत्रएवंयथास्यात्तथाभिसर।श्रीकृष्णाभिमुखंसुरतरणसंकेतभूमिमुपेहि।
अन्यत्रापिसोत्साहरणेडिंडिमस्ताद्यतएवेतिध्वनितं।अभिरमेतिपाठेअलक्तक
जारहितंश्रीकृष्णेनसहसुरतंविधेहि।संभोगादौलक्तकयात्रानुपयोगत्वात्।अलक्तमि
त्यत्रकिंच।क्वचिदात्मनेपदिनोपिपरस्मैपदिनएवयथा।चलद्बाधंराधामित्यादि

वलद्बाधमित्येतत्पदंदुर्गसिंहटीकायांप्रमाणीकृतंतथैवानिरमेत्यपिपदंज्ञेयं।त
त्रक्रियांविशिनष्टि।सरसमिति।हावनावोदायितकुहिमितै।रनिःरसःशृंगारस्तत्र
हितंयथास्यात्तथा।पुनःकथंयथास्यात्रसितरसनारवडिंडिमंयथास्यात्।अनेनवि
परीतसुरतमितिध्वनितं।ननुसखीनिर्लज्जयामितत्राह।सखीनिःज्ञातमेवत्रतो
विलंबोनकार्यइति॥६॥स्मरेत्यादि॥ ॥स्मरशरसुभगनखेनसखीमवलंब्यकरेण
सलीलं॥चलवलयक्वणितैरवबोधयहरिमपिनिजगतिशीलं॥७॥ ॥हेसखिक
रेणसखीमवलंब्यसलीलंलीलासहितंयथास्यादेवंचलगच्छ।स्मरस्यकामस्यये
शरास्तत्रसुभगाःसुंदरानखायस्मिंस्तादृशेना।अन्यस्मिन्नपिरणेशस्त्राणिनवंति। २०८

रतिरणेतुत्वन्नखाएवस्मरस्यशस्त्राणीतिभावः।अथच।वलयक्वणितैःकंकणश
ब्दैःहरिमपिनिजगतिशीलं।स्वकीयगमनस्वभावंवा।गतिंप्राप्तिंशीलंचरित्रंअ
वबोधयज्ञापय।अन्यत्रापिसमीचीनोयोद्यप्रतिभटमवहितंकृत्वैवयुध्यतइति
ध्वनितं।निगदितशीलमितिपाठेकथितस्वभावमित्यर्थः॥७॥श्रीजयदेवेत्यादि॥ ॥
श्रीजयदेवभणितमधरीकृतहारमुदासितवामं।हरिविनिहितमनसामधितिष्ठ
कंठतटीमविरामं॥८॥ ॥इदंश्रीजयदेवेनभणितंहरिविहितमनसांहरौविनिहि
तंतत्परंमनोयेषांतादृशानां।अविरामंअनवरतंकंठतटीअधिष्ठितुकंठदेशे
वसत्वित्यर्थः।कीदृशं।अधरीकृतंस्वगुणैर्हीनःकृतःहारोयेनतादृशं।पुनःकीद

शं।उदासितस्वमाधुर्येणतिरस्कृतावामायेनतादृशं।अविरामिति।भणितस्यवि
शेषणंवा।कीदृशंनित्यमित्यर्थः।कंठस्थितस्यहारस्यरामायाश्चविषयिणांशोभाप्र
दत्वंचभवति।श्रीजयदेवस्यभणितंमहत्तमैःकंठेधृतेएतस्यमाधुर्यास्वादनेनतयो
ःतिरस्कारोजायतइतिभावः॥८॥ ॥२०॥पुनरपितस्योत्कंठाधिक्यंकथयंतीत्वर
यति।सामांद्रेति॥ ॥सामांद्रक्षतिवक्ष्यतिस्मरकथांप्रत्यंगमालिंगनैःप्रीतिंयास्यति
रस्यतेसखिसमागतिसंचिंतयन्।सत्वांपश्यतिवेपतेपुलकयत्यानंदतिस्विद्यति।
प्रत्यगच्छतिमूर्छतिस्थिरतमःपुंजेनिकुंजेप्रियः॥७०॥हेसखिसाराधाआगत्यमां
दृक्ष्यति।ईक्षिष्यते।दृष्ट्वापिमांस्मरकथांस्मरक्षोभेनस्खलितमधुरवक्रोक्तिं।कंदर्प्प

केलिसूचिकांकामकथांवक्ष्यति।कथयिष्यति।स्मरालापंकृत्वासाप्रत्यंगंप्रत्यय
वंसमालिंगनैःप्रीतिंयास्यति।युक्तापिमयासहरंस्यतेकेलिंकरिष्यति।इतिचिंता
कुलःसकृष्णःस्थिरतमःपुंजेस्थिरांधकारसमूहेनिकुंजेत्वांपश्यतिसमागमसाध्व
सेनवेपतेपुलकयति।अंगानीति।अर्थात्तवालिंगनविभाव्यस्पर्शसुखेनरोमां
चयुक्तोभवतीत्यर्थः।आनंदतिसंभोगक्रीडांपरिकल्प्यानंदयुक्तोभवति।तेनैव
संभोगश्रमेणखिद्यते।प्रस्वेदयुक्तोभवति।पश्चात्सुरतांतेपुनरपिसकृष्णंदृष्ट्वाऽनि
छयागछंतींप्रत्यगच्छतिप्रत्यगच्छानंगत्वाऽनुगछति।त्वांमदृष्ट्वामूर्छतिमूर्छांप्राप्नोति
।अथवा।सप्रियतमः।अत्युत्कंठयात्वांपरोक्षेपिदृष्ट्वाप्रत्यगच्छानंकरोति।दर्शनेन

निर्वृतोभूत्वाकंपुलकस्वेदादिसात्विकविकारान्प्रकटयतीत्यर्थः।साक्षात्समागमे॥
कीदृशोरसोदयोभविष्यतिकेनवक्तुंशक्यतेऽतःशीघ्रंगंतव्यमितिभावः।प्रत्यंगमालिं
गनेनवृक्षाधिरूढलक्षणमालिंगनमुक्तः।शार्दूलविक्रीडितंवृत्तं।दीपकालंकारः।७०
श्रीकृष्णस्यप्रेमानुवर्ण्येदानीमभिसारोचितनिविडांधकारस्योद्दीपनत्वमनुवर्णयं
तीपुनरपित्वरयति।अक्ष्णोरिति॥ ॥अक्ष्णोर्निक्षिपदंजनंश्रवणयोस्तापिछगुंछा
वलिंमूर्ध्निश्यामसरोजदामकुचयोःकस्तूरिकापत्रकं।धूर्त्तानामभिसारसत्वरहृ
दांविष्वङ्निकुंजेसखीध्वांतंनीलनिचोलचारुसुदृशांप्रत्यंगमालिंगति॥७१॥हेसखि
ध्वांतंअंधकारःनिकुंजेलतामंडपेविष्वक्सर्वतःसुदृशांसुंदरलोचनानांधूर्त्तानांप

रवंचकानांअभिसारसत्वरहृदां।अभिसारेसत्वरंतीव्रंहृद्यासांपरमविदग्धवि
लासिनीनामित्यर्थः।तासांप्रत्यंगंप्रत्यंवयंआलिंगति।आश्लिष्यति।किंकुर्वन्।
अक्ष्णोर्नयनयोरंजनंकज्जलंनिक्षिपदर्पयत्।श्रवणयोःश्रोत्रयोस्तापिगुंछा
वलींप्तमालस्यस्तबकपरंपरांनिक्षिपत्।मूर्ध्निमस्तकेश्यामसरोजदाम।नीलकम
लमालांनिक्षिपत्।कुचयोस्तनयोःकस्तूरिकापत्रकंमृगमदचित्ररचनांनिक्षिपत्
।कीदृशंध्वांतं।नीलनिचोलचारु।श्यामप्रच्छदवत्सुंदरं।अभिसारोचितवस्त्रभूष
णादिकंसर्वंध्वांतमेवकरोतीर्थः।अतोभूषणादिनिर्माणेनापिकालातिक्रमोनयु
क्तइतिभावः।शार्दूलंवृत्तं।तथास्त्रीणामलंकरणादिरचनाधिकारोनपुंसकादीनामे

वेतिनपुंसकनिर्देशेनध्वनितं।अपिचाऽपामसुंदरेणैवमर्वन्नूषादिकंसंपादनंयमि
त्यनेमंडनविलंबेनेतितस्मादृश्यातध्वनितं।धूर्त्तःस्माद्यंचकेलोलेच॥७१॥किंचानवा
दृशीनांप्रेमपरीक्षाकारणमप्येतदित्याहेाकाश्मीरेत्यादि॥ ॥काश्मीरगौरवपुषा
मन्निसारिकाणामाबद्धरेखमन्नितोरुचिमंजरीन्निः।एतन्नमालदलनीलतमंतमिस्रं
तत्स्नेयस्नेमनिकषोपलतांतनोति॥७२॥काश्मीरवत्कुंकुमवत्गोरंशरीरंयासां
तादृशीनामन्निसारिकानांअन्निसारपराणांनायिकानां।अन्नितःसर्वतःरुचिमं
जरीन्निःकांतिपरंपरान्निः।आबद्धरेखमाबद्धारेखायेनतादृशंएतन्नमालदलनी
लतमंतमालवत्पत्त्रवदलतिश्यायेननीलंतमिस्रंतमस्तत्स्नेमहेमनिकषोपल २११

तांतासामन्निसारिकाणांयत्स्नेमतदेवहेमस्वर्णंतस्यनिकषोपलतांकषपाषा
णतांतनोतिविस्तारयति।परमकांतिमतीनांएतादृशेपिगाढांधकारेकांतारेस
र्वमुपेक्षकांतान्निसारवस्थानेनप्रेमाःश्रुद्धिःपरीक्षतइतिभावः॥७२॥परमवि
दग्धासखीरसोद्बोधवचनकदंबैःसंकेतनिकुंजसमीपमानीयलज्जावतींपुनरपि
निकुंजवेश्मायादिशतिहारावलीति॥ ॥हारावलीतरत्नकांचनकांचिदाममंजी
रकंकणमणिद्युतिदीपितस्म।द्वारेनिकुंजनिलयस्यहरिंनिरीक्ष्यव्रीडावतीमथ
सखीमियमित्यवाच॥७३॥अथअथानंतरंइयंसखीसखीश्रीराधांप्रतिवक्ष्यमा
णमुवाचाकीदृशी।निकुंजनिलयस्यहारावल्योहारपंक्तियस्तरलोमध्यमणिःका

चनकांचिदामस्वर्णखचितमेखलादाममंजीरनूपुरंकंकणंकरन्यूषणंएतेषुखचि
तायेमणयस्तेषांद्युत्यादीपितस्यप्रकाशितस्यातरत्नश्चेचलखंडेहारमध्यमणावपी
तिविश्वःनिलयश्चोरमंदिरमितिरत्नकोषगश्चतदेवगीतेनाहामंजुतरेति॥ ॥मंजु
तरकुंजतलकेलिसदने।प्रविशराधेमाधवसमीपमिहविलसतिरत्नसहसितवद
ने॥१॥गीतस्यास्यविराडीरागःमंठतालःगीतार्थस्त्विहराधेमाधवसमीपंहल्ला
तिकंप्रविश।इहमंजुतरकुंजतलकेलिसदने।मंजुतरंयत्कुंजतलंनिकुंजोस्यंत
रदेशस्तदेवकेलिसदनंक्रीडामंदिरंतत्रविलसविलासंकुरुकीदृशि।रतिरत्नसे
नसुरतोत्साहेनहसितंहास्ययुक्तंवदनंमुखंयस्यास्तादृशि।रतिरत्नसहसितंवि २१२

द्यतेऽस्यासौरतिरत्नसहसितवान्कृष्णस्तस्यानंःप्राणोयस्यांसातत्संबोधनमिति
वा।श्रीकृष्णस्यप्राणरूपेइत्यर्थः।अथवा।इहनिकुंजेप्रविशमाधवसमीपंविलस
संभोगंकुरुहेमंजुतरकुंजतलकेलिसदने।मनोहरतरंकुंजतलमेवक्रीडागृहं
यस्यास्तादृशि।अथवा।इहमाधवेविलसः।कीदृशे।मंजुतरकुंजतलकेलिसदनं।
यस्यतादृशे।पुनःकीदृशे।रतिरत्नसेनहसितंवदनंयस्यतादृशे।प्रविशराधेमाध
वसमीपमिहविलसेत्यंतंध्रुवपदं।प्रतिपदमनुवर्त्तमानत्वात्।माधोर्नातस्याःध
वःसौंदर्यनिधानइत्यर्थः।वल्लभायाःसमागमेनिरवधिसौंदर्यप्रकटनात्माध
वपदमुपात्तं।कुंजतरपाठेप्रकृष्टकुंजइत्यर्थः।१।अपिचानावति॥ ॥नवलसहशो

कदलशयनसारेप्रविशराधेमाधवसमीपमिहसकुचकलशतरलहारे॥२॥कीदृ
शेकेलिसदने।नवनूतनंलसतशोभायमानंयदशोकदलंअशोकपत्रंतन्निमितश
यनंशय्यातदेवसारोयुवतीनांमहोधनंयत्रतादृशेमाधवसमीपंप्रविशशय्यायांवि
लसेत्यन्वयः।एवंभूतप्रेष्टशय्यायांप्रविशविलसचेतिवा।कीदृशी।कुचकलशयो
स्तनकुंभयोस्तनतरलश्चंचलोहारोयस्यास्तादृशि।अपरस्मिन्नपिविलासगृहेम
हाधनंतिष्टतीतिध्वनितं।कुचकलशतरलहारेइत्यनेनविपरीतसुरतंसूचितं।त
त्रकलशहारयोःसंभोगारंभेमंगलाचरणमिवध्वनितं।अथवा।नवलसदृशोकद
लैःकृष्णनिर्मितशय्यायांसारःश्रैष्ठ्यंयस्याःसा।भावप्रधाननिर्द्देशःतस्यसर्वस्वरूपेइ २१३

त्यपितस्याएवसंबोधनंअथवा।तादृशंशयनमेवसारोयस्यास्तादृशिअथवाइह
माधवेविलस।कीदृशे।त्वदर्थरचितशयनमेवसारोयस्यतादृशे।अथवा।नवदशो
कदलशय्यायांवरांगनायामहाधने।पुनःकीदृशे।पुरुषकर्तृसंभोगादौत्वत्कुचक
लशयोरुपरिचंचलोहारोयस्यास्तादृशे।अशोकदलपदेनाशेषविरहदुःखानि
आनंदावाप्तिश्चभविष्यतीतिध्वनितं॥२॥कुसुमचयेति॥ ॥कुसुमचयरचितशुचि
वासगेहे।प्रविशराधेमाधवसमीपमिहविलसकुसुमसुकुमारदेहे॥३॥हेराधे
इहकुसुमचयेनपुष्पसमूहेनविचित्रवितानैर्विविधमंडनादिभिःशुचिःअनुप
हतंअनुपभुक्तं।अथवाशुचिःशृंगारःतत्स्वरूपंशृंगारप्रधानानांभोग्ययोग्यंवाकृ।

क्लेननिर्मितत्वभोगार्थवासगेहेलीलागृहंतत्रविलसा।कीदृशिसुकुमारादपिसुकु
मारोदेहोयस्यास्तादृशि।अथवाइहमाधवेविलसाकुसुमचयेनरचितंशुचिवासा
गेहंयेनतादृशेा।पुनःकीदृशेा।कुसुमादपिसुकुमारोदेहोयस्यतादृशा।अथवाकु
सुमचयेनरचितंअर्थात्कुल्लेनवासगेहंयस्यास्तादृशीतिसंबोधनं।प्रविशराधे।।प्र
कृष्टोविसरःप्रणयःआसम्यक्कंधःकंपःप्रकृष्टस्तद्दीप्तप्रणयकंपःसमग्रसात्विकविका
रःयस्यास्तादृशिइत्यपिसंबोधनं।श्लेषकथनेसषष्ठ्यानामनेदृश्त्यलंकारिकाः।तथाच
।तादृशाराध्यारचनेनतस्यत्वयिभावःत्वमपितत्समीपेउदितसात्विकविकारेविल
सेत्यर्थः।युवेधःकंपनेतथेतिचाप्रसरःप्रणयेवेगेविसरःप्रसरेंबुजेशतिविश्वः।हेकु २१४

सुमसुकुमारदेहे।कोदृथिव्यांसुशोभनानामाशोभनायस्यसकुसुमः।श्रीकुल्लस्तस्यसु
सुतरांकुःअनीप्सितत्वेनाश्रयोयोमारःकामस्तद्रूपोदेहोयस्यास्तादृशि।हल्लानि
ःकांक्षितरसरूपेइत्यर्थः।राचलेत्यादि॥ ॥चलमलयवनपवनसुरभिशीते॥प्रवि
शराधेमाधवसमीपमिहविलसरतिवलितललितगीते॥ध॥ ॥हेराधेमाधवसमी
पंचलव्रज।इहकलिसदनेप्रविशविलसचाकीदृशेकेलिसदने।मलयवनसंब
धीयःपवनोवायुस्तेनसुरभेशीतेचाअथवाचलश्चंचलोयोमलयपवनस्तेना।वि
लासिनीनांमनांसिचालयतीतिचलपदेनमांद्यमेवोक्तंकीदृशिरतौवलितंवर्द्धि
तंललितंहारविशेषएवगीतंययातादृशि।अथवारतिवलितेरतौमनोद्रेकलवली

कामधेनूइति।ललितगीतेनललितंकमनीयंगीतंगानंयस्यास्तादृशि।रतिवलिता
चासौललितगीताचतस्याःसंबोधनं।रसवलितपाठेरसवलितंशृंगारसंनिन्नेलजि
तंमनोहरंयस्यास्तादृशि।रससहितंहावविशेषोगीतंयस्यास्तादृशीतिवा।अथवा।
इहकक्षेविलसाकीदृशो।रत्यातवप्रेमणावलितंसंनक्तंललितंमनोहरंगीतंतव।
गुणगानंयस्यतादृशो।रसवलितंवा।ललितलक्षणंज्ञानानाविधमनोहार्यस्वभाव
जमनोहरंशृंगारचेष्टितंस्त्रीणांललितंसंप्रचक्ष्यते॥ध॥विततेति॥ ॥विततबकुवल्लि
नवपल्लवने।प्रविशराधेमाधवसमीपमिहविलसचिरमलसपीनजघने॥५॥ ॥हेरा
धेमाधवसमीपंप्रविशइहकेलिसदनेचिरंविलसचाकीदृशो।विततेविस्तीर्णेबकु। २१५

निर्वक्त्रीनांलतानांनवैःपल्लवैर्घनेसांद्रे।एवंभूतेशयनेवा।त्वंकीदृशि।अलसपीन
जघने।अलसेमंथरेपीनेजघनेयस्यास्तादृशि।अनेननयनिर्नयंबकुकालंज्ञाप्या
यांसंभोगसुखानुभवंध्वनितंज्ञतिव्यंग्यं॥५॥मधुमुदितेत्यादि॥ ॥मधुमुदितमधु
पकुलकलितरावेप्रविशराधेमाधवसमीपमिहविलसमदनरसरभसभावे॥
॥हाकीदृशोकेलिसदनेमधुनापुष्परसेनमुदितान्यानंदितानियानिमधुपकुलानि
भ्रमरसमूहास्तैःकलितोविदितोरावःशब्दोयत्रतादृशो।अथवा।मधुमुदितमधुमकु
लवत्।त्वदागमनमहोत्सवेरावैःशब्दोयस्यतादृशोमाधवे।तस्याःश्रीराधिकायाःसंबो
धनंवा।कीदृशि।मदनस्यकामस्ययोरसःशृंगाराख्यस्तत्रयोरभउत्साहस्तेनउपल।

क्षितोभावोयस्यास्तादृशि।अथवा।इहमाधवेविलस।कीदृशेमदनरसेनयोरभसस्ते
नोप।लक्षितोभावोयस्यतादृशे।सरसभावेइतिपाठेसरसःसरागःभावोऽभिप्रायोय
स्याः।यद्यपिमधुपेत्यनेनैवमधुपानंप्राप्तंतथापितदानींतनमधुपानप्राप्तयेमुदित।
मित्युपात्तमधुनावसंतेनवा॥६॥मधुरतरेति॥ ॥मधुरतरपिकनिकरनिनदमुख
रे॥प्रविशराधेमाधवसमीपमिहविलसदशनरुचिरुचिरशिखरे॥७॥ ॥कीदृशे
केलिसदनेमधुरतरोऽतिशयेनमधुरोयःपिकनिकराणांकोकिलसमूहानांनिनद
ःशब्दस्तेनमुखरेवाचाले।अथवा।संबोधनं।तदामधुरतरःपिकनिकराणामिवयोनिन
दःसुरतेकंठकूजितैंतेनमुखरे॥पुनःकीदृशि।दशनरुचिरेवदंतकांतिरेवरुचि

रंशिषरंमाणिक्यविशेषोयस्यास्तादृशि।अथवा।दशनरुचिवत्रुचिरंशिषरं।
माणिक्यविशेषस्तादृशीदंतकांतिर्यस्यास्तादृशि।द्वितीयपक्षे।विपर्यासोपंमाबो
ध्या।तदुक्तंदंडिनात्वदानतमिवोन्निद्रमरविंदमभूदिति।शिषरादपिरुचिरादंतकां
तिरित्यर्थः।अथवा।इहमाधवेविलस।कीदृशे।दशनरुचिरुचिरशिखरे।मधुतर
पाठे।मधुनातरलश्चंचलइति।पक्वदाडिमबीजाभंमाणिक्यंशिषरंविदुरितिशाश्व
तः॥७॥विहितेति॥ ॥विहितपद्मावतीसुखसमाजे॥कुरुमुरारेमंगलशतानिभ
णतिजयदेवकविराजराजे॥८॥हेमुरारेजयदेवकविराजराजे।मंगलशतानिकु
रु।कीदृशे।भणतितवगुणान्वदति।पुनःकीदृशे।विहितःकृतःपद्मावत्याःश्रीवृं

दावनलक्ष्म्याः सुखसमाजः सुखसमूहो येन। तादृशे। अथवा। कविराजराजे भणति
सति गायति सति। किंभूते विहितस्तव सुखरूपः समाजः प्रियसंगमो येन तादृशे। किं
च। कविराजराज इति प्रौढोऽयं कविस्तदुक्तं। यथोचितनिजोत्कर्षवादी प्रौढ इति रित
इति तद्रहस्यवर्णनेन सर्वाधिक्यादपि युक्तमेव कविराजराज इति॥ ८॥ ॥२१॥ वैचि
त्र्यंतरेण प्रेरयति। त्वामित्यादि॥ ॥त्वां चित्तेन चिरं वहन्नयमतिश्रांतो भृशं तापितः
कंदर्पेण च पातुमिच्छति। सुधासंबाधबिंबाधरं। अस्यांकं तदलं कुरु क्षणमिह भ्रूक्षे
पलक्ष्मीलवक्रीते दास इवोपसेवितपदांभोजे कुतः संभ्रमः॥७४॥ अयं कृष्णः अन्या
भिः सुंदरीभिः दुःप्रापः त्वया सुलभत्वेन वशीकृतस्त्वां चित्तेन मनसा वहन् धारयन्

अतिश्रांतोऽतिशयेन श्रमयुक्तो जातः। कंदर्पेण कामेन च भृशमतिशयेन तापित
ः। संतापितः अतिशूक्ष्मे चित्ते पीनस्तनजघनवत्यास्ते धारणेन श्रमो युक्त एव। अन्यो
पि यो धर्मे गुरुतरभारोद्वहनं करोति तस्याप्यतिश्रमो भवतीति भावः। अतस्तवै
व सुधयामृतेन संबाधं संकटं बिंबाधरं बिंबफलसदृशमधरमोष्ठं पातुमिच्छति। एत
दपि युक्तमेव। श्रांतस्य तप्तस्य पानेच्छापथ्यमेव। तत्तस्माद्धेतोरस्य कृष्णस्यांकं क्रोडं
क्षणं त्वमलं कुरु भूषय। तन्वयं बहुनायकानुरक्तोऽतस्तदंकारोहणाद्बिभेमीत्यत
आह। इह कृष्णे कुतः कस्माद्धेतोः संभ्रमः भयं। कीदृशेः उपसेवितं त्वदीयचरणकम
लं येन तादृशे। उपसेवितेति नित्यपार्श्ववर्त्तिनीति भावः। तत्रापि हेतुगर्भविशेषणमाह।

भ्रूक्षेपेति॥ ॥भ्रूक्षेपस्य भ्रूचालनस्य या लक्ष्मीः संपत् तस्याः यो लेशस्तेन क्रीते। दा
सजने संभ्रमो न युक्त इति भावः। संभ्रमः स्याद्धरे भीतौ संगमे पि चेति विश्वः।७४। सेत्या
दि॥ ॥सा ससाध्वससानंदं गोविंदे लोललोचना। सिंजानामंजुमंजीरं प्रविवेश निवे
शनं॥७५॥ ॥साराधा निवेशनं क्रीडागृहं प्रविवेश। प्रविष्टा। किं कुर्वाणा। मंजुर्मनो
हरो यो मंजीरो नूपुरस्तं शिंजानासशब्दं कुर्वती। शिंजानमंजुमंजीरमिति पाठे सिंजा
नश्चासौ मंजुमंजीरश्च तद्यथा स्यादिति क्रियाविशेषणं। प्रविवेशेति तन्मोहनाय कि
मपि हावादिकं प्रकटयंती प्रविवेशेति भावः। कथं यथा स्यात्। ससाध्वसं साध्वसस
हितं सानंदमानंदसहितं च यथा स्यात्तथा कीदृशी सा। गोविंदे लोले लोचने यस्याः

ः। सिंजानामंजुमंजीरमित्यनेन कंपः सात्विकस्तेन पादस्खलनं हर्षसाध्वसौ व्य
भिचारिभावौ लोललोचने इत्यनेनानुभावः। कटाक्षरूपः। यद्वा। चापल्यो व्यभिचा
रीभावः एवं नागरयोः समागमे रसोत्पत्तिरुक्ता॥७५॥ लीले गृहे प्रवेशं निरूप्येदा
नीं दर्शनमहोत्सवेन रसविक्रियां गीतेनाह राधावदनेत्यादि॥ ॥राधावदनविलो
कनविकसितविविधविकारविभंगं। जलनिधिमिव विधुमंडलदर्शनतरलिततुं
गतरंगं॥१॥ हरिमेकरसं चिरमभिलषितविलासं। सा ददर्श गुरुहर्षवशंवदव
दनमनंगनिकासं॥ ध्रुवपदं॥ गीतस्यास्य विराडी रागः। रूपकतालः। तीतार्थस्तु
। साराधां हरिं कृष्णं ददर्श। दृष्टवती। कीदृशं। एको मुख्यो शृंगाराक्षो रसो यस्य तं। अ

थवा।एकएवराधाविषयोरसः।सर्वातिशयितरागोयतोराधायाादृशःरसः
कृष्णस्यापिताादृशएवेतिवा।समानशीलत्वात्।समानशीलव्यसनेषुसख्यमि
तिरसपोषणंभवतीतिभावः।पुनःकीदृशं।चिरंबैकुकालंव्याप्यअनिलषितोवा
छितस्तत्संबंधीविलासःकेलियेनतं।पुनःकीदृशं।गुरुर्महानयःप्रियाप्राप्त्याद्
र्षआनंदस्तस्यवशंवदमायत्तंवदनंयस्यतं।अनेनउद्भटविकारउक्तेःसंवरणा
योग्यत्वेनतदधीनत्वात्।पुनःकीदृशं।अनंगनिकाशं।कामसदृशं।अनंगनि
कासमितिपाठेकामस्यनिकासःस्फूर्त्तिर्यस्मिंतं।गुरुर्हर्षवशंवदवदनमनेनद्
रनुरागान्निलषितविलासत्वेअवगतेइतिभावः।तउक्तं।आकारैरिंगितैर्गत्या २१९

चेष्टयाभाषितेनचानेत्रवक्त्रविकारात्प्रांज्ञायतेऽतंर्गतंमनःइति।ध्रुवपदं।अथ
पदानि।राधेत्यादि॥ ॥पुनःकीदृशंहरिराधायावदनंमुखंतस्यविलोकनेन
वीक्षणेनविकसिताउज्जृंभिता।विविधाःनानाविधाःविकाराजृंभणांगक्षेपणक
रविमर्शादिरूपास्तएवविभंगाः।विशिष्टोर्मयोयस्मिन्नतं।कमिवजलनिधिमिव
समुद्रमिव।कीदृशंजलनिधिं।विधुमंडलस्यचंद्रमंडलस्यदर्शनेनतरलिताश्चेत
लीकृतास्तुंगाश्चत्फेनास्तरंगाऊर्म्मयोयस्यतादृशं।अत्राशृंगाररसाश्रयत्वेनऊ
क्तस्यजलनिधिसाम्यं।राधामुखस्यस्वाक्षादकारिकादिनाचंद्रसाम्यं।जृंभणादिरू
पविकारस्योत्तरोत्तरोत्पत्ततयातरंगसाम्यंबोध्यं।उपमालंकारश्च॥१॥विकारंनेवा

हाहारमिति॥ ॥हारममलतरतारमुरसिदधतंपरिरभ्यविदूरं।स्फुटतरफेनक
दंबकरंबितमिवयमुनाजलपूरं।२।पुनःकीदृशं।कृष्णंविदूरमतिशयेनपरिरभ्या
लिंग्यउरसिवक्षसिहारंदधतंबिभ्राणं।कीदृशंहारं।अमलरोतेऽतिशयेनविम
लस्तारःशुद्धमौक्तिकंयत्रतादृशं।कमिव।स्फुटतरःप्रकटरोयःफेनसमूहस्तेन
करंबितंमिश्रितंयमुनाजलपूरमिव।कालिंदीप्रवाहमिव।अत्रश्रीकृष्णशरीर
स्यशामस्निग्धतयासौंदर्यपरयाचयमुनाप्रवाहसाम्यं।हारस्यवातिशुभ्रतयाफे
नसमूहसाम्यंबोध्यं।अत्रहारालिंगनेनस्वाभिलाषप्रकटनान्मोट्टायिताख्योहा
वोऽत्रवर्णितः।तदुक्तंरसार्णवसुधाकरे।स्वाभिलाषप्रकटनान्मोट्टायितंइति।तारो

मुक्तादिसंशुद्धौतरलेशुद्धमौक्तिके।तारश्चरजतेत्फच्चैरप्यन्यवदीरितमितिविश्व
ः।परिलंबिविदूरमिठिपाठेअतिशयेनदीर्घमित्यर्थः।तदापिसएवभावः।उरसि
धारणेनालिंगनप्राप्तेः।हारश्चश्रीराधासंसर्गीज्ञेयः।२३।श्यामलेत्यादि॥ ॥श्या
मलमृदुलकरेवरमंडलमधिगतगौरदुकूलं।नीलनलिनमिवपीतपरागप
टलभरवलयितमूलं॥३॥ ॥श्यामलंनीलंमृदुलंकोमलंकलेवरमंडलंशरीर
मंडलंयस्यतं।अतएवाधिगतंअधिकंपरिधेयत्वेनप्रियारूपसादृश्यात्ज्ञातंगौ
रंस्वर्णपीतंदुकूलंपट्टवस्त्रंयेनतंअनेनगौराग्यास्तेनसहलतावेष्टनालिंगनेनप
रमशोभाभविष्यतीतिध्वनंतं।तदुक्तं।प्रियमनुकृतवल्लीविभ्रमावेष्टयंतीद्रुम।

मिवशरलांगीमंदशीत्कारदीर्घं।वदनमुदितलेखाक्रंदतीचुंबनार्थंनमयतिवि।
नतागीयद्वत्तावेष्टितंतत।इति।कमिव।नीलनलिनमिव।श्यामलकमलमिव।
कीदृशींनीलनलिनं।पीतोयः।परागः।पुष्परेणुस्तस्यपटलंसमूहस्तस्ययोभरो
ऽतिशयस्तेनवलयितंवेष्टितंमूलंयस्यतादृशं।अत्रःकृष्णस्यस्निग्धसौगंध्यसौ
कुमार्य्यंश्यामत्वेननीलोत्पलसाम्यं।पीतपट्टांबरस्यमूललग्नपीतपरागसाम्यं
।दृष्टांतदार्ष्टांतेनैवोद्दीपनविभावश्चदर्शितः।उपमालंकारश्चापिबहिर्मूलेपरा
गावृत्तत्वाभादभूतोपमेयं॥३॥तरलेत्यादि॥ ॥रतलदृगंचलवलनेनमनोहर
वदनजनितरतिरागं।स्फुटकमलोदरखेलितखंजनयुगमिवशरदितडागं॥४

तरलश्चंचलोयोदृगंचलःकटाक्षस्तस्यवलनेनमनोहरंसुंदरंयद्वदनंतेनजनि
तउत्पादितोरतिरागोराधायाःसुरतेछायेनतादृशं।अथवा।कटाक्षयुक्तंसुंदरं
यद्वदनंश्रीराधायाःतेनउत्पादितोसंभोगेछायस्येति।अनेनकांतादृष्टिरुक्ता।य
था।आपिबंतीवदृश्यंयासविकाशातिनिर्मलासभ्रूक्षेपकटाक्षाचकांतामन्मथ
वर्द्धिनीतिकमिव।शरदिशरत्कालेस्फुटकमलोदरेविकसितपद्मगर्भेखेलितं।
क्रीडितंखंजनयुगंखंजरीटयुगलंयत्रतादृशं।तडागमिव।अयौवनाविर्भावा
त्स्वच्छकांतिमत्तयाश्रीराधादर्शनात्संक्षुभिताशयत्वेनचःरसाधारतयापिचकृ
ष्णस्यशरत्कालीनसरोवरसाम्यं।वदनस्यविकसितपद्मसाम्यं।तन्मध्येचांचल्येन।

विचित्रसौंदर्येणचनेत्रयोःखंजरीटयुग्मसाम्यंद्वितीयस्याख्यानेपि।तत्कटाक्षाश्र
यत्वात्कृष्टस्यसरोवरसाम्यं।युक्तमेव।शरत्कालेजलाशयस्यकमलगर्भखेलतखंज
नोदृष्टःसन्यथादृष्टुर्वांछितंप्रयच्छत्येवंवलदपांगवलत्कृष्णवदनदर्शनंश्रीराधा
याःवांछितंकेलिसुखंदास्यतीतिशरत्कालीनपद्ममध्यस्थखंजनोपमानेनध्वनितं॥
तदुक्तंवाराहसंहितायां।हेमसमीपसितांवरकमलोत्पलपूजितोपनष्टेषुदधिपा
त्रधान्यकूटेदृष्टोभीष्टानिचेष्टतेविगहति।अब्जेषुगोषुगजवाजिमहोरगेषुराज्य
प्रदःकुशलदःशुचिशाद्वलेषुस्याखंजनइत्यपि।तडागस्रुजलाधारविशेषेइ
तिविश्वः।युक्तोपमालंकारोयं।तल्लक्षणं।स्मितपुष्पोज्वलंलोलनेत्रभृंगमिदंमुखं॥इ

तिपुष्पद्विरेफाणांसंगत्यायुक्तरूपकमिति॥४॥वदनेति॥ ॥वदनकमलपरिशी
न लंमिलितमिहिरसमकुंडलशोभंस्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृत
रतिलोभं॥५॥पुनःकीदृशंहरिं।वदनकमलस्यमुखपद्मस्यपरिशीलनायप्रका
शनायअनुभवायवा।मिलितौयौमिहिरौसूर्यौताभ्यांसमेकुंडलेताभ्यांशोभाकां
तिर्यस्यतंअत्रकुंडलयोर्नानामणिखचितत्वेनसूर्योपमाबोध्या।प्रियादर्शनाति
विकसितपद्मोपमा।वदनस्य।अभूतोपमेयं।सर्वपद्मप्रभासारःसमाहृतइवक्व
चित्।तवाननंविभातीतितामभूतोपमांविदुरिति।पुनःकीदृशं।स्मितस्येषद्वास
स्ययारुचिःकांतिस्तयारुचिरोमनोहरोऽथचसमुल्लसितोराधाधरपानोत्कंठया

प्रस्फुरितोऽषत्कंपितोयोधरपल्लवोस्तेनकृतोराधायारतिलोभःसुरतेछायेनतं।५
शशिकिरणेति॥ ॥शशिकिरणबुरितोदरजलधरसुंदरसकुसुमकेशं।तिमिरोदि
तविधुमंडलनिर्मलमलयजतिलकनिवेशं॥६॥पुनःकीदृशं।शशिकिरणैश्चंद्रकिर
णैःछुरितसंभिन्नंउदरमभ्यंतरंयस्य।तादृशोयोजलधरोमेघस्तद्वत्सुंदराःसकुसु
माःपुष्पसहिताःकेशायस्यतं।अत्रकेशानांशामतयामेघसाम्यं।तत्रस्थकुसुमानां
चमेघांतश्चारिचंद्रकिरणसाम्यंबोध्यं।पुनःकीदृशंतिमिरेंऽधकारेउदितंप्रकटी
भूतंयच्चंद्रमंडलंशशिबिंबतद्वन्निर्मलस्यमलयजतिलकस्यनिवेशोविन्यासोय
स्यतादृशं।अत्रश्यामसुंदरस्यललाटेमंडलाकृतितिलकस्यगाढांधकारेणपूर्ण

चंद्रबिंबसाम्यं।पूर्णचंद्रोदयेतिमिरस्यासंभावादभूतोपमेयंबोध्या॥६॥विपुलेति
॥ ॥विपुलपुलकभरदंतुरितंरतिकेलिकलाभिरधीरं।मणिगणकिरणसमूह
समुज्वलभूषणसुभगशरीरं॥७॥ ॥पुनःकीदृशं॥विपुलोयःपुलकभरोरोमांचा
तिशयस्तेनदंतुरितंव्याप्तं।पुनःकीदृशं।रतिकेलिकलाभिःरतिसंबंधिनीभिःके
लिकलाभिःचुंबनालिंगनादिविशेषचातुरीभिरधीरंचंचलं।पुनःकीदृशंमणि
गणानांमणिसमूहानांकिरणसमूहेनसमुज्वलानिभूषणानिमुकुटांगदमंजीरा
दीनितैःसुभगंसुंदरंशरीरंयस्यतं।मध्याभिसारिकेयं।नायका।मध्यालक्षणं।तुल्य
लज्जास्मरामध्यामोहांतसुरतक्षमाइति।तथाचएभिःपदैःकृष्णेविभावानुभावसा

त्विकव्यभिचारिनिःसांगःशृंगाररसस्थःस्थायिभावोनिरूपितः।७।श्रीजयदेवेत्यादि॥ ॥
श्रीजयदेवभणितविभवविगुणीकृतभूषणभारः।प्रणमतहृदिविनिधायहरिंसुचि
रंसुकृतोदयमारः।णदेजनाहरिंप्रणमतानमस्कुरुतकिंकृत्वासुचिरंबकुकालव्या
प्यहृदिचित्तेविनिधायस्थापयित्वा।ननुयागादिनाऽर्जनत्वेनदेवतांतरंभजनीयं
हरेस्तुसुलभतयाकिंतत्राह।कीदृशंसुकृतोदयस्यपुण्योदयस्यसारंसारभूतं।अ
थवासुकृतोदयएवसारोधनंयस्मात्तं।तथाचपुण्योपचयानंतदेवपरमफलंतेनै
वपुण्योपचयःतन्नामस्मरणेनैवयागाद्युपकारःक्रियतेनतंकेपिउपकर्तुंशक्नुवं
तीतितस्मैवऽर्जनतातःतदेवविधेयमितिभावः।श्रीजयदेवस्यभणितविभवेवाग्विभ २२४

वेर्विगुणीकृतोभूषणभारोऽलंकरणसमूहोयेनातंजयदेवसरस्वतीस्वयमेवोपमो
त्प्रेक्षाद्यलंकारवतीभगवद्गुणैस्तुवर्णनीयैःसुतरामलंकृतेतिभावः।अथवा।श्रीज
यदेवस्यतद्दासस्यभणितविभवेनवर्णितमधुरगुणैर्विगुणीकृतोभूषणभारोयस्य
तं।प्रथमस्तुस्वर्णाद्यलंकारोद्वितीयःकाव्यालंकारविषयतस्यावर्णितगुणइतिभा
थवा।श्रीजयदेवभणितविभवैःराधाविषयिकरसानुभावैःविगुणीकृतोऽलंकरण
समूहोयस्य।प्रथमस्तुभूषणभूषणंगसौंदर्यालंकारःद्वितीयोरतिरसानुभावा
तिशयोऽलंकारइत्यर्थः।८। ॥२२॥इदानींश्रीराधायाःरसविक्रियामाह।अतिक्रा
म्येति॥ ॥अतिक्राम्यापांगंश्रवणपथपर्यंतगमनप्रयासेनैवाकृष्णोरक्ततरतारं

पतितयो॥तदानीराधायाःप्रियतमसमालोकसमयेपपातस्वेदांभःप्रसरश्च
हर्षाश्रुनिकरः॥७६॥ ॥हेसखि।यदाराधादंदर्शतदानींप्रियतमसमालोकसम
येश्रीराधायाःअक्ष्णोर्वर्त्तमानआनंदसमूहअश्रुरूपेणपतितःहर्षाश्रुनिकर
ःपपातेत्यर्थः।ननुसमीचीनभाजनेस्थापितःकथंपपाततत्राह।किंभूतयोरक्ष्णो
ःतरलतरतारंदर्शनासंगेनातिशयेनचंचलाश्रिकनीनिकंयथास्यादेवंपतित
योः।सौंदर्य्याधिक्येनअतिसृष्टेनिरीक्षणात्यस्मिन्नंगेदृष्टिःपतितापुनःउठा
नासामर्थेनतत्रैवस्थिताअतिज्ञापनायपतितयोरित्यक्तंतथाचभाजनेपतिते
तदाधारवस्तुपपातेतिभावः।पपातेहेतुमुत्प्रेक्षतेअतिक्रम्येति।अपांगनेत्रांतं २२५

देशंअतिक्रम्योल्लंघ्यश्रवणपथपर्यंतगमनश्रयासेनेवस्वेदांबुप्रसरश्च॥क
र्णवर्त्मविधिचलनजन्यायासेनस्वेदांबुझरश्च।अन्योपिदूरगमनेनश्रांतःस्वि
द्यतिपततिच।तथाचानेनविशालनयनत्वंतस्याःसूचितं।अथचांतर्गतोदर्षोधि
कतयांतःस्थानमप्राप्यबहिरक्ष्व्याजेनपतितश्रतिभावःउत्प्रेक्षालंकारः॥७६
नजंत्याइति॥ ॥नजंत्यास्तल्पांतंछलतकपटकंडूतिपिहितस्मितंयातेगेहाबहिर
वहितालीपरिजने।प्रियास्पंपश्यंत्याःस्मरशरसमाकृतसुनगंसलज्जालज्जापि
व्यगमदतिदूरंमृगदृशः॥७७॥तस्मिन्कालेतल्पांतंशय्यासमीपंनजंत्याँःमृगद आश्रयंत्याः२
शःहरिणनयनायाःश्रीराधायाःलज्जापिसलज्जेवव्रीडावतीवदूरंअतिशयेनम

गमत् विगता। अतिदूरं वा। क्वसति। अवहितालीपरिजने अवहितः कृतावधानोय
ः आलीपरिजनः सखीपरिवारस्तस्मिन् गेहात् विलासनिकुंजात् बहिर्यातेगते स
ति। कथं यस्याथोत्। कृतायाकपटकंडूतिः कर्णातिकेंदूयनं तेन पिहितमाछादितं॥
स्मितं यथा स्यात्तथा वा। कीदृश्योस्तस्याः प्रियास्यं प्रियमुखं पश्यंत्याः किंभूतं मुखं। स्म
रसरसं। स्मरेण कामेन सरसं शृंगाररसहितं। पुनः कीदृशं। आकूतसुभगं आकूते
न तत्तत्क्रीडाभिप्रायेण सुभगं मनोहरं। स्मरपरवशाकूतसुभगमिति पाठे स्मरप
रवशं यत्। आकूतं अभिप्रायस्तेन सुभगं। ७७। जयश्रीत्यादि॥ ॥जयश्री विन्यस्तैर्महि
त इव मंदारकुसुमैः स्वयं सिंदूरेण द्विपरणमुदा मुद्रित इव। भुजापीडाक्रीडाहतकु

वलयापीडकरिणः प्रकीर्णासृग्बिंदुर्जयति भुजदंडो मुरजितः॥७८॥ ॥मुरजितो
मुरारेः भुजदंडो जयति। सर्वोत्कर्षेण वर्त्तते। भक्तानां रक्षणाद्यर्थमित्यर्थः। किंलक्ष
णस्य मुरजितः भुजापीडस्य बाहुदंडस्य क्रीडाया विलासेन हतः कुवलयापीडना
माकरी हस्ती येन तस्य भुजदंडमुत्प्रेक्षते। जयश्रिया विजयलक्ष्म्या विन्यस्तैर्विशेषे
ण दत्तैर्मंदारकुसुमैः पारिजातपुष्पैर्महित इव पूजित इव। कीदृश इव। स्वयमात्म
ना द्विपेन कुवलयापीडेन यारेणस्तस्मिन् यामुत् हर्षस्तेन सिंदूरेण श्यामांगे आ
रक्तमंडनस्य शोभाप्रदत्वमतो मुद्रित इव। विचित्रित इव। नन्वेवं कथमुत्प्रेक्षते। त
त्राह। प्रकीर्णासृग्बिंदुः। विकीर्णा रुधिरबिंदवो यत्र स तथा। अनेन सामर्थ्यलक्षणो

नायकगुणउक्तः।एवंभूतेमुनदंडेगाढालिंगनादिनाश्रीराधायाःनिःशंकक्रीड
नंसूचितमितिभावः।७८॥ ॥इतिश्रीगीतगोविंदेअभिसारिकावर्णनंसानंदगोवि
दोनामैकादशःसर्गः॥ ॥११॥ ॥इदानींचिरकालंकांक्षितराधादर्शनोल्लासित
मानसोहरिस्तामाहागतवतीति॥ ॥गतवतिसखिवृंदेमंदत्रपानिरनिर्झरस्मरप
रवशाकृतस्फीतस्मितस्नपितांधरं॥सरसमनसंदृष्ट्वामुकुर्नवपल्लवप्रसवशय
यनेनिक्षिप्तांह्रीमुवाचहरिःप्रियां॥७९॥ ॥हरिःप्रियांश्रीराधामुवाच।कसति।
सखीवृंदेसखीसमूहेगतवतिसति।कीदृशी।मंदोऽल्पोयस्त्रपानरोलज्जासमूह।
स्तेननिर्झरोऽतिशयोयःस्मरःप्रौढकामस्तस्परवशास्तदायत्तोयःआकूतोऽभिप्रा २२७

यस्तेनस्फीतंप्रहृष्टंयस्मितंतेनस्नपितौव्याप्तावधरौयस्यास्तां।पुनःकीदृशी।स
रसंरसोनुरागस्तत्सहितंमनोयस्यास्तांकिंकृत्वा।नवपल्लवप्रसवशयेने।नव
पल्लावाश्चप्रसवाश्चकुसुमानितेषांशयनेनवकिशलयपुष्पमयेशयनीयेनिक्षि
प्तांह्रीविनिहितनयनांमुकुर्वरिंवारंदृष्ट्वाविलोक्यहृष्टाएवंभूतांप्रियांदृष्ट्वाहर्षम
वाप्यउवाचेत्यर्थः।अत्रशय्यावलोकनेनसंभोगेच्छाध्वनिता।अस्मिन्सर्गेस्वाधीन
भर्तृकानायिका।७९।गीतेनवक्ष्यमाणमाह॥ ॥किशलयेति॥ ॥किशलयशयन
तलेकुरुकामिनिचरणनलिनविनिवेशं।तवपदपल्लववैरिपराभवमिदमनुभ
वतुसुवेशं॥१॥ह्लादमधुनानारायणमनुगतमनुसरराधिके॥ध्रुवपदं॥गीतस्या

स्याविभासरागः। तं क्षणं। स्वछंदसम्मानितपुष्पचायः प्रियारसस्वादुसुधाभितृप्तः।
पर्यंकमध्यस्यकृतोपवेशोभासः सुनिद्रान्वितहेमगौर इति। केचित्तु रामकरीति। ए
कतालीतालश्च। गीतार्थस्तु। हे राधिके हे सुंदरि। अधुना मा अनुसर भज। किंभूतं मां।
क्षणमनुगतं। तवदर्शनोत्सवव्याप्तं। अथवा। मामनुसर। किंभूतं। क्षणमधुना तवसं
भोगोत्सवमधुना मदेन अनुगतं स्वाधीनं क्षणमनुगतमिति पाठे। अनुगं अनुवर्त्ति
नमित्यर्थः। ननु विद्यमाने एवं कथयसि परोक्षे हरहिते त्वयि कथं भजामीत्यत आ
ह। नारायणमिति। नारेषु। अप्सु अयनं यस्येति। त्वद्वियोगे विरहाग्नितप्तस्य मम ज
लमेवाश्रयो भूदित्यर्थः। अथवा। नारा आपस्तासामयनं आश्रयमश्रुजलमग्नमित्य

र्थः। अथवा। अजलाश्रयं जलधिप्रेमसमुद्रमित्यर्थः। नार्याः विलासो नारा तस्येदमि
त्यण् स एवाश्रयो यस्येति वा। उक्तशंकां परिहृत्य मां भजेति भावः। ध्रुवपदं। अथ पदा
नि। हे कामिनीति ववेसितमेव तदिति साभिप्रायसंबोधनं। किशलयशयनतले
नवपल्लवशय्यायां चरणनलिनस्य पादपद्मस्य विन्यासं कुरु। वीत्यनेनास्यां शय्या
यां विविधप्रकारचरणविष्टितं भविष्यतीति ध्वनितं। इदं सुवेशमपि सम्यग्वैचि
त्र्यारचनादिना सुष्ठ्वलंकृतमपि स्वभावतोऽतिसुंदराकृतिर्यस्य तादृशमिति वा। दि
व्यकिशलयमयत्वात् किशलयशयनं तवपदपल्लववैरि तवपदपल्लवयोर्वैरी श
त्रुस्तस्मात्परा भवंति रस्कारमनुभवतु। अथवा। तवपदपल्लवस्य वैरी स्पर्द्धी तवचर

णविन्यासोनपराजयमनुभवत्वित्यर्थः॥१॥करेति॥ ॥करकमलेनकरोमिचरणमि
हमागमितासविदूरं।क्षणमपकुरुशयनोपरिमामिवनूपुरमनुगतशूरं॥२॥अ
हंकरकमलेननिजकरांबुजेनतवचरणंकरोमिसंवाहयामि।अथवा।चरणमह
मित्येकमेवपदं।तवचरणयोर्महपूजांसंवाहतादिरूपांकरोमि।कथमित्यतआ
ह।दूरंअतिशयेनदूरंत्वंआगमितासि।आनीतासि।अर्थान्मया।तथाचदूरागम
नजन्यंतेश्रममपनयामीतिभावः।शयनोपरिशय्यायाउपरिक्षणमपिमामुपकु
रु।कीदृशंमां।अनुगतौतवानुसरणेशूरं।कमिवायथातवानुगतिशूरस्यनूपुर
स्यपरिधानेनतवचरणसन्निधानेमहार्घ्यतापादनोपकारः।तथैवचरणारविंदार्प

णेनममाप्यभिकांक्षितरूपोपकारःभविष्यतीतिभावः।तथाचापरोयोनुगति
शूरोभवतितस्योपकारउचितइतिध्वनितं।अथवा।पादपद्मस्यस्पर्शंनिषेधयं
तीप्रत्याह।मामिवानुगतिशूरंनूपुरमुपकुरु।चरणपरिधानेनस्वीकुरु।अने
नधृतस्यापिनूपुरस्यार्पणछलोक्त्यातत्पादस्पर्शंप्रार्थयते।२।गांभीर्येणानवगा
ह्यमानाभिप्रायउत्तरमप्रयच्छंतीमाह।वदनेति॥ ॥वदनसुधानिधिगलितममृ
तमिवरचयवचनमनुकूलं॥विरहमिवापनयामिपयोधररोधकमुरसिदुकू
लं॥३॥ ॥हेप्रिये।अनुकूलंरतिजनकंसंभोगसंपत्तिसंपादकमितियावत्।वच
नंरचयपदार्थानुप्रासमाधुर्येणसंलापकदंबंवद।कीदृशं।वदनमेवसुधानिधि

श्चंद्रस्तस्माज्जलितंच्युतं।किमिव।अमृतमिव।अतोत्वदाज्ञयाउरसिवक्ष्यसिस्थितंदुकू
लंपट्टवस्त्रंअपनयामि।दूरीकरोमि।कीदृशं।पयोधररोधकंतिरोधायकं।कमिव।वि
रहमिव।यथातवसंगमेविरहोपनीतस्तथास्तनाश्लेषप्रतिबंधकमपीदमपनयामी
तिभावः।अथवा।विरहतापिताहंकथंवदिष्यामि।अतआह।दुकूलमिवविरहमप
नयामि।किंभूतमुभयं।उरसिहृदिवर्त्तमानं।पुनःकिंभूतं।पयोधररोधकं।नवरसधा
रणेनाप्यायनकरत्वात्पयोधरपदोपात्तं।नतुपरिणाहित्वापादनायतथासतिअभ
व्यत्वापत्तेः॥३॥कुटिलमवलोकयंतीमतिविह्वलःसन्नाह।प्रियेति॥ ॥प्रियपरिरंभ
णरभसवलितमिवपुलकितमतिदुरवापं।मदुरसिकुचकलशंविनिवेशय।शेषय

मनसिजतापं॥४॥ ॥हेराधेत्वंमदुरसिमदीयवक्षस्थलेकुचकलशंरसपूर्णस्तन
कुंभंविनिवेशय।कीदृश।अतिदुरवाप।अतिदुर्ल्लभं।त्वदनुग्रहंविनातीवदुःखेना
वाप्यतइतिदुरवापःतं।पुनःकीदृशं।पुलकितंरोमांचितं।तत्रहेतुमुत्प्रेक्षते।प्रिय
परिरंभणरभसवलितमिव।प्रियस्यप्राणवल्लभस्यममपरिरंभणेयोरभसउत्सा
हस्तेनवलितमिव।युक्तमिव।अन्योपिहर्षयुक्तोभवति।तस्यरोमांचोभवत्येवेतिध्वनि
तं।तेनकलशार्पणेनमनसिजतापंकामजन्यंसंतापंशेषयनाशय।संतप्तस्योपरि
कलशोदकेनाभिषिक्तेतापोयात्येव।उक्तिभंग्याविपरीतरतंयावतेइतितात्पर्यं।त
थाच।मनसिजपदेनगृहोत्थिताग्निशांत्यैतत्रवर्त्तिजनएवसमर्थोभवतिनान्यतं॥

अतएवत्वयैवास्यशांतिरितिभावः।शेषयेत्यनेनापि।तापंशेषय।ननुस्वविषयिकं
कामंपुनःपुनःविलासमाधुर्य्यरुच्युत्पादकत्वात्।तथाचास्यानुप्रासनिर्वाहकत्वं
स्फुटमेव॥४॥ध्रुवपदंमत्रश्रीराधायाउत्तरंवेति।हेकृष्णत्वंसर।इतोगच्छ।किंसति
।राधिकेइति।रःकामस्तेनाधिःसंतापलक्षणोव्याधिः।केप्रकासेसति।तर्हिक्वगच्छामि
तदर्थमेवतवाश्रितोस्मिनाहिनारायणमनुगतमिति।नारायणंजलाश्रयंअनुल
क्षीकृत्य।दूरेचेदतआह।गतंनिकटएव।प्राप्तंयमुनादिलक्षणंतत्रकामतापशांत्यै
सरेत्यर्थः।तदात्वदेकजीवजीवनोहंत्वमेवजीवयेत्याह।अधरेत्यादि॥ ॥अधरसुधा
रसमुपनयभामिनिजीवयमृतमिवदासं।त्वयिविनिहितमनसंविरहानलदग्धवपु

षमविलासं॥५॥हेभामिनि।कामकलाकुशलेप्रिये।अधरसुधारसंअधरसंबंध्य
मृतरसंउपनयवितर।दासंमादृशं।अनुगतं।दानपात्रमितिवा।सृदादानेइतिधा
तोःजीवय।कीदृशं।मृतमिवा।अन्योपिमृतोऽमृतपानेनजीवयतीतिध्वनितं।दानपा
त्रत्वेहेतुमाह।त्वयिति।त्वयिविनिहितमनसं।त्वय्यर्पितंचित्तं।पुनःकीदृशंविरहा
नलेनत्वद्वियोगरूपेणाग्निनादग्धंसंतप्तंवपुर्यस्यतं।अतएवाविलासं।क्रीडनवे
ष्टारहितं।अन्योपिभृत्यःस्वकार्येदग्धःनिश्चेष्टितसमर्थेनस्वामिनाजीवनीयइति
भावः।चाटूक्तेनप्रसन्नामाह।शशिमुखीति॥ ॥शशिमुखिमुखरयमणिरसनागुण
मनुगुणकंठनिदानं।श्रुतियुगलेपिकरुतविकलेममशमयचिरादवसादं॥६॥हे

शशिमुखिचंद्रवदने।सुंदरतयामृतस्यंदितयाचशशमुखयोरूप्यरूपकभावः॥
मणिरसनागुणं।मणियुक्तंकांचीदाममुखरयासशब्दंकुरु।अनेनहंसलीलाख्यंवि
परीतरतमारभस्वेतिध्वनितं।तल्लक्षणंप्रोक्तंप्राक्।कीदृशंमणिरसनागुणं।अनु
गुणकंठनिनादं।अनुगुणःसदृशःकंठनिनादःकंठशब्दोयेस्यतादृशं।रसनागुणानु
कारिकंठशब्दंकुर्वित्यर्थः।अथवा।स्वरभंगेनालपतीमाह।कंठनादसदृशरसना
शब्दंकुर्वित्यर्थः।तेनशब्देनममश्रुतियुगलेश्रोत्रयुग्मेचिरादवसादंचिरात्त्वदसं
गमाघघेःवर्त्तमानंअवसादंखेदंशमयशांतंकुरुनाशयेत्यर्थः।कीदृशेश्रुतियुग
लेपिकुरुतेनकोकिलकूजितेनविकलेदुःखिते।विरहिणोहिपिकरुतंदुःसहंभव।

ति॥६॥किंचिदवलोकयंतीमाह।मामतीति॥ ॥मामतिविफलरुषाविकलीकृत
मवलोकितुमधुनेदं।मीलतिलज्जितमिवनयनंतवचिरमविसृजरतिखेदं॥७॥हे
प्रियेतवेदंनयनंनेत्रंमामवलोकितुंमांवीक्षितुंमीलतिमुद्रांप्राप्नोति।कमिवल
ज्जितमिवकीदृशंमां।अतिविफलरुषाऽतिनिष्फलेनकोपेनविकलीकृतं।विकल
तांनीतं।निरपराधदंडनंमयाकृतमिति।महत्तयालज्जितमिवेतिभावः।अतस्त्वम
धुनाइदानींनिष्फलकोपाद्विरमविरक्ताभव।रतिखेदंसंभोगदैन्यंविसृजत्यज।को
पंत्यक्त्वामयासहरमणंकुर्वित्यर्थः।अथवा।अधुनालज्जानिराकरणार्थंविशेषेण
रमविविधकेलिंप्रकटय।रतिखेदंरतेःदुःखंमुंच।रत्यायासंविशेषेणसृजउत्पादये

तिवा।तथाचतेननेत्रमुद्भूतंसमीचीनमितिन्यायः।७।श्रीजयदेवेत्यादि॥ ॥श्रीजयदे
वभणितमिदमनुपदनिगदितमधुरिपुमोदंजनयतुरसिकजनेषुमनोरमरतिर
सभावविनोदं॥८॥इदंश्रीजयदेवभणितंश्रीजयदेवेनकथितंगीतंरसिकजनेषु
एतद्रसभावितास्त्रायलोकेषु।मनोरमरतिरसभावविनोदंरतिःसंभोगःरसःशृं
गाररसःभावाःसंचारिसात्विकादयस्तेषांमनोरमंमनःप्रीतिकरंचित्ताकर्षकंवि
नोदंकौतुकंहर्षमितियावत्।जनयतुकरोतु।अथवा।मनोरमरतिरसेभावश्चम
कृतिमुत्पादयतु।तदुक्तं।यदिहरिस्मरणेत्यादिनातेनैव।कीदृशंभणितं।अनु
पदंप्रतिपदंनिगदितोनितरांवर्णितोमधुरिपोःकृष्णस्यमोदआनंदोयत्रतादृशं। २३३

वाग्विलासरूपोमोदइत्यर्थः।८।२३।एवंवाग्विलासमनुवर्ण्यहानींसुरतारंभंनिरू
पयति।पत्यूहइत्यादिना॥ ॥पत्यूहःपुलकांकुरेणनिविडाश्लेषेनिमेषेणचक्षी
डाकृतविलोकितेऽधरसुधापानेकथानर्मभिः।आनंदान्निगमेनैनमन्मथक
लायुधेपतस्मिन्नभूदुद्भूतःसतयोर्बभूवसुरतारंभःप्रियंभावुकः॥८०॥तयोःरा
धामाधवयोःसुचिरंकांक्षितःलोकोत्तरोवासुरतारंभःललितारंभइतिपाठेललि
तोमनोहरोआरंभोयस्यतादृशःशृंगारक्रीडाविशेषःउद्भूतःउद्भटःप्रियंभावुकः।
प्रियंभवनशीलोबभूवजातःसकइत्यतआह।यस्मिन्ललितारंभेनिविडाश्लेषे
दृढतरालिंगनेकर्त्रेपुलकांकुरेणरोमांचोद्गमेनंपत्यूहोऽभूत्।अंतरायोजातः।

अनेनालिंगनेसूद्दीप्तमहासात्विकविकारः।अंकुरपदेनसूचितः।अतिरूढभाव
श्चस्थायीयेनालिंगनेरोमांकुरस्याप्यसहिष्णुताजाता।एवंपरमावधिरसोत्पत्तिर्द
र्शिता।अपिच।क्रीडाकूतविलोकितेक्रीडासुयदाकूतपूर्वंयद्विलोकितंतत्रनिमेषे
णनेत्रस्यदेमप्रत्यूहोऽभूत्।सतृष्णसाभिप्रायावलोकनेनिमेषमात्रस्याप्यसहनम
भूदित्यर्थः।तदुक्तं।जडउदीक्षतांपक्ष्मकृद्दृशां।अथच।अधरसुधापानेअधरामृता
स्वादकर्त्तव्येकथानर्मभिःरहःकथाकौतुकैःप्रत्यूहोऽभूत्।अनेनपानेऽतृप्तिरुक्ता
।तथाच।सुधामत्तःकथयत्येवेतिकथायासंवरणंप्रत्येकमप्येंद्रियाणांतत्तद्भावानां
चातिप्राबल्यं।समुद्रतरंगाणामिवेतिभावः।अथच।मन्मथकलायुद्धेकामस्यचतु

ःषष्टिकलान्वितसुरतसंग्रामेआनंदाभिगमेनहर्षलाभेनप्रत्यूहोऽभूत्।अनेन
निरतिशयस्पृहणीयत्वमुक्तं।संभोगस्यनत्वलंप्रत्ययइतिभावः।क्रियानंदंयो
श्चापारत्वमपिध्वनितं।व्यंग्यवृत्तिश्चेयं।संभोगाख्यःशृंगारोरसःभावविभावानु
भावसात्विकव्यभिचारिभिश्चरसतांनीतोभंग्यात्रमहाकविनासंगोनिरूपितः।
८०।तदेवविपरीताख्यंउक्तिवैचित्र्येणकथयतिदार्भ्यामित्यादिना॥ ॥दोर्भ्यांसंय
मितःपयोधरभरेणापीडितःपाणिजैराविद्धोदशनैःक्षताधरपुटःश्रोणीतटेना
हतः।हस्तेनानमितःकवेऽधरमधुस्यंदेनसंमोहितः।कांतःकामपितृप्तिमापतदहो
कामस्यवामागतिः॥८१॥दोर्भ्यांबाहुभ्याअर्थान्नायिकायाःसंयमितोबद्धःपयोधर

नरेणस्तनभारेणपीडितः।पाणिजैर्नखैराविद्धस्ताडितः।दशनैर्दंतैक्षताधरपुटः।द
ष्टोधरपुटोयस्य।तादृशः कृतः श्रोणीतटेननितंबेनाहतः।आस्फालितः।हस्तेनान
मितः कचेकेशेधृत्वेत्यर्थात्अधरमधुस्यंदेनअधरामृतपानेनसंमोहितः सम्यक्
मोहंप्रापितः एवंविशिष्टोपिकांतः कामस्यनिर्वचनीयांतृप्तिमापप्रापत्।तत्ततो
हेतोरहोइत्याश्चर्येकामस्यवामाविरुद्धागतिः।वामारमणीयावा।यस्यबंधनादि
कंक्रियतेऽसोपिप्रीतिंप्राप्नोति।अतएववामेतिभावः।अनेनविपरीतंसुरतंकथि
तं।अर्थांतरन्यासोऽलंकारः।तदुक्तंदंडिना।ज्ञेयःसोर्थांतरन्यासोवस्तुर्निश्यकिंचन
तत्साधनसमर्थस्यवचनंयत्रदृश्यतइति।तथाच।संयमनापीडनादिभिर्वीरशृंगा

रानुभावैर्वीरशृंगारोऽनुवर्णितः।अथचसापराधेननायकमौलिनायोदंडः।
प्रार्थितस्तयापिसएवानुष्ठितः इतिभावः।८१।तदेवस्पष्टयति।मारांकइत्यादिना
॥ ॥मारांकेरतिकेलिसंकुलरणारंभेतयासाहसप्रायंकांतजयायकिंचिदुप
रिप्रारंभियत्संभ्रमात्।निस्यंदाजघनस्थलीशिथिलतादोर्वल्लिरुत्कंपितंवक्षो
मीलितमक्षिपौरुषरसःस्त्रीणांकुतःसिध्यति।८२॥ ॥मारांकेमारस्यकामस्यचि
ह्नेयुद्धपक्षेमारणंचिह्नंयत्रतादृशे।रतिकेलिसंकुलरणारंभे।रतिकेलिभिः।चुंब
नालिंगनबंधादिरूपाभिःसंकुलेव्याप्ते।रणारंभेकामयुद्धारंभे।तयाराधयासा
हसप्रायंसाहसबहुलंकांतजयायतदुपरिकांतस्योपरिकिंचिल्लोकोत्तरंप्रारंभि

पुरुषायतमारब्धं यत्संभ्रमात्।संवेगात्तस्याराधिकाया जघनस्थलीनिस्पंदानि
श्चलाजातादोवल्लिः बाहुलताशिथिलताश्लथीभूतावक्षोहृदयमुत्कंपितं अक्षि
मुद्रितं ततः स्त्रीणां पौरुषरसः पराक्रमाभिलाषः कथं सिध्यति। अपितु न सिध्य
त्येवेत्यर्थः। अनेन क्रियानिवृत्तिः कथिता संभोगांते नायकाया एवं भवत्येव। वस्तु
तस्तु विजय एव जातः॥८२॥ तस्या इति॥ ॥तदेवाह। तस्याः पाटलपाणिजांकितमु
रो निद्राकषाये दृशौ निर्धौताधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः। कांचीदा
मदरश्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः कामशरैस्तद्भुतमभूत्पत्फर्मनः
कीलितं॥८३॥ ॥एभिः कामशरैः कंदर्पबाणैः पत्फर्दृशोर्लोचनयोः प्रातर्निषातै

रारोपितैर्मनः कीलितं विद्धमित्यद्भुतमाश्चर्यमभूत्। अन्यत्र निखातैर्बाणैरन्यत्र
कीलितमित्यद्भुतमित्यर्थः। मनः कीलितमभूदिति वा। कैः कामशरैः। तस्या राधा
याः पाटलेन रक्तपाणिजेन नखेन अंकितमुरः चिह्नितं वक्षः निद्राकषाये लोहि
ते दृशौ लोचने च। निर्धौताधरशोणिमा चुंबनादिना क्षालितो यो धरस्य शोणिमा
। लौहित्यं स च विलुलिताः प्रक्षिप्ताः सकचग्रहचुंबनदानादिना। अत एव स्रस्ताः ग
लिताः स्रजः पुष्पमालायेषु तादृशाः केशाश्च। कांचीदामवदरश्लथांचलमपि। तथा
च संगोपनीयैरपि चिह्नैः रसावेशात् प्रकटनेन साधिक्यं कथितमिति ध्वनितं। की
लितमित्यनेन नायकवशीकरणात् श्रीराधाया एव विजयो जात इति भावः॥८३॥ यदु

क्तं।पत्फर्मनः कीलितं तदेव प्रकटयति।व्याकोश इत्यादि॥ ॥व्याकोशः केशपाशस्त
रलितमलकैः स्वेदलोलौ कपालौ दष्टाबिंबाधरश्रीः कुचकलशरुचा हारिता हारय
ष्टिः।कांचीकांचिद्गतास्तांस्तनजघनपदं पाणिनाछाद्य सद्यः पश्यंती सत्रपं मां तदपि
विलुलितस्रग्धरेयं धिनोति।७४।इयं राधा विलुलिता स्रग्धरा खंडितमालाधारिणी
।तदपि मां धिनोति प्रीणयति किं कुर्वती।सद्यस्तत्कालं स्तनजघनपदपाणिना हस्ते
नाछाद्य तिरोधाय सत्रपं लज्जासहितं यथा स्यादेवं मां पश्यंती।कथं सलज्जेत्याह
।केशपाशः कबरी व्याकोशः शिथिलो जातः।अलकैः चूर्णकुंतलैस्तरलितं।कपो
लौ स्वेदलोलौ घर्मजलकणव्याप्तावभूतां।अनु च।दष्टाबिंबाधरश्रीः खंडिताधरल

क्ष्म्या कुचकलशरुचा स्तनघटदीप्त्या हारयष्टिः हारिता कुत्रापि त्यक्ता।अथवा।
हारश्रीः शरीरशोभयैव हारिता चोरिता।अपि च।कांची क्षुद्रघंटिका।कांचिदनि
र्वचनीयां।आशां दिशां दिशं गता।अनेन संभोगावेशो ध्वनितः।तथा च।भूषणादि
रहितापि।भूषणभूषणांगलक्ष्म्या पत्फर्मनो हारिण्यभूदित्यर्थः।अनेन रूपमाधु
र्य्यं निरूपितं।अंगान्यभूषितान्येव केनचिद्भूषणादिना।येन भूषितवद्भ्रांति तद्रू
पमिति कथ्यते।इति।तद्यथा।नीतं ते पुनरुक्ततां भ्रमरकैः कस्तूरिकापत्रकं नेत्रा
भ्यां विफलीकृतं कुवलयद्वंद्वं च कर्णार्पितं।हारश्च स्मितकांतिभंगिभिरलं पिष्टा
नुपेषीकृतः किं राधे तव मंडनेन नितरामंगैरसिद्योतितेति।शोभा वा।सा शोभा

रूपभोगाद्यैर्यस्यादंगविभूषणमितियथा।धृत्वारक्तांगुलिकिशलयैर्नीपशाखांवि
शाखानिष्क्रामंतीव्रततिभुवनात्प्रातरुद्घूर्णिताक्षी।वेणीमंसोपरिविलुठतीमर्द्ध
मुक्तांवहंतीलग्नास्वांतेममनहिबहिःसेयमद्याप्ययासीदिति।स्रग्धरानामकंछं
दश्चेदं॥७४॥मीलदित्यादि॥ ॥मीलद्दृष्टिमिलत्कपोलपुलकंसीत्कारधारावशाद
व्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं।श्यामोत्तुंगपयोधरोपरिपरिष्वंगी
कुरंगीदृशोहर्षोत्कर्षविमुक्तनिःसहतनोर्धन्योधयत्याननं॥७५॥ ॥हर्षोत्कर्षविमु
क्तनिःसहतनोःहर्षोत्कर्षेणनानाविधरतजनितानंदातिशयेनविमुक्ताश्लथानिः
सहव्यापारासहातनुर्यस्याः।एवंभूतायाःकुरंगीदृशःमृगवधूनयनायाःआननं

मुखंधन्योश्लाघ्यगुणवान्कृष्णःधयतिपिबतिनिर्मिषंपश्यतीत्यर्थः।अधरपाने
नचामुखंपिबतीत्युक्तं।कीदृशःश्यामायाःउत्तुंगौरसोन्नतौयौपयोधरौकुचौतयो
रुपरिपरिष्वंगी।आलिंगितः।अनेनस्पर्शतृष्णाध्वनिता।किंभूतमाननं।मीलद्दृष्टिमु
द्रितेअक्षिणीमिलत्कपोलपुलकंचसरोमोद्गमौगंडौचयथास्यादेवंशीत्कारधा
राः।शीकृतानांश्रेणयःतद्वत्।शात्।अव्यक्ताअप्रकटाःआकुलाश्चकेलिकाकुक्री
डाकाकवोध्वनिविकाराःतैर्विकसंतौयेदंतांशवस्तैर्धौतःप्रक्षालितोऽधरोयत्रतत्त
था।मीलद्दृष्टिमिलत्कपोलमित्याननस्यविशेषणंवा॥७५॥अथेत्यादि॥ ॥अथस
हसासुप्नीतंसुरतांतेसानितांतखिन्नांगी।राधाजगादसादरमिदमानंदेनगोविंदं

ज्ञ॥अथशशिमंगजार्थे॥आनंतर्य्येवा॥सा॥प्रसिद्धावशीकृतकांवाराधा॥आनंदेनसहसा
॥इदंवक्ष्यमाणंगोविंदंप्रतिजगाद॥उक्तवती॥किंलक्षणासा॥सुरतांतेसंभोगावसानेनि
तांतमतिशयेनखिन्नांगीसुरतायासयुक्तंशरीरंयस्याःतादृशी॥किंलक्षणंगोविंदं॥सा
दरं॥किमपिमामाज्ञापयिष्यति॥तदैवधन्योन्नविष्यमीत्यादरेणसहवर्त्तमानं॥सुखी
तं॥तत्सापसुखेनस्निग्धं॥ज्ञ॥तदैवंगीतेनाह॥कुर्वित्यादि॥ ॥ऊरुयउनंदनचंदनशि
शिरतरेणकरेणपयोधरे॥मृगमदपत्रकमत्रमनोनवमंगलकलशसहोदरे॥१॥
निजगादसायउनंदने॥क्रीडतिहृदयानंदने॥ध्रुवपदं॥गीतस्यास्यरामकरीरागः॥
रूपकताजः॥गीतार्थस्तु॥साराधायउनंदनेनिजगाद॥उक्तवती॥कीदृशेयउनंदने॥क्री २३९

उतिरममाणे॥पुनःकीदृशे॥हृदयानंदजनके॥ध्रुवपदं॥किंनिजगादेत्याह॥कुर्विति
॥हेयउनंदन॥गोपकुलकुमुदचंद्रः॥अत्रममपयोधरेस्तनेकरेणमृगमदपत्रकंक
स्तूरिकापत्रावलीकुरुरचय॥कीदृशेनकरेण॥चंदनशिशिरतरेणचंदनादप्यति
शीतलेना॥अथवा॥यउनंदनेजगादेतिपूर्वमेवोक्तंतदायउनंदनश्चंद्रचंद्रादपिचं
दनादपिशीतलेनकरेणेत्यर्थः॥शीतलतरेणकरेणेत्यनेननपुनःकामतप्तेनेति
स्वांगस्पर्शकामोद्बोधेदर्शितउक्तिर्वैचित्र्येणेतिभावः॥कीदृशेपयोधरे॥मनोभव
स्ययोमंगलकलशोमांगल्यायकामस्यादयायस्थापितःपूर्णकुंभस्तस्यसहोदरेस
दृशे॥केचित्तुमंगलपदंहेमपरमाचक्षते॥मंगलोभूमिपुत्रेस्यान्मंगलंहेमहाटकमि

तिविश्वकोशेः॥१॥अलिकुलेत्यादि॥ ॥अलिकुलगंजनसंजनकंरतिनायकसायक
मोचने।त्वदधरचुंबनलंबितकज्जलमुज्वलयप्रियलोचने॥२॥ ॥हेप्रियलोचनेत्व
दधराभ्यांयच्चुंबनंतेनलंबितंयत्कज्जलंतत्उज्वलय।पुनरुद्दीपय।नयनयोःक
ज्जलंपुनरर्पयेत्यर्थः।कीदृशेलोचने।रतिनायकस्यकामस्यसायकान्बाणान्
मुंचतीतिनायकसायकमोचनंतस्मिन्।कीदृशंकज्जलंअलिकुलस्यभ्रमरसमूह
स्ययद्गंजनंतिरस्कारस्तस्यसंजनकं।उज्वलोदीप्तिशृंगारविशदेषुविकाशिनीति
विश्वः।गंजनोऽभिभवोनाशइतिरत्नकोशः॥२॥नयनेत्यादि॥ ॥नयनकुरंगतरंग।
विकाशनिरासरकेश्रुतिमंडने।मनसिजपाशविलासधरेशुभवेशनिवेशयकुंडले

॥३॥हेशुभवेशकल्याणमूर्त्ते।शुभःशोभनोवेशोऽलंकरणंयस्य।तादृशेतिवा।मम
श्रुतिमंडलेकर्णप्रदेशेकुंडलेविनिवेशय।स्थापय।कीदृशेश्रुतिमंडले।नयनेए
वयौकुरंगौमृगावतिचपलत्वात्तयोस्तरंगस्यवेगस्ययोविकासःप्रसरणंतस्यनि
रासकरेनिरोधकारिणि।पुनःकीदृशे।मनसिजस्यकामस्ययःपाशोबंधनंविशेष
स्तस्यविलासधरेतल्लीलाभृति।यदिकर्णमंडलंकामव्याधपाशोनस्यात्तर्हिकिय
दूरंनयनकुरंगयोःगतिःस्यादिति।लोचनयोर्विशालत्वंव्यंग्यं।तथाचतरंगविका
शइत्यनेनकटाक्षाणांचांचल्यमितिभावः॥३॥भ्रमरचयमित्यादि॥ ॥भ्रमरचयंर
चयंतमुपरिरुचिरंसुचिरंममसन्मुखे।जितकमलेविमलेपरिकर्मयनर्मजनकम

लकंमुखे॥४॥हेकृष्णममुखेअलकंचूर्णंकुंतलंपरिकर्मयभूषय।कीदृशमलकं।
रुचिरंमनोहरं।पुनःकीदृशं।नर्मजनकं।क्रीडाजनकं।कीदृशेमुखेविमलेनिर्मले॥
पुनःकीदृशे।जितकमले।जितंतिरस्कृतंनिजशोभयासौरभेणचकमलंयेनतादृ
शि।सन्मुखेप्रसादवति।अभिमुखेवा।किंभूतमलकं।सुचिरंचिरात्उपरिवदना
रविंदस्योपरिष्टात्भ्रमरचयंरचयंतंभ्रमरमंडलीशोभांजनयंतमित्यर्थः।सन्मु
खइतिमुख्यस्यातुलितलावण्योस्पदत्वंसुचिरमितिनित्यमेवाभिचारिशोभाप्र
दत्वंचालकानांकथितं।सुचिरंविविधरचनयारुचिरयथास्यात्तथापरिकर्मयेति
वा।जितावशीकृतास्वासाधारणगुणैःकमलाश्रीर्येनतस्मिन्जितकमलइतिवा।

अतएवसर्वातिशायीयशसाविमलेख्यातइत्यर्थः।किंचालकानामपिनर्मज।
नकमितिविशेषणंयुक्तं।तादृशशोभयातस्यमंडलेनापिसर्वमेवपरिहसतीति
।तादृशमित्यर्थः।नर्मयुक्तोजनःसखीजनःतस्यकंसुखस्वरूपमितिवा।क्रीडागलि
तालकदर्शनात्सखीनांनर्मसंभवात्।सुचिरमित्यनेनालकभ्रमराणांमुखम
करंदपानेऽतृप्तिर्मकरंदस्यचाक्षयत्वमितिध्वनितं॥४॥मृगमदेत्यादि॥ ॥मृगम
दरसवलितंललितंकुरुतिलकमलिकरजनीकरे।विहितकलंककलंकमला
ननविश्रमितश्रमशीकरे॥५॥ ॥हेकमलानन।पद्ममुख।अलिकरजनीकरे।
ललाटचंद्रेललितंमनोज्ञंतिलकंविशेषकंकुरु।कमलामुखेयस्येतिवा।उभयतः

धुनिता।कीदृशंतिलकं।मृगमदरसवलितंमृगमदरसेनवलितंनिर्मितं।कीदृशं।
विहितकलंककलंविहिताकलंकस्यजांछनस्यशोभायेनतादृशं।अत्रउश्यामरूप
शोभासादृश्यात्कलंकशोभाग्रहणमितिभावः।कीदृशे।अलिके।विश्रमितोविश्रामं
प्रापितोयःश्रमस्तत्कृतिश्रीकरोबुकणोयत्रतादृशे।अनेनव्यजनादिनातन्मूलं
प्रस्वेदबिंदूनांअतिशीततयाहिमकणत्वमाक्षिप्यते।तेनचालिकस्यचंद्रत्वनिरूप
णंसांगंनिर्वहतीतिधुनितं।ललाटमलिकंगोधिरित्यमरः।अथवा।विश्रांतंप्रापि
तोश्रमजनितश्रीकरोयस्मात्ततादृशइत्यर्थः।प्रथमंव्यजनादिनाश्रस्वेदमपहर
पश्चात्तिलकंरचयस्वेदजलेतिलकस्यासंभवात्॥५॥मामेत्यादि॥ ॥ममरुचिरेचि २४२

कुरेकुरुमानदमानसजध्वजचामरे।रतिगलितेललितेकुसुमानिशिखंडिशि
खंडकडामरे॥६॥अन्यमानिनीमानखंडमयिबकुमानत्रदसौंदर्याद्यनिमानि
नांस्वसौंदर्यानिःगर्वनाशनेतिवा।ममरुचिरेमनोहरेचिकुरेजात्येकवचनंके।
शपाशइत्यर्थः।कुसुमानिपुष्पाणिकुरुरचयकीदृशेचिकुरे।रतिगलितेरतौ
मुक्तबंधनेसंभोगावेशात्स्रस्तइत्यर्थः।ललितेमनोहरे।पूर्वंरुचिरंपदेनसुर
तपूर्वकालीनसौंदर्यमुक्तमत्रललितपदेनरतिगलितत्वेपिसौंदर्याधिक्यंक
थितं।नतुपुनरुक्तिःप्रसंगः।पुनःकीदृशे।मानसजस्यकामस्यध्वजचामरपता
काविक्रूतेचामरे।प्रभःकीदृशे।शिखंडिनोमयूरस्यशिखंडस्यपिछस्यचडाम।

रआटोपोयस्यतादृशे।६।सरसघनइत्यादि॥ ॥सरसघनेजघनेममशंबरदार
णवारणकंदरे।मणिरशनावसनाभरणानिशुभाशयवासयसुदरे॥७॥हेशु
भाशयशोभनहृदय।अथवा।शुभः।आसामस्त्येनशयःकरोयस्य।तादृश।मणि
मयारसनाक्षुद्रघंटिकावसनंवस्त्रंआभरणानिचवासयपरिधापय।कीदृशेजघ
ने।सरसघनेसरसेशृंगाररससहिते।स्निग्धे।वा।घनेनिविडे।पुनःकीदृशे।शंबर
नामानंदैत्यंदारयतीतिशंबरदारणःकामःसएववारणःमहाबलत्वान्मत्तमातं
गस्तस्यकंदरे।अपरोपिहस्तीगिरिकंदरायांतिष्ठतीतिभावः।कुंजरोवारणःकरीत्य
मरः।दरीतुकंदरोवास्त्रीचवसआछादनेइत्यस्यण्यंतस्यप्रयोगः॥७॥श्रीजयदेवे

त्यादि॥ ॥श्रीजयदेववचसिजयदेहृदयंसदयंकुरुमंडने।हरिचरणस्मरणामृ
तनिर्मितकलिकलुषज्वरखंडने॥८॥ ॥श्रियासौंदर्यादिवैभवेनजयेनसर्वक
लाकौशलेनविजयेनचदीव्यतीतिश्रीजयदेवकृष्णस्तत्संबोधनंहेनागरमम
वचसिमंडनेमंडननिमित्तंहृदयंकुरुपरमावधानेनभूषयेत्यर्थः।किंलक्षणे
मंडने।जयदे।सपत्नीसकाशादुत्कर्षप्रदे।हरेस्तवचरणंस्वाधीनतयामंडनरू
पाचरणंतस्यस्मरणंमनस्यवगाहस्तदेवामृतंतेनकृतंकलिकलुषज्वरस्यमाना
दिषुकलहकालुष्यसंतापस्यखंडनंनाशनंयेनतादृशे।पूर्वरोषविस्मारकमित्य
र्थः।अथवा।श्रीजयदेवस्यकवेर्वचसिवाक्येसदयंदयासहितंयथास्यादेवंहृद

यंकुरुकिंलक्षणेवचसि।मंडने।सकलभक्तजनालंकाररूपे।जयदे।सर्वोत्तमभक्ति
प्रदानेनसर्वोपरिविराजमानतयाविजयप्रदे।पुनःकीदृशे।हरिचरणस्मरणमे
वयदमृतंपरमानंदरूपमहौषधंतेननिर्मितंकलिकलुषज्वरस्यखंडनंनाशनंये
नतादृशे।कृतकलुखज्वरसंज्वरेतिपाठेकृतआचरितोयःकलुषज्वरःपापरूप
संतापःसएवसंज्वरः।तस्यखंडनेछेदकेपापसर्वतविदारणेवचसीत्यर्थः॥७।
२४॥ ॥रचयेत्यादि॥ ॥रचयकुचयोपत्रंचित्रंकुरुष्वकपोलयोर्घटयजघनेकां
चीमंचस्रजाकबरीभरं॥कलयवलयश्रेणींपाणौपदेकुरुनूपुराविति निगदि
तःप्रीतःपीतांबरोपितथाकरोत्॥७७॥हेप्रियेकुचयोःपत्रंमकरपत्रिकांरचय। २४४

कपोलयोश्चित्रंचित्रकाख्यंरचनाविशेषंकुरुष्व।अथच।जघनेकांचींक्षुद्रघंटि
कांघटयअर्पय।कबरीभरंग्रथितकेशसमूहंस्रजापुष्पमालयाअंचपूजय
केशपाशेमाल्यंप्रापयेत्यर्थः।अचेत्यंचगतिपूजनयोरित्यस्यलोट्मध्यमपुरु
षैकवचनंवलयश्रेणींकंकणपंक्तिंपाणौहस्तेकलयअर्पय।पदेचरणेनूपुरौ
मंजीरौकुरुइति।अनेनप्रकारेणराधयानिगदितःउक्तःपीतांबरःतत्कांति
वसनःश्रीकृष्णोपितथैवाकरोत्।यथायथासाकथितवतीबहुमानेनतथैवाक
रोदित्यर्थः।यथायथाश्रीराधाउक्तवतीतथातथैवाकरोदितिसंतताश्रववल्लभे
यमित्युक्तं।तद्यथा।षडंघ्रिभिरमर्द्दितान्कुसुमसंचयान्नाविदखंडमपिराधि

केबकुञ्चिखंडकंत्वजिरा।अमुंचतवपद्मवक्त्रमुदंवेदकोज्वलंकरोतुवशागोज
नःकिमयदम्पदाज्ञापय।किंचाहणंयुगशतमिवयासायेनविनानवदिति।निः
सीमानुरागनरेणावशीकृतःउक्तंच।श्रीमुखेनैव।नपारयेहमिति।भगवान्पुरु
षोत्तमःसच्चिदानंदैकरसापारैश्वर्यमहिमगुणाच्युतस्वरूपः।तद्रूपेनविस्ताह
शैरेवप्रियजनैर्नित्यानंदरूपरचितःनित्यएवरममाणएवास्ते।आत्मारामयोगि
न्निर्ग्रंथानीयगुणत्वात्।यथाआत्मारामाश्चमुनयइतिउक्तंचानहिकर्हिचिन्मय
शःशांतरूपेनंक्ष्यंतिनोऽनिमिषोलेढिहेतिः।येषामहंप्रियआत्मासुतश्चसखागु
रुःसुहृदोदैवमिष्टंइति।व्याकृतंस्वामिचरणैः।ननुअन्यलोकवत्मदीयानांनो २४५

कृष्णोग्पानांविनाशःस्यान्नत्राहहेशांतरूपेशांतंशुद्धंतद्रूपेमद्लोकेवासस
ःकदाचिदपिनंक्ष्यति।नोग्पदीनानन्नवंति।अनिमिषोमेहेतिकालचक्रंचनो
लेढि।तान्नग्रसति।तत्रहेतुः।येषामिति।सुतश्चस्नेहविषयःसखेवविश्वासास्प
दंगुरुरिवोपदेष्टासुहृदिवहितकारी।इष्टदेवमिवदृश्यः एवंसर्वभावेनमांये
भजंतितान्मदीयंकालचक्रंनग्रसतीत्यर्थः।अथवा।प्रियःपतिःआत्मास्वरूपः
सुतःपुत्रःसखामित्रंगुरुःपितासुहृत्संबंधीदैवमिष्टसेव्यं।एवंशांतदासपुत्र
बंधुमित्रपितृपत्न्यश्चभक्ताःनिरूपिता।येत्वत्रव्याकृतंतंतर्क्ययंतितेमंदमत
योज्ञेयाः।उक्तंचभगवता।अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः।परंभावम

जानंतोमामव्ययमनुत्तमंश्रुति।८७॥यश्चांधर्वेति॥ ॥यश्चांधर्वकलासुकौशलमनु
ध्यानंचयवैष्णवंयच्छृंगारविवेकतत्वमपियत्काव्येषुलीलायतं॥तत्सर्वंजयदेव
पंडितकवेःकृष्णैकतत्वात्मनःसानंदाःपरिशोधयंतुसुधियःश्रीगीतगोविंदतः।
८८॥ ॥हेसुधियःपंडिताःसानंदाःसमाँनस्फुरणेनगतशंकयानंदसहिताःनग
वशुरुणानामानंदरूपत्वाच्चसानंदाःसंतःजयदेवपंडितकवेःयद्यपिपंडितःक
विरित्येकार्थंपर्यवसायित्वंतथाप्यत्रविचारक्षमयुक्तिवक्तापंडितःसरसयुक्ति
मात्रवक्ताकविरिनेदःयज्ञक्रतुरित्यादाविवसयूपाःक्रतवश्चयूपायज्ञाश्रुति।श्री
गीतगोविंदतःतत्सर्वंपरिशोधयंतु।सर्वतोभावेनजानंतु।तत्किमित्याह।यश्चांध

र्वकलासुकौशलं।गानविद्यासुयन्नैपुण्यं।गंधर्वःमार्गदेशीवित्।मार्गस्यस्वर
पदात्मकत्वात्।कलाश्रंगविन्यासवैलक्षण्यादिकाःतत्रनैपुण्यमितिप्रवैक्ति।
मेवार्थः।अथचवैष्णवंविष्णुसंबंधीयदनुध्यानंअनुलक्षणंचिंतनं।यच्छृंगारर
सस्ययोविवेकःसंयोगविप्रलंभादिरूपेणविवेचनं।तस्यतत्वंयथार्थज्ञानंयद्
पिकाव्येषुकविकर्मसुकवित्वनिर्माणरूपेषुलीलायितंविलसितमितितत्स
र्वमित्यर्थःकीदृशस्यजयदेवस्य।कृष्णैकतानात्मनः।कृष्णैकतानस्तत्परश्चा
त्मामनोयस्य।तादृशस्य।एकतानोऽनन्यवृत्तिःएकाग्रैकमनावपीत्यर्थः।८८।क
विग्रंथसमाप्तौश्रोतृणामाशिषंप्रयुंक्तेपर्य्यंकीर्ति॥ ॥पर्य्यंकीर्तनागनाय

कफणाश्रेणीमणीनांगणेसंक्रांतप्रतिबिंबसंवलयोनेबिन्नद्धिन्नुर्विक्रियांपादां
नोरुहधरिवारिधिसुतामस्खणांदिदृक्षुःशतैःकायव्यूहमिवाचरन्नुपचितीभूतो
हरिःपातुवः॥७॥ ॥हरिःस्मृतिमात्रएवहृज्जिनपुंजनंजनःवोयुष्मान्पातुर
हेतुःनक्तव्रणयितास्यापनेनरक्षणव्यसनतामाह।किंलक्षणःकायव्यूहं।
शरीरसमूहंआचरन्निवउपचितीभूतःवृद्धिंप्राप्तःतत्रहेतुःपादांभोरुहंचर
णसरोजंधारयितुंशीलंयस्यास्तादृशींवारिधिसुतांलक्ष्मींअस्तांशतैःनेत्रा
णांसहस्रैदिदृक्षुःद्रष्टुमिच्छुःकथंतथानवेदतआह।पूर्व्यंकीकृतोयोनागना।
यकःशेषस्तस्यफणाश्रेणीतांपंक्तिनांयेमणयस्तेषांगणेसमूहेसंक्रांताप्रतिबिं २४७

बसंवलनयासंबद्धप्रतिकृतिप्रसरेणनविन्नुप्रक्रियांविस्तारप्रकारंबिभ्रत्।
दधत्प्रतिबिंबनिर्वापकमणीनामनंततयादेहानामनंतत्वंदेहानामनंतत
यातादृशनेत्रलाभोवृद्धित्यर्थः॥७॥अन्यच्च॥त्वामित्यादि॥ ॥त्वामप्राप्यम
यिस्वयंवरपरांक्षीरोदतीरोदरेशंकेसुंदरिकालकूटमपिवन्मूढोमृडानीपति
ःइत्थंपूर्वकथानिरन्यमनसोविक्षिप्यवक्षोंचलंराधायाःस्तनकोरकोपरि
मिलन्नेत्रोहरिःपातुवः॥८॥ ॥हरिःश्रीकृष्णोवःपातु।किंलक्षणंहेसुंदरिमू
ढोमृडानीपतिःरुद्रःक्षीरोदतीरोदरेक्षीरसमुद्रतटमध्येमयिस्वयंवरपरा
मदेकपतिकांत्वांअप्राप्यालब्धाकालकूटंहालाहलंअपिबत्पीतवानित्यहं

शंकेतर्क्कयामि।इत्थमनेनप्रकारेणपूर्वकथानिःपूर्वकथनैरन्यमनसोऽन्यमन।
स्कायाराधायावज्ञोचलंस्तनावरकंविक्षिप्यापसार्यस्तनौकौरकाविवतदुपरि।
मिलन्नेत्रःनूतनोद्भवत्वेकोरकोपमासौंदर्यादिनाच।अनेनपार्वत्याःसकाशाद
पिसौंदर्याधिक्यंध्वनितं॥ए०॥साध्वीत्यादि॥ ॥साध्वीमाध्वीकवितानन्नवतिन्नव
तुःशर्करेकर्करासिन्नाहेदृश्यंतिकेत्वाममृतमृतमसिक्षीरनीरंरसस्ते॥माकं
दंक्रंदकांताधरधरणितलंगच्छयच्छंतियावन्नावशृंगारसारस्वतमिहजयदेव
स्यविश्वंवचांसि॥ए१॥ ॥इहलोकेविश्वक्सर्वतःयावच्छृंगारसारस्वतंनावंजयदे
वस्यवचांसियच्छंति।तावत्तेमाध्वीकमधुरोहमितितवचिंतासाध्वीनन्नवति।अ २४८

अपिचाशर्करेत्वंकर्करासि।हेनाहेपेलांकेदृश्यंत्यवलोकयिष्यंति।अमृतमृत
मसि।हेक्षीरनीरंरसस्ते।माकंदक्रंदाकांताधरतवस्थितिरिहनास्ति।त्वंधरणि
तलंगच्छ।श्रीजयदेववर्णितमधुराख्यनगवद्रसास्वादनिर्दृताजनास्तदेकनि
ष्ठाःसंतःएतेषांतिरस्कारंकरिष्यतीतिन्नावः॥ए१॥ ॥इतिश्रीगीतगोविंदेसु।
प्रीतपीतांबरोनामद्वादशःसर्गःसमाप्तम्॥ ॥१२॥ ॥श्रीराधयामंडनेनियुक्त
स्तेनातिशयेनप्रीतवानित्यर्थः॥ ॥श्रीभोजदेवप्रभवस्यरामादेवीसुतश्रीजय
देवकस्यपराशरादिप्रियबंधुकृत्येश्रीगीतगोविंदकवित्वमस्तु॥ए२॥ ॥इति
श्रीकिंदुबिल्वीयकविराजराजश्रीजयदेवकृतगीतगोविंदाख्यःप्रबंधःसमाप्तः॥

॥प्रफुल्लभगवज्जनंरसकदंबकल्लोलिनीप्रफुल्लयतुमोहनेभजनतानसंवर्द्धि
नी॥समस्तपटुचातुरीविलितगीतगोविंदतःप्रशस्तरसदीपिकामधुरपुंज
मंजूषिका॥१॥ ॥गीतगोविंदतइतिषष्ठ्यंतंपदं।सार्वविभक्तिकस्तसित्यभिधा
नात्॥श्रीमद्वृंदावनेश्वरीप्रियकृच्चरणपंकेरुहमकरंदास्वादनपटुवंचरीक
संभाषणमध्वानंदांदोलचपलहृदयेनश्रीमद्भगवद्दासेनभगवज्जनपरितो
षायविरचितेयंरसकदंबकल्लोलिनीश्रीमद्रसवेदिभिर्भगवत्प्रियैरानंदसं
दोहसंदीपतपरमोज्वलरसावगाहिमनसाऽहर्निशंविचारणीया॥ ॥इतिश्री
गीतगोविंदस्यरसकदंबकल्लोलिनीटीकेयंसमाप्ता॥ ॥संवत्१८०१वर्षेशाके

१६६६प्रवर्त्तमाने।द्वितीयआषाढमासे।शुक्लपक्षेप्रतिपदा१भृगुवासरेलिखित
मिदंपुस्तकं॥ ॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशुद्धंवा
ममदोषोनदीयते॥१॥ ॥लेखकपाठकयोःशुभंभवतु॥ ॥कल्याणमस्तु॥॥
॥श्रीरस्तु॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्रीः॥

ગ્ર·ટી·
૨૫૦